CC-0. Digitized by eGangotri and MIDF- Delhi

ARTHASAMGRAHA

BY

LAUGAKSHI BHASKARA,

With a commentary called Kaumudi

by

Sri Rameshwar Siva Yogi Bhikshu,

Edited with notes by Pandit Sri Raghuvir Trivedi

[illegible] & Vedanta Tirtha

Adhyapak Sri Visuddhananda Sarasvati

Vidyalaya, Calcutta,

With The Assistance of

MAHAMAHOPADHYAYA SRI LAKSHMANA SASTRI DRAVID

PROFESSOR

Government Sanskrit College Calcutta.

Published and Sold by H. D. Gupta & Sons,

PROPRIETORS,

THE CHOWKHAMBA SANSKRIT SERIES OFFICE,

BENARES CITY:

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press,

BENARES.

1915.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावना — आर्थीभावना, शाब्दीभावना,

भेद — विधि, मन्त्र, नामधेय, निषेध, अर्थवाद — गुणवाद, अनुवाद, भूतार्थवाद

मत्वर्थलक्षणा, वाक्यभेद, तत्प्रख्यशास्त्र, तद्व्यपदेश

उत्पत्तिविधि, विनियोग, अधिकार, प्रयोग, — श्रुति, अर्थ, पाठ, स्थान, मुख्य, प्रवृत्ति, + क्रमप्रमाणानि. मन्त्र, ब्राह्मण

श्रुति, लिङ्ग, वाक्य, प्रकरण, स्थान, समाख्या. — पाठसादेश्य, अनुष्ठानसा. — यौगिकी, लौकिकी

महाप्रकरण, अवान्तरप्रकरण

विधात्री, अभिधात्री, विनियोक्त्री, — प्रधानकर्माणि

विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा

+

आग्नेयोऽग्नीषः: औपवसथ्ये ह्नि

सवनीयः: प्रातःकाले

अनुबन्ध्यः: अन्ते. — ज्योतिष्टोमविकारा(?)

अपर्युदासः, विधिरपूर्वविधिः.

प्रतिषेधः, पर्युदासः

विधिस्तत्र नियमश्च त्रिधा: —

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्थसङ्ग्रहः ।

पूर्वमीमांसासारसङ्ग्रहरूपः ।

मीमांसापारदृश्वश्रीलौगाक्षिभास्करविरचितः ।

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षु-
विरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः ।

कलिकातास्थराजकीयसंस्कृतविद्यालयाध्यापकानां महामहो-
पाध्यायश्रीमल्लक्ष्मणशास्त्रिमहोदयानां साहाय्येन कलिका-
तास्थश्रीविशुद्धानन्दसरस्वतीविद्यालयाध्यापकेन
काव्यवेदान्ततीर्थश्रीरघुवीरत्रिवेदिना
सुपरिष्कृतः ।

श्रीकाश्यां विद्याविलासप्रेसनाम्नि यन्त्रालये
श्रीयुतश्रेष्ठिहरिदासगुप्तात्मजजय-
कृष्णदासगुप्तानुमत्या-
मुद्रितः ।
संवत् १९७२

(अस्य सर्वाधिकारः राजनियमानुसारेण स्वायत्तीकृतः)

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमिका ।

——:o:——

विदितमस्तु सर्वेषां महात्मनाम् । मीमांसापारदृश्वश्रीलौगाक्षिभास्करविरचितो मीमांसार्थसङ्ग्रहनामा प्रकरणग्रन्थः पूर्वमनेकवारं नानाप्रदेशेषु व्याख्यासनाथस्तद्रहितश्च मुद्रयित्वा प्रकाशितः, परमद्ययावत् शुद्धस्याऽऽदर्शपुस्तकस्याऽलाभाद्वा शोधकानां दृष्टिदोषाद्वा बहुषु स्थलेषु सञ्जाताभिरशुद्धिभिरध्येतॄणां पठनादिकार्येषु नैव सोत्साहं प्रवृत्तिरभूदित्यालोच्य न्यूनतामेतां परिहर्तुं बद्धोत्साहेन प्राचीनग्रन्थप्रकाशनधृतव्रतेन श्रीमता स्वर्गतश्रीहरिदासगुप्तात्मजेन जयकृष्णदासगुप्तेन भूयः प्रोत्साहितोऽहं प्राचीनया श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितया मीमांसार्थसङ्ग्रहकौमुद्याख्यव्याख्यया सह ग्रन्थमेनं सम्यक् संशोध्य मुद्रापयितुं प्रवृत्तः श्रीमतां महामहोपाध्यायविरुदाङ्कितानां कलिकातास्थराजकीयसंस्कृतविद्यालये दर्शनशास्त्राध्यापकानां गुरुवरश्रीमल्लक्ष्मणशास्त्रिमहाशयानां साहाय्यमवाप्यान्तरा विषमस्थले टिप्पण्यादिभिरलङ्कृत्य श्रीमद्भग-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वतः कृपाकटाक्षविशेषेण मुद्रणकार्यं कथञ्चित् समापितवानस्मि । अत्र च प्रयत्नविशेषेण शोधने कृतेऽपि यदि नैसर्गिकदृष्टिदोषादन्येन वा कारणेन स्खलितानि भवेयुस्तर्हि तानि विहाय गुणैकदृष्टयो विद्वांसो गुणानेव ग्रहीष्यन्ति नितरामिति निभृतमाशासे । प्रार्थये च भगवन्तं यदनेन व्यापारेण प्रीयतामिति ।

श्रीविशुद्धानन्दसरस्वतीविद्यालयाध्यापकः

संवत् १९७२
ज्येष्ठकृष्णैकादशी ।
कलकत्ता ।

प० श्रीरघुवीरत्रिवेदी ।
काव्यवेदान्ततीर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सव्याख्यार्थसङ्ग्रहस्थशुद्ध्यशुद्धीनां

सूचीपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
कर्थं	कथं	१६	२२
दनिष्टातु	दनिष्टाननु	३२	१३
इतिकर्तव्याका	इतिकर्तव्यताका	३९	१५
द्वजन्य	द्वयजन्ययो	४१	५
भावार्थस्यैधा	भावार्थस्यैवा	४३	१७
प्रामाणा	प्रमाणान्तरेण	४९	३
विधेना	विधेर्नो	५३	७
त्वरूपं	ध्यत्वरूपं	६७	१
भिङ्गाक्ष्या	पिङ्गाक्ष्या	७०	५
आरुणयस्या	आरुण्यस्या	७१	२
पार्ष्टीका	पार्ष्ठिका	७१	२१
प्रकाशत्व	प्रकाशकत्त्व	७३	१२
मुद्देश्यतग	मुद्देश्यग	७४	८
कपितया	कतिपया	९०	१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
प्रयाजाना	प्रयाजानां	९६	२
इन्द्राग्नीशे	इन्द्राग्नीरो	१०१	१७
आग्नीषो	अग्नीषोमी	१२६	५
सिद्धिविद्या	सिद्धविद्या	१४४	१३
शुद्रस्य	शूद्रस्य	१४४	१५
नाऽघातस्य	नाऽवघातस्य	१५१	८
समिधादि	समिदादि	१६१	८
क्रमा	क्रमो	१७४	४
यदास्वि	यदात्वि	१७४	१९
चत्वेन	त्वे च न	१७६	१६
येजामह	येयजामह	१८४	१२
ष नात्र	चनात् प	१८४	२०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सटीकार्थसङ्ग्रहः

श्रीगणेशाय नमः ।

वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः ॥
कुरुते जैमिनिनये प्रवेशायार्थसङ्ग्रहम् ॥ १ ॥

आद्यो यो हेतुर्विश्वसर्गे महेशो
यज्ञादीनां कोऽव्यानिक्षेपदेवः ॥
भूतानां भर्ता सर्वभूतान्तरात्मा
हृद्यं मे कार्यं तत्प्रणामः करोतु ॥ १ ॥

श्रीजैमिनिनये ग्रन्थः प्रवेशाय निरूपितः ॥
विदुषा तत्र बालानां कौमुदीयं वितन्यते ॥ २ ॥

इह खलु परमकारुणिकेन मुनिना जैमिनिना धर्माधर्मविवेकाय द्वादशलक्षणी मीमांसा प्रणीता। तत्र हि प्रवेशाय शिशूनामर्थसङ्ग्रहाख्यं प्रकरणं प्रारभमाणो लौगाक्षिभास्करः शिष्टाचारपरिप्राप्तं प्रचयगमनादिफलकमिष्टदेवतानमस्कारलक्षणं मङ्गलमाचरति। वासुदेवमित्यादिना। वासुदेवं श्रीनारायणं सर्वनिवासाधिष्ठानं (१)प्रकाशात्मकं ब्रह्मेत्यर्थः। रमाकान्तं–रमाया लक्ष्म्याः कान्तमित्यर्थः। नचेश्वरानङ्गीकारो, द्रव्यत्यागोद्देश्यविष्णुदेवतायाः स्वीकृतत्वादित्यन्य-

---

(१) सर्वप्रपञ्चजन्मस्थितिलयोपादानकारणीभूताऽज्ञानविषयं स्वेतराप्रकाश्यत्वे सति प्रकाशरूपमित्यर्थः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तु(१)। जैमिनिनय इति । जैमिनिप्रणीते द्वादशाध्यायात्मके पूर्ववेदभागविचारात्मके तन्त्र इत्यर्थः । प्रवेशाय—बालानामिति शेषः । अर्थसङ्ग्रहमिति । अर्थानां—द्वादशाध्यायप्रतिपाद्यप्रमाणादिपदार्थानां सङ्क्षिप्तशब्दरचनया लक्षणादिकथनमित्यर्थः । तत्र हि प्रथमे लक्षणे (२)विध्यादेः प्रामाण्यं निरूपितं, द्वितीये तद्विधेयकर्मभेदोनिरूपितः, (३)तृतीये विहितानां शेषशेषिभावः,(४) चतुर्थे क्रतुप्रयुक्तानुष्ठेयानां पुरुषार्थप्रयुक्तानुष्ठेयानां च पदार्थानां परिमाणं चिन्ति-

(१) मीमांसकैः प्रौढिवादेनैवेश्वरोनाङ्गीक्रियते लोकानां वेदेष्वेवाऽऽस्थातिशयं जनयितुमितरथा कथं मीमांसकशिरोमणिभिर्वार्तिककारैर्ग्रन्थारम्भे मङ्गलमनुष्ठितमिति सूक्ष्मधियोविदाङ्कुर्वन्तु।

(२) प्रथमे पादे विधिवाक्यानां साक्षाद्धर्मे प्रामाण्यं द्वितीये पादे विध्येकवाक्यतया प्राशस्त्यद्वाराऽर्थवादानां मन्त्राणां च प्रयोगसमवेतार्थस्मारकतया प्रामाण्यं निरूपितं तृतीये वेदमूलत्वेन स्मृतीनां चतुर्थे नामधेयानां विधेयार्थपरिच्छेदकतया प्रामाण्यमुपपादितामिति समस्तः प्रथमोऽध्यायः प्रमाणलक्षणमिति वर्ण्यते।

(३) प्रथमे कर्मभेदोपयोगिधात्वर्थापूर्वभावनानां स्वरूपनिरूपणपूर्वकं भेदं निरूप्य गुणप्रधानभावभेदेन कर्मणां भेदं विचार्य ऋगादीनां लक्षणानि प्रसक्तानुप्रसक्तं च चिन्तितम् । द्वितीयेऽध्यायार्थः कर्मभेदः शब्दान्तरादिभिरभिधीयते । तृतीये रथन्तरादीनां कर्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदोऽभिहितः।

(४) प्रथमे श्रुतिः द्वितीये लिङ्गं तृतीये वाक्यप्रकरणादि चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसदसद्भावः । पञ्चमे प्रतिपत्तिकर्माणि । षष्ठे, अनारभ्याधीतानि सप्तमे बहुप्रधानोपकारकप्रयाजादि । अष्टमे याजमानान्येतानि निरूपितानि ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तं, (१)पञ्चमे ऽनुष्ठेयपदार्थानामनुष्ठानक्रमो निरूपितः,(२) षष्ठे विहितकर्मफलभोक्तृत्वरूपाधिकारनिरूपणं,(३) सप्तमे प्रकृतावुपदिष्टाङ्गानां विकृतौ सामान्यातिदेशो निरूपितः,(४)

---

(१) प्रथमे पादे प्रधानभूतामिक्षा दध्यानयनस्य प्रयोजिका इत्यादिप्रधानप्रयोक्तृत्वं विचारितं द्वितीये वत्सापाकरणमप्रधानं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वं, तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता । चतुर्थे राजसूयगतजजघन्याङ्गाक्षद्यूतादिचिन्ता ।

(२) प्रथमे श्रुत्यर्थपाठादिभिः क्रमोनिरूपितः द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्मसमापनमित्यादिक्रमाविशेषः । तृतीये पञ्चप्रयाजादीनामावर्तनेनैकादश्यमित्यादिवृद्धिः अदाभ्यग्रहचित्रिण्योरनावृत्तिरित्यादिवृद्ध्यभावः । चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः ।

(३) कर्माधिकारः कर्तुरस्ति अन्धादेर्नास्ति स्त्रिया अस्ति सच पत्या सह इत्येवमादिना प्रथमेऽधिकारोनिरूपितः द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नं फलं दर्शपूर्णमासयोः कर्त्रैक्यनियमः काम्यं कर्म समापनीयमित्येवमादयोऽधिकारिधर्मा उक्ताः । तृतीये द्रव्यस्य प्रतिनिधिरस्ति देवादीनामग्न्यादीनामधिकारिणश्च स नास्ति इत्यादिनिरूपणम् । अवत्तनाशे सत्याज्येन यजेत इडाज्यस्य नाशे सति शेषान्नं ग्राह्यमित्यादिकं पदार्थलोपनं विचारितम् । पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तं ज्योतिष्टोमस्यैकादयोदक्षाः द्वादशाहस्य द्वादशदीक्षा इत्यादिनिरूपितम् षष्ठे सत्राधिकारिणस्तुल्यकल्पा एव सत्रं विप्रस्यैव इत्येवमादिकं चिन्तितम् । सप्तमे पित्रादिकं न देयं महाभूमिर्न देया इत्येवमादिर्देयविचारः अष्टमे लौकिकाग्नावुपनयनहोमः स्थपतीष्टिस्तत्रैव इत्येवमाद्यग्निविचारः ।

(४) प्रथमे समानमितरच्छ्येनेनेत्यादि प्रत्यक्षवचनातिदेशः द्वितीये रथन्तरशब्देन गानमात्राभिधायिना गानस्यैवातिदेश्यत्वमित्येतादृशः पूर्वोक्तातिदेशस्य शेषोविचारितः । तृतीयेऽग्निहोत्रनाम्नाऽतिदेशः । चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टमे "आग्नेयोऽष्टाकपाल" इत्यादिप्रकृत्यङ्गानां "सौर्यं चरुं निर्वपे"दित्यादि विकृतौ सप्तदशद्रव्यदेवतादिद्वारेण विशेषातिदेशः,(१) नवमे प्रकृतावुपदिष्टानां मन्त्रसामसंस्कारकर्मणां विकृतावतिदेशप्राप्तानां प्रकृतिविकृत्योरग्निसूर्यादिदेवतादिभेदे प्रकृतिगतं देवतादिवाचकं पदं विहाय विकृतौ देवतादिवाचकस्य पदस्याध्याहार ऊहो निरूपितः यथाऽ"ग्नये जुष्ट"मिति मन्त्रे प्रकृत्युपदिष्टे विकृतावतिदेशप्राप्ते ऽग्निपदपरित्यागेन सूर्यपदाध्याहारः यथा च "गिरागिरा च दक्षस" इत्यत्र साम्नि गिरापदस्य परित्यागेनेरापदाध्याहारः साम्नामूहः व्रीह्यादिद्रव्यान्तरसम्बन्धिनश्चावघातादेर्नीवारादिद्रव्यान्तरसम्बन्धः संस्कारकर्मणामूहश्च,(२) दशमे विकृतौ चोदकप्राप्तानां प्राकृता-

(१) प्रथमे स्पष्टेन लिङ्गेनातिदेशविशेषः तद्यथा सौर्यचरावतिदेशकानि निर्वापः तद्धितेन देवतानिर्देशः एकदेवतत्वं औषधद्रव्यकत्वं इत्यादीनि स्पष्टान्याग्नेयलिङ्गानि द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशः तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते तत्र लिङ्गमस्पष्टं शीघ्रं तद्बुद्ध्यनुत्पादनात् । तृतीये प्रबलेन लिङ्गेनातिदेशः तद्यथा आभिचारिकेष्टावाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु त्रित्वेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदैवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः । प्रबलं च द्विदैवत्यत्वं शब्दोच्चारणमात्रेण सहसा प्रतिभासात् क्रमस्तु विलम्बितप्रतीत्या दुर्बलः । चतुर्थे दर्विहोमेष्वतिदेशोऽपोद्यते ।

(२) प्रथमे उपोद्घातपूर्वकमूहविचारप्रारम्भः तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः अवघातमन्त्रादिष्वविवक्षितं व्रीह्यग्न्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरुपोद्घातः सवित्रशिवपूषशब्दानां विकृतिषु नास्त्यूहः अग्निशब्दस्यास्त्यूह इत्यादिरूहविचारारम्भः । द्वितीये सपरिकरः सामोहः । तृतीये मन्त्रोहः । चतुर्थे मन्त्रोहप्रसङ्गापतितोविचारः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ङ्गानां प्रकृतौ सावकाशानां विकृतौ ह्युपादिष्टविशेषाङ्गादिना बाधो निरूपितः—यथा प्रकृतेः सकाशाद्विकृतावतिदिष्टानां बर्हिषां "शरमयं बर्हि"रित्युपदिष्टेन शरमयबर्हिषा विकृतौ बाधः,(१) एकादशे चानेकाङ्गिविधिप्रयुक्तानामङ्गानां सकृदनुष्ठानात्सर्वाङ्गिनामुपकारसाम्यं तन्त्रं निरूपितं,यथाऽऽ"ग्नेयोष्टाकपाल" "उपांशुयाजमन्तरा यज""त्यग्नीषोमीयमेकादशकपाल"मित्यादिपौर्णमासादिकर्मप्रयुक्तानां प्रयाजाद्यङ्गानां सकृदनुष्ठानात्सर्वाङ्ग्युपकारः(२) द्वादशे चैकाङ्गिप्रयुक्तस्याङ्गानुष्ठानस्य तत्प्रयोजक-

---

(१) प्रथमे बाधहेतुर्द्वारलोपो निरूपितः तद्यथा स्वयंकृता वेदिर्भवति इत्यत्र वेदिनिष्पादनरूपस्य द्वारलोपेन निष्पादकानामुद्धननादीनां बाधः कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः। द्वितीये सङ्क्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः। तृतीये बाधकारणं कार्यैकत्वं तद्यथा–प्रकृतौ गवाश्वादिदक्षिणाया ऋत्विक्परिक्रयः कार्यं तथा विकृतिरूपे शूनास्न्येकाहे धेनुरूपाया दक्षिणायास्तदेव कार्यम्–ततो धेन्वा गवाश्वादिदाक्षिणा विकृतौ चोदकप्राप्ता बाध्यते। चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्ठहोमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः। पञ्चमे षोडशिग्रहः प्रकृतिगामी सचाऽऽग्रयणपात्रादेवं ग्रहीतव्य इत्यादिर्बाधप्रसङ्गागतोग्रहादिविचारः। षष्ठे साम तृचे गेयमित्यादिर्बाधप्रसङ्गागतः सामविचारः। सप्तमे पश्वङ्गेषु प्रत्यङ्गं हविर्भेदः न कृत्स्नः पशुर्हविर्भेदः गृहमेधीयमपूर्वं कर्मेत्यादिर्बाधप्रसङ्गागतः प्रकीर्णविचारः। अष्टमे नानुयाजेषु इति पर्युदासः न सोमे इत्यर्थवादः नातिरात्रे इति प्रतिषेधः इत्यादिर्बाधोपयुक्तो नञर्थविचारः॥

(२) प्रथमे तन्त्रस्योपोद्घातो वर्णितः द्वितीये तन्त्रावापौ सङ्क्षेपेणोक्तौ तृतीये तन्त्रमुदाहरणबाहुल्येन प्रपञ्चितं चतुर्थे तथैवाऽऽवापः प्रपञ्चितः।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामर्थ्यरहितेऽङ्ग्यन्तरेऽप्युपकारः प्रसङ्गोनिरूपितः–यथा "ऽग्नीषोमीयं पशुमालभेते"ति पशुविधौ प्रयुक्तानां प्रयाजाद्यङ्गानां पशुपुरोडाशे ऽप्युपकार इति(१) । तथा च ते पदार्थाः केचिदत्रापि संक्षेपेण निरुपिताः केचित्तु सूचिताः । तत्र कांश्चित्पदार्थास्तत्र तत्र प्रदर्शयिष्याम इत्यर्थसङ्ग्रहमित्यस्योपपत्तिः । तथासति ये चानुबन्धा जैमिनितन्त्रस्यत एवास्यापि, तत्प्रकरणत्वात् तस्य च धर्म एव विषयः अधर्मस्तु निरसनीयतया विचारितः, सोऽपि । अधिकारी अधीतवेदवेदाङ्गोधर्मजिज्ञासुः श्रेयोर्थी । प्रयोजनश्च विचारितधर्मानुष्ठानेन स्वर्गादि । सम्बन्धोबोध्यबोधकलक्षणोधर्मतन्त्रयोरिति ॥ १ ॥

तत्र तावत्प्रतिज्ञातमर्थसङ्ग्रहं निरूपयितुं स्वप्रकरणस्य तन्त्रारम्भाधीनारम्भकत्वात् तन्त्रारम्भार्थकं सूत्रमवतारयति । अथेत्यादिना । तत्र चाथशब्दः सौत्राथशब्दसमानार्थकः । वेदाध्ययनानन्तरं तदर्थविचारः कर्तव्य इति धर्मजिज्ञासां सूत्र-

---

(१) प्रथमे पादे पशुधर्माणां पशुपुरोडाशे प्रसङ्गः सौमिकवेदेरुत्तरकालीनकर्मसु प्रसङ्ग इत्यादिविचारः द्वितीये सवनीयपशोस्तन्त्रित्वं नतु सवनीयपुरोडाशानां विकृतिस्तान्त्रिणी न प्रकृतिरन्वारम्भणीया विकृतिष्वपि स्यात् नतु प्रकृतावेवेत्यादिविचारः। तृतीये त्वग्वाससोः समुच्चयः आघारगतानामृजुत्वादीनां समुच्चय इत्यादिकं प्राधान्येन यवव्रीह्योर्विकल्प इत्यादिकं समुच्चयापवादत्वेन इत्युभयं चिन्तितम् । चतुर्थे च ऐन्द्राबार्हस्पत्ययाज्यानुवाक्यायुगलयोर्विकल्प इत्यादिकं प्राधान्येन याज्यानुवाक्ययोः समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम् । तदेवं द्वादशाध्यायगतेषु षष्टिसङ्ख्याकेषु पादेषु प्रतिपाद्या अर्थाः सङ्गृहीता इत्यादि जैमिनीयन्यायमालाविस्तरोक्तं सर्वं द्रष्टव्यम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ परमकारुणिको भगवान् जैमिनिर्धर्मविवेकाय द्वादशलक्षणीं प्रणिनाय । तत्रादौ धर्मजिज्ञासां सूत्रयामास अथातोधर्मजिज्ञासेति ॥

यामासेति तदर्थः । परमकारुणिकः—निरुपाधिकरुणायुक्तः । भगवान्—कीर्त्यादिमान् । भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यमरात् । जैमिनिरादौ धर्मजिज्ञासां सूत्रयामासेत्यन्वयः । कस्यादावितिवीक्षायामाह । द्वादशलक्षणीमिति । द्वादशानां लक्षणानामध्यायानां समाहारोद्वादशलक्षणी तां प्रणिनीय बुद्धौ समारोप्य । तत्र—तस्यां तस्या वेत्यर्थः । लोकेपि जनः स्वकृत्यं समाकलय्य तत्करणे प्रवर्तत इति प्रसिद्धेर्न प्रणिनीय सूत्रयामासेति विरोधः । प्रणिनायेति पाठान्तरे तु प्रणयनं कृतवानित्यर्थः । प्रणिनायेत्युक्ते केन क्रमेणेति वीक्षायां तत्रेत्यादुचत्तरम् । धर्मविवेकायेत्यधर्मस्याप्युपलक्षणं(१) तयोर्विवेकाय निर्णयज्ञानायेत्यर्थः । कुत्र धर्मजिज्ञासां सूत्रयामासेति वीक्षायामाह । अथेति । सूत्रं व्याचष्टे । अत्रेत्यादिना । अत्र—सूत्रे ।

अस्य च प्रथमसूत्रस्य "चोदनालक्षणोऽर्थो धर्म" इत्यारभ्य "अन्वाहार्ये च दर्शना"दित्यन्तं जैमिनिप्रणीतं धर्मविचारशास्त्रं विषयः । तत्र संशयः—किमस्य धर्मविचारतन्त्र-

---

(१) सूत्रस्थाऽथशब्दस्य कृत्स्नवेदाध्यनानन्तयार्थकतयाऽतः शब्दोक्तहेतौ विवक्षितार्थत्वरूपे सर्वस्यैव वेदभागस्य विवक्षितार्थकत्वस्य कथनीयतया धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वमिति तात्पर्यम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्याऽऽरम्भोऽध्ययनविध्यप्रयोज्यस्तत्प्रयोज्यो वेति । तत्र यदि स्वाध्यायाध्ययनविधिनाऽर्थज्ञानाय दृष्टप्रयोजनाय वेदाध्ययनं विधीयेत तदा तस्य शास्त्रारम्भे भवेदपि प्रयोजकत्वं, नैतदस्ति अन्यथासिद्धत्वात् । तथाहि—किमत्यन्ताप्राप्तार्थज्ञानहेतुमध्ययनं तद्विधिर्विधत्ते । किंवा पक्षे प्राप्तमवघातवन्नियमम् । नाद्यः । विवादास्पदं वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वाद्भारताद्यध्ययनवदित्यनुमानेनैवाध्ययनस्यार्थज्ञानहेतुत्वप्राप्तेः । नापि द्वितीयः अवघातवैषम्यात्—यथा ऽवघातनिष्पन्नैरेव तण्डुलैरनुष्ठीयमानौ दर्शपूर्णमासाववान्तरापूर्वद्वारेण परमापूर्वं जनयतः नान्यथा ततो दर्शपूर्णमासापूर्वमेवावघातनियमहेतुः तथा लिखितपाठेन गुरुपूर्वकाध्ययनेन वाऽर्थज्ञानसम्भवात्पक्षेऽप्राप्ताध्ययननियमहेतुर्वक्तव्यः, स च नास्ति लिखितपाठजन्यार्थज्ञानेनैव क्रत्वनुष्ठानसिद्धेः प्रयोजकाभावात्(१)। तस्मादुक्तविधिद्वयासम्भवादर्थज्ञानहेतुविचारशास्त्रारम्भस्य न विधिप्रयोज्यत्वमिति प्राप्तम् । अत्रोच्यते । यदुक्तमध्ययनस्यार्थज्ञानहेतुत्वमनुमानासिद्धमितिनात्यन्ताप्राप्तविधिरिति तत्तथैव । नियमविधिस्तु भवत्येव । नच प्रयोजकाभावः सकलक्रत्वपूर्वस्यैव प्रयोजकत्वाद्दर्शपूर्णमासजन्यपरमापूर्वस्यावघातनियमजन्यापूर्वकल्पकत्ववदेव

---

(१) अयं भावः अध्ययनस्य क्रत्वर्थत्वे सति क्रतुजन्यपरमापूर्वं अध्ययनजन्यनियमापूर्वस्य कल्पकं स्यात् तदेव तु नास्ति तथाहि अध्ययनस्य क्रत्वङ्गत्वं किं प्रकरणाद्भवेत् उत श्रुत्यादिभ्यः नाद्यः अध्ययनस्या ऽनारभ्याधीतत्वेन क्रतुप्रकरणाभावात्. नद्वितीयः श्रुत्यादीनामभावात् अतः केवलं स्वर्गफलायाक्षरग्रहणमात्रं विधिर्विधत्ते अश्रुतोऽपि स्वर्गो विश्वजिन्न्यायेन फलं कल्पनीयः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्राथशब्दोवेदाध्ययनानन्तर्य्यवचनः । अतः शब्दोहि वेदाध्ययनस्य दृष्टार्थत्वं ब्रूते "स्वा-

च क्रतुजन्यापूर्वजातस्य क्रतुज्ञानसाधनाध्ययननियमजन्यापूर्वकल्पकस्य सत्वान्नियमादृष्टस्य कल्पनादर्थज्ञानसाधनयोर्लिखितपाठगुरुपूर्वकाध्ययनयोः पक्षे प्राप्तत्वाद्यदा गुरुपूर्वकाध्ययनं परित्यज्य लिखितपाठादिना ऽर्थज्ञानं सम्पादयितुं व्युत्पन्नः पुरुषः प्रवर्तते तदा नियमादृष्टाय गुरुपूर्वकाध्ययनमेवार्थज्ञानसाधनं विधीयते । क्रतुजन्यापूर्वप्रयुक्तनियमादृष्टस्यास्वीकारे च श्रूयमाणो विधिरनर्थकः स्यात् । नच नानर्थको लिखितपाठगुरुपूर्वकाध्ययनयोरक्षरग्रहणमात्रेप्यविशेषसाधनत्वाद्यदा गुरुपूर्वकाध्ययनं परित्यज्य लिखितपाठेनाक्षरग्रहणाय प्रवर्तते तदा गुरुपूर्वकाध्ययनमेव नियमादृष्टाय विधीयत इति वाच्यम् । तत्फलस्य कल्प्यत्वप्रसङ्गात् । अर्थज्ञानरूपदृष्टप्रयोजनायाध्ययनस्य विधेयत्वे तु नियमादृष्टस्य क्रतुजन्यापूर्वे श्रुतफले ह्युपयोगो भविष्यति । नच "यदृचोऽधीते पयसः कुल्या अस्य पितॄन्स्वधा अभिवहन्ती"त्यार्थवादिकं श्रुतमेव फलमिति वाच्यम् । तस्य नित्यतयाऽध्ययनविधिफलत्वेन प्रथमाध्ययनविधिफलत्वाभावात् । किञ्चाध्ययनव्यापारस्य सम्भवत्यर्थज्ञानरूपदृष्टफलकत्वे केवलादृष्टार्थकत्वानुपपत्तेः । तथाचोक्तम्—

"लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना ॥
विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यतीति" ।(१)

(१) नन्वेवमपि श्रुतव्याकरणाद्यङ्गस्याधीतवेदस्य पुरुषस्यार्थ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्च विधिनैव वेदाध्ययनस्य तदर्थज्ञानपर्यवसायित्वं तदर्थनिर्णयहेतुविचारकर्तव्यता चाऽऽक्षिप्यते । तथाहि—"स्वाध्यायोऽध्येतव्य" इत्यत्र तव्यप्रत्ययः शाब्दभावनामाभिधत्ते । सा च स्वभाव्यं विना ऽनुपपद्यमाना किञ्चिद्भाव्यं कल्पयति । तत्र चैकप्रत्ययोपात्तत्वेनार्थभावनैव भाव्यत्वेन समन्वेति । सापि स्वभाव्यमन्तरेणानुपपद्यमाना किञ्चिद्भाव्यमाक्षिपति । तत्रापि फलपदस्याश्रवणात्समभिव्याहृतः स्वाध्यायः कर्मभूत एव भाव्यत्वेन सम्बध्यते । तस्य च फलवदर्थावबोधपर्यन्तत्वाभावे भाव्यतानुपपत्त्या फलवदर्थाववोधपर्यवसायित्वमापतति अर्थानिर्णयमन्तरेण च फलवदर्थाववोधस्यासम्भवेनार्थनिर्णयहेतुविचारकर्तव्यतामप्यध्ययनविधिराक्षिपतीति । तस्माद्दर्थज्ञानरूपदृष्टप्रयोजनायैवेदमध्ययनं विधीयते नाक्षरग्रहणमात्रायेति(१) सिद्धान्तमभिप्रेत्याथशब्दं वेदाध्ययनानन्तर्यार्थकत्वे-

---

ज्ञानसम्भवाद्विचारशास्त्रस्य वैयर्थ्यमिति चेत् न ज्ञानमात्रसम्भवेऽपि निर्णयस्य विचाराधीनत्वात् अक्ताः शर्करा उपदधातीत्यत्र घृतेनैव न तैलादिना इत्ययं निर्णयो व्याकरणेन निरुक्तेन निगमेन वा न सिद्ध्यति । विचार शास्त्रं तु तेजोवै घृतमिति वाक्यशेषादर्थं निर्णेष्यति, अतो विचारो वैधः ।

(१) यद्यपि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिर्न किञ्चित्फलवत् कर्मारभ्याम्नातो नाप्यव्यभिचरितक्रतुसम्बन्धपदार्थगतः नहि जुह्वादिवत् स्वाध्यायोऽव्यभिचरितक्रतुसम्बन्धस्तथाऽपि स्वाध्यायस्याध्ययनरूपसंस्कारजनकोऽयं विधिरध्ययनस्य फलसाधनतामवगमयन् किं स्वतन्त्रमश्रुतं किञ्चित्फलं कल्पयित्वा विनियोगभङ्गेन स्वाध्यायेनाधीयीतेत्येवमर्थः कल्प्यतां किं वा परम्परयाऽप्यन्यतोऽपेक्षितमधिगम्य निर्वृणोत्विति विवक्षायां न दृष्टद्वारेण परम्परयाऽप्यन्यतोऽपेक्षितप्रतिलम्भे च यथाश्रुताविनियोगोपपत्तौ च सम्भवन्त्यां श्रुतविनियोगभङ्गेनाध्ययनादेवाश्रुतादृष्टफलक-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्यायोऽध्येतव्य" इत्यध्ययनविधौ तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनात् । तथाच वेदाध्ययनानन्तरं यतोऽर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतोहेतोर्धर्मस्य वेदार्थस्य जिज्ञासा कर्तव्येति शेषः ।

नातःशब्दं च वेदाध्ययनस्य वेदार्थज्ञानरूपदृष्टार्थकत्वपरत्वेन च व्याचष्टे । अथ शब्द इत्यादिना । तत्र हेतुमाह । स्वाध्याय इत्यादिना । अध्ययनविधाविति । अध्ययनविध्यनुकूलविचारात्मके प्रमाणलक्षणस्य प्रथमाधिकरण इत्यर्थः । वेदः तच्छब्दार्थः । कर्तव्यपदाध्याहारेण सूत्रं योजयति । तथाचेत्यादिना । तथाचेति । वेदाध्ययनस्य दृष्टार्थत्वे च सतीत्यर्थः । तस्य वेदस्याध्ययनं यतोऽर्थज्ञानरूपदृष्टार्थकमतो हेतोर्वेदाध्ययनानन्तरं वेदार्थस्य धर्मस्येति योजना । तथा च वेदस्य विवक्षितार्थत्वेन वेदार्थज्ञानरूपदृष्टप्रयोजनकस्यैवाध्ययनस्य विधीयमानत्वाद्वेदार्थनिर्णयहेतुविचारः कर्तव्य इत्यध्ययनविधिप्रयुक्त्यैव शास्त्रमारम्भणीयमिति भावः ।

ननु जिज्ञासा हि ज्ञानेच्छा नच सा कर्तुं शक्यते तस्या व्यापारा-

---

लपनोचिता । दृष्टश्च स्वाध्यायस्याध्ययनं संस्कारः तेन हि स पुरुषेण प्राप्यते प्राप्तश्चाभ्युदयनिःश्रेयसप्रयोजनमर्थज्ञानमुपजनयति यदा चाध्ययन संस्कृतेन स्वाध्यायेन सम्पाद्यमानोर्थावबोधः सफल इति स्थापितं तदा यस्याऽध्ययनं तस्यैव बोधः सप्रयोजनो नान्यस्य यस्य चोपनयनसंस्कारस्तस्यै वाध्ययनं स चाद्विजातीनामेवेत्युपनयना ऽभावेनाध्ययनसंस्काराभावात् पुस्तकादिपठितस्वाध्यायजन्योऽर्थावबोधः शूद्राणां न फलाय कल्पत इति तेषां वैदिककर्मण्यधिकारनिवृत्तिरप्यध्ययनविधिप्रसादलब्धा सिद्धा भवतीति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जिज्ञासापदस्य विचारे लक्षणा । अतोधर्मविचारशास्त्रमिदमारम्भणीयामिति शास्त्रारम्भसूत्रार्थः ॥

गोचरत्वात्(१) इच्छामात्रेणानुष्ठानोपयोगिधर्मज्ञानासम्भवाच्चेत्यत आह । जिज्ञासापदे चेति । तथाच जिज्ञासेत्यत्र प्रकृत्या ज्ञानमात्रशक्तिमत्याऽनुष्ठानोपयोगिज्ञानमजहल्लक्षणया, प्रत्ययेन च साध्यसाधनभावसम्बन्धेनेच्छासाध्यो विचारो जहल्लक्षणया च बोध्यत इत्यर्थः । समर्थितं शास्त्रारम्भमुपसंहरति । अत इति । स्वाध्यायाध्ययनविधेः शास्त्रारम्भप्रयोजकत्वमतःशब्दार्थः ।

ननु धर्मविचारशास्त्रमारम्भणीयमित्ययुक्तम् विचारविषयधर्मस्यानिरूपणात् तदनिरूपणं च लक्षणप्रमाणाभावात् । लक्षणप्रमाणाभ्यामेव हि वस्तु सिद्धिर्नान्यथा । अतएवोक्तम्—

"मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणादिति" ॥

सजातीयविजातीयवस्त्वन्तरेभ्यः स्वलक्ष्यस्य व्यावर्तको लोकप्रसिद्धः कश्चिदाकारविशेषो लक्षणम् । तेन च लक्षणेन लक्ष्ये सम्भाविते सति ततः प्रमाणेन तदवगच्छति । यथा सास्नादिमती गौरिति गोलक्षणमुपश्रुत्य तेन च लक्ष्यं सम्भाव्य ततः पशुषु तल्लक्षणलक्षितपदार्थमन्विष्येयं गौरिति चक्षुरादिना तदवगच्छति तथा धर्मस्य नास्ति लक्षणमलौकिकत्वात् । नच विहितक्रियात्वं धर्मत्वमिति वाच्यम् । विहितद्रव्यादावव्याप्तिप्रसङ्गात् । नच तस्याऽलक्ष्यत्वं फलार्थं गुणानुष्ठातरि धार्मिकोऽयमिति व्यवहारस्याभावप्रसङ्गात् । नचेष्टापत्तिः । इन्द्रियकाद्यधिकरणस्य धर्मविचारात्मकत्वाभावेन

---

(१) इच्छाया विषयसौन्दर्यलभ्यत्वेन तत्र कृतिसाध्यत्वासम्भवात् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ को धर्मः किं तस्य लक्षणमिति चेदुच्यते। यागादिरेव धर्मः तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थोधर्म इति । प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति । भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य

शास्त्रसङ्गत्यभावप्रसङ्गात् । फलार्थं विहितस्य दध्यादिगुणस्य धर्मत्वाभावे तज्जन्यादृष्टस्यापि धर्मत्वासम्भवेन तस्य "धर्मः क्षरति कीर्तना"दिति श्रुतकीर्तननाश्यत्वाभावप्रसङ्गाच्च । नच विहितत्वमात्रं लक्षणमिति वाच्यम् । विवाहार्थमनृतवदनादेरऽप्यनुज्ञाविधिविषयस्य धर्मत्वप्रसङ्गादित्यभिप्रायेण चोदयति । अथ क इति । किं यागादिरेव धर्मः किंवा चैत्यवन्दनादिकमपीत्यर्थः । किमिति धर्मलक्षणस्याक्षेपः स च निर्दिष्टः । समाधत्ते । उच्यत इत्यादिना । यागादिरेवेत्येवकारेण चैत्यवन्दनादिधर्मत्वं वारयति । न चैत्यवन्दनादिर्धर्मस्तत्र प्रमाणाभावादित्यर्थः । धर्मस्य लक्षणमाह । तल्लक्षणमिति । प्रयोजन इति । वेदप्रतिपाद्ये स्वर्गादिफलेऽर्थरूप इत्यर्थः। प्रयोजनवदितीति । स्वर्गादिफलस्य सुखादिरूपत्वेन तत्प्रयोजनान्तराभावाद्भवति वारणमिति भावः । भोजनादाविति । तृप्त्यादिप्रयोजनवत्यर्थरूप इत्यर्थः । वेदप्रतिपाद्य इतीति । भोजनादेरागादिनैव प्राप्तत्वात्—

"अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनाम् ।
द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणा"

मित्यादिवचनस्य च ग्रासादिनियमपरत्वाद्भवति तेन त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति । अनर्थफलकत्वादनर्थभूते श्येनादावतिव्या-

द्वारणमिति भावः । श्येनादाविति । "श्येनेनाभिचरन् यजे-त" इत्यादिवेदप्रतिपाद्ये वैरिमरणानुकूलशस्त्रघातादिरूपहिंसात्म-काभिचारस्वरूपप्रयोजनवतीत्यर्थः । नन्वर्थपदस्य श्येनकर्मणि न धर्मलक्षणस्यातिव्याप्तिवारकत्वं श्येनस्यार्थत्वात् । नहि श्येनो नरकं जनयति येनानर्थः स्यान्नरकजनकस्यैवानर्थत्वात् । श्येनस्य तु शत्रुवधमात्रजनकत्वात् । किञ्च चतुर्थे श्येनस्येष्ट-साधनत्वेन वेदबोधितत्वाद्धर्मत्वमेवोक्तम् । तत्फलस्यैव हिंसा-त्मकाभिचारस्य नरकरूपानिष्टजनकत्वेनाधर्मत्वमुक्तम् । न-च तत्रैवातिव्याप्तिवारकं भवत्विति साम्प्रतम् । फले विध्य-योगेन तस्य चोदनागम्यत्वाभावात् अन्यथा विधिस्पृष्टे नि-षेधानवकाशादिति न्यायेन तस्य न हिंस्यादिति निषेधाविष-यत्वेन नरकजनकत्वानापत्तिः निषिद्धस्यैव तज्जनकत्वात् तस्मादर्थपदं व्यर्थमेवेत्यतआह । अनर्थफलकत्वादनर्थभूत इति । श्येनफलस्य शत्रुवधस्य नरकजनकत्वेनानर्थत्वाच्छ्येन-नोऽपि तद्द्वाराऽनर्थ एव तस्यापि शत्रुवधद्वारा नरकजन-कत्वादिति भावः । नच चतुर्थविरोधः । तत्र साक्षादिष्टसा-धनत्वेन वेदबोधितत्वमात्रमभिप्रेत्य धर्मत्वस्योक्तत्वात्— अ-न्यथा सौत्रार्थशब्दविरोधापत्तिः व्यावर्त्यान्तराभावात् । न-हि व्यवधानेन कार्यजनके जनकत्वव्यवहाराभावः । व्यव-धानेनाप्यनुमित्यादिजनके व्याप्त्यादिज्ञाने तद्दर्शनात् । न-नु न श्येनस्यानर्थरूपत्वं सम्भवति तस्य चोदनागम्यत्वा-त् । नच सौत्रार्थशब्दस्य वैयर्थ्यमिति वाच्यम् । तत्फल-व्यावर्तकत्वेनाप्युपपत्तेः अन्यथा फलस्य वेदप्रतिपाद्यत्वाभा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वे तदुद्देशेन यागादिषु प्रवृत्त्यभावप्रसङ्गः इन्द्रियागोचरेऽर्थे प्रमाणान्तराभावात् । तस्माच्छ्येनफलस्यापि वेदप्रतिपाद्यत्वेन शत्रुराज्यादिग्रहणप्रयोजनवत्त्वेन च ग्रन्थकारोक्तधर्मलक्षण-लक्षितत्त्वादर्थपदेन वारणं युक्तमिति चेन्न । चोदनालक्षणोऽर्थो धर्म इति–सौत्रधर्मलक्षणे चोदनापदेन तद्वारणात् । वस्तु-तस्तु शत्रुवधरूपाभिचारस्य श्येनफलस्य लोकतः प्राप्तत्वात्तत्र रागतः प्रवृत्तं पुरुषं प्रति श्येनस्य तत्साधनत्वमात्रं वेदेन बोध्यत इति न तस्य वेदप्रतिपाद्यत्वम् । ततश्च तस्य तेनैव वारणेऽर्थपदस्य श्येनवारकत्वेनैव सार्थक्यमिति ध्येयम् । यत्तु श्येनादौ धर्मत्वाभावे तामसधर्मत्वकथनानुपपत्तिरिति-तन्न । तस्य तामसत्वकथनेनैवानर्थकत्वोपपत्तेः । प्रसिद्धं हि लोके क्रौर्यादिपुरःसरं तामसक्रियाया अनर्थरूपत्वमि-त्यलम् । तस्मादर्थत्वे सति प्रयोजनवत्वे सति वेदप्रतिपाद्य-त्वं धर्मत्वमिति धर्मलक्षणमुपपन्नम् । यत्तु विहितद्रव्यादा-वव्याप्तिरिति । तन्न । दध्यादेरर्थत्वस्येन्द्रियादिप्रयोजनवत्त्व-स्य वेदप्रातिपाद्यत्वस्य च सत्वात् । यत्तु—

"स्त्रीषु धर्मविवाहेषु वृत्त्यर्थे प्राणसङ्कटे ॥
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सित"

मित्याद्यभ्यनुज्ञाविधिविषये ऽनृतवदनादौ धर्मत्वापत्तिरिति । तदपि न। तत्र निरुक्तस्य धर्मलक्षणस्याप्रत्यभावात्। अभ्यनुज्ञा-विधिना हि दोषाभावमात्रस्याक्षेपात्प्रयोजनवत्त्वस्य चानाक्षेपा-द्रागप्राप्तप्रयोजनसाधनत्वस्याप्यनृतवदनादेर्वेदबोधितप्रयोजन-साधनताकत्वाभावान्न धर्मत्वापत्तिः। तस्माल्लक्षणे न कोपि दोष इति सिद्धम्। इदमधर्मस्याप्युपलक्षणम्। तस्यापि प्रासङ्गिकशास्त्र-विषयत्वात् । तथाचोक्तम्–"धर्मस्योपक्रान्तत्त्वेपि यथाप्रसङ्गात्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्तिवारणायार्थ इति । न च चोदनालक्षणोऽर्थो धर्म इति सौत्रतल्लक्षणविरोधः चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम् । तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात् । वेदस्य सर्वस्य धर्मतात्पर्य-

प्रतिषेधचोदनार्थो निरूपित" इति । तथा खण्डदेवेनाप्युक्तम् "यद्यपि धर्मः क्षरतिकीर्तनादित्यादौ वैशेषिकतन्त्रे च क्रियाजन्यादृष्टे धर्माधर्मशब्दप्रयोगस्तथापि "धर्मः स्वनुष्ठितः पुंसा" मित्यादौ तज्जनकविहितनिषिद्धक्रियादावपि तच्छब्दप्रयोगात् ताविह प्राधान्येन विचार्येत" इति । तथाच वेदबोधितानिष्टसाधनताकत्वमधर्मत्वमित्यधर्मलक्षणं सिद्धम् । अत्रानिष्टसाधनताकत्वं विषभक्षणादेरप्यस्तीति तद्वारणाय वेदेति । ब्रह्मयागादेरपि वेदबोधितत्वमस्तीति तद्वारणायानिष्टेति । एवं धर्मस्य लक्षणमुक्तम् । तत्र च सौत्रचोदनापदपरित्यागेन वेदपदप्रदर्शनं सूत्रविरुद्धमित्याशङ्क्य परिहरति । नचेत्यादिना । नच वाच्यमित्यत्र हेतुमाह । तत्रापीति । तत्रापि—सूत्रेपि । वेदमात्रपरत्वादिति । चोदनाप्रकरणपठितकृत्स्नवेदपरत्वादित्यर्थः । तेन न ब्रह्ममीमांसाविरोधः । नापि सौत्रचोदनापदविरोधः चोदनाशेषार्थवादादेर्वेदस्य स्वप्रकरणपठितस्य तया गृहीतत्वात्प्रकरणान्तरपठितस्य ब्रह्मवाक्यस्य ग्रहीतुमशक्यत्वाच्च । ननु "सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं" "स प्रजापतिरात्मनो-वपामुदक्खिद"दित्यादिवाक्यानां धर्मप्रतिपादकत्वादर्शनान्नात्कथं चोदनापदस्य यागादिधर्मविधायकस्य वेदपरत्वमित्याशङ्क्य विधिशेषस्य स्तुत्यादेः प्रतिपादकत्वेन सर्वस्यापि तादृशवेदवाक्यस्य धर्मतात्पर्यकत्वान्मैवमित्याह । सर्वस्येति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वत्वेन धर्मप्रतिपादकत्वात् । स च यागादिर्यजेत

ननु चोदनालक्षणोर्थो धर्म इत्यत्र सूत्रेऽर्थत्वे सति चोदनागम्यत्वं धर्मलक्षणं(१)प्रत्यक्षाद्यगोचरेपि धर्मे चोदनागम्ये गमकं चोदनावाक्यमेव प्रमाणमिति प्रतीयते, तच्चायुक्तम्, एकस्य सूत्रवाक्यस्य स्वरूपप्रमाणपरत्वे वाक्यभेदप्रसङ्गादितिचेत् ? सूत्रस्यार्थतोधर्मलक्षणत्वेपि मुखतः प्रमाणपरत्वात् । तथाचोक्तम् "धर्मलक्षणपरं सूत्रमर्थात्प्रमाणप्रतिज्ञेति प्राभाकराः । मुखतः प्रतिज्ञाऽर्थाद्धर्मलक्षणत्वमिति वार्तिककारीया" इति(२) ।

ननु पूर्वं प्रयोजनवत्त्वमपि धर्मलक्षणे विशेषणं दत्तं ततश्च किं तत्प्रयोजनं किञ्च तदुद्देशेन धर्मविधायकं चोदनावाक्यमिति वीक्षायामाह । स चेत्यादिना । यद्यपि यथा

---

(१) उक्तमिति शेषः । सूत्रेऽस्त्यवधारणद्वयं चोदनैव लक्षणं प्रमाणं यस्येत्येकं, द्वितीयं चोदना च प्रमाणमेवेति, आद्येनावधारणेन चोदनातिरिक्तानां प्रामाण्यं धर्मे वार्यते द्वितीयेन च चोदनाया अप्रामाण्यकारणानि निराक्रियन्ते तथाचोभयपरत्वे वाक्यभेदः स्पष्ट इति भावः ।

(२) श्रुत्यर्थाभ्यां सूत्रस्योभयपरत्वान्न दोषः सूचनाद्धि सूत्रं तस्यानेकार्थत्वं च दूषणं न भवति अत एवोक्तं "लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च । सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिण" इति । लघूनि–असन्दिग्धार्थानि सांशयिकं हि नानार्थस्फोरकत्वेन गुरु भवति । सूचितार्थत्वे हि मुख्यार्थस्याप्यवश्यम्भावाद्बह्वर्थत्वासिद्धिः । अतएव "स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदु"रित्यपि लक्षणं वर्णयन्ति ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यक्षादीनां धर्मे न प्रामाण्यं तथा चोदनावाक्यस्यापि न तत्र प्रामाण्यं सम्भवति—यतः शक्तिग्रहणपूर्वकं लोके ह्याप्तवाक्यस्य प्रामाण्यं दृष्टम्– शक्तिश्च लोकप्रसिद्धे गवादौ गृह्यते,(१) धर्मस्य चालौकिकत्वात्तत्र शक्तिग्रहणं न सम्भवति, शक्तिग्रहणमन्तरेण च हुंफडादिवच्चोदनावाक्यस्यापि धर्माबोधकत्वान्न तत्र प्रामाण्यं, तथापि प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यत्र वाक्ये यथा मधुकरपदस्यार्थमजानन् तदन्यपदार्थांश्च जानन् तत्समभिव्याहारात्कमलध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य सङ्गतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते–"तथा कारीर्य्या वृष्टिकामो यजेते"त्यादौ लोकप्रसिद्धार्थवृष्ट्यादिपदसमभिव्याहारादलौकिकेपि भावनापदार्थे चोदनायाः सङ्गतिं गृहीत्वा चोदनावाक्यार्थं प्रतिपद्यते इति धर्मबोधकत्वाच्चोदनाया धर्मे नाप्रामाण्यमऽस्ति। (२)तथा धर्मस्यालौ-

(१) प्रमाणान्तरेण प्रत्यक्षादिना गृहीते घटादौ वृद्धव्यवहारादिना घटादिपदस्य शक्तिग्रहणं लोके दृश्यते धर्मस्य तु वेदप्रमाणातिरिक्ताऽगोचरत्वेन कथं तत्र शक्तिग्रहः सम्भवी, वेदेनैव धर्मं ज्ञात्वा तत्र शक्तिग्रहश्चेत्प्राप्तं दुरुत्तरं परस्पराश्रयत्वं धर्मे ज्ञाते तत्र शक्तिग्रहः शक्तिग्रहे जाते वेदस्यावबोधकत्वेन धर्मज्ञानमिति न कथञ्चिदपि वेदाद्धर्मावबोधो भवितुमर्हति इति भावः।

(२) ननु तथाऽपि संवादाभावादप्रामाण्यमिति चेत् न समनन्तरभाविप्रतिनियतफले वृष्ट्यादौ संवादस्यापि सम्भवात्। अनियतदृष्टफले चित्रायागादौ प्रतिनियतजन्मान्तरफले ज्योतिष्टोमादौ च संवादः कथमिति चेत् ? एवं तर्हि स्वतः प्रामाण्याभ्युपगमान्नास्ति क्वापि संवादाद्यपेक्षा–अप्रामाण्यं हि त्रिविधं अबोधकत्वं विपरीतबोधकत्वं सन्दिग्धार्थबोधकत्वं च तत्रा ऽबोधकत्वं तु वेदस्य शङ्कितुमप्यशक्यं तथा सति शब्दोच्चारणानर्थक्यस्यैव प्रसङ्गात् वेदस्य चेद्बोधकत्वं नास्ति त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते । तथाहि—यजेतेत्यत्रास्त्यंशद्वयं यजिधातुः

किकत्वेन प्रमाणान्तरागोचरत्वाद्वेदस्य च तत्र स्वतः प्रामाण्याऽभ्युपगमान्न चोदनाया धर्मबोधने मानान्तरसापेक्षत्वमपि । तस्मादप्रामाण्यकारणयोरबोधकत्वसापेक्षत्वयोरसम्भवाच्चोदनायाः सिद्धं स्वतः प्रामाण्यं धर्मे । ततश्च विधायकत्वमुपपन्नामित्याभिप्रेत्योक्तं स्वर्गमुद्दिश्य पुरुषं प्रति विधीयत

र्हि लौकिकस्यापि शब्दस्य बोधकत्वं नास्तीत्येवाभ्युपगन्तव्यं य एव हि लौकिकास्त एव वैदिका इति हि स्थितिः तथा सति लोकव्यवहारोच्छेदप्रसङ्गः । न च सृण्येव जर्फरी तुर्फरी इत्यादिवेदभागेभ्यो न कश्चन अर्थो बुद्ध्यत इत्यस्त्येवाबोधकत्वमिति वाच्यम् । किं निगमनिरुक्तव्याकरणादिभिर्व्युत्पन्नस्य तदर्थबोधो न भवति उताव्युत्पन्नस्य, तत्र न प्रथमः पक्षोऽवकल्पते सर्वेषामेव व्युत्पन्नानां तेभ्यो मन्त्रेभ्योऽर्थावबोधदर्शनात्, द्वितीये न वेदप्रामाण्यहानिः नहि अव्युत्पन्नो वेदार्थं नावबोद्धुं क्षमते इति वेदस्यावबोधकताशक्तिर्नास्ति इति वदितुं शक्यं तथा चाहुर्निरुक्तकाराः न ह्येष स्थाणोरपराधो यदेनमन्धोन पश्यतीति । तस्मात्सिद्धमबोधकत्वमप्रामाण्यं नास्तीति । नापि विपरीतबोधकत्वं बोधस्य विपरीतत्वं हि बाधकज्ञानविषयविषयकत्वं तच्च यागादिभ्योऽनुष्ठितेभ्यः स्वर्गादिरूपं फलं न संवृत्तमिति ज्ञानं यदि कस्य चिदपिभवेत्तर्हि ज्ञातुं शक्यं तत्तु दुर्घटमेव, वैदिकयागफलानां देहान्तरोपभोग्यत्वेन प्रमाणान्तराविषयत्वात् नापि सन्दिग्धार्थबोधकत्वं यदाहि परोक्षप्रमाणमात्रस्य सन्दिग्धार्थबोधकत्वं नास्ति तदा कारणदोषादिराहितस्यापौरुषयस्य वेदस्य तत्कथं स्यात् अत एवाहभाष्यकारः कारणदोषबाधकज्ञानयोरभावात्प्रदीपवाद्विस्पष्टार्थावबोधकत्वाच्च न चोदनायास्त्रिविधमप्यप्रामाण्यमित्यन्यत्रविस्तरः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्ययश्च । प्रत्ययेऽप्यस्त्यंशद्वयमाख्यातत्त्वं लिङ्त्वं च । तत्राख्यातत्वं दशलकारसाधारणं लिङ्त्वं पुनर्लिङ्मात्रे ।

इति । एतेन विध्यादेर्धर्मे प्रामाण्यं प्रथमाध्यायार्थो ध्वनितः । मानसविषयत्वाकारेण स्वर्गं सिद्धवन्निर्दिश्य तत्साधनत्वेनाज्ञातस्य यागस्यानुष्ठेयत्वं प्रतिपाद्यत इति तदर्थः । तथाचोक्तम्—फलस्योद्देश्यत्वं नाम मानसापेक्षोविषयत्वाकार इति ।

ननु यजेत स्वर्गकाम इत्यादौ साधनत्ववाचकशब्दस्याऽदर्शनात्कथं स्वर्गसाधनत्वेन वेदेन यागस्यानुष्ठेयत्वं प्रतिपाद्यत इत्याशङ्क्य प्रकृतिप्रत्यययोर्विभागपुरःसरं प्रत्ययस्यांशविवेकेन भावनाम्प्रतिपादयन् तत्सामर्थ्येन यागस्य स्वर्गसाधनत्वं दर्शयति । तथाहीत्यारभ्याथ क इत्यतःप्राक्तनेन ग्रन्थेन । यद्वा-ननु न यागादीनां स्वर्गसाधनत्वं स्वर्गस्य कालान्तरभावित्वादपूर्वमन्तरेण तन्निष्पादकत्वासम्भवात् । नच यागादीनामपूर्वनिष्पादकत्वं स्यादिति वाच्यम् । सिद्धस्यैव लोके साध्यनिष्पादकत्वदर्शनात्साध्यस्वभावस्य यागदानादिरूपस्य भावार्थस्यापूर्वनिष्पादकत्वासम्भवात् तस्मान्न यागादेः स्वर्गसाधनत्वं ततश्च न तदुद्देशेन यागादिविधिरिति चेन्न । क्रियामन्तरेण द्रव्यादिसिद्धस्यापि लोके फलविशेषसाधनत्वाऽदर्शनात् । नहि पचिक्रियामन्तरेण काष्ठस्थाल्यादीनामोदनसाधनत्वं दृश्यते (१) । माभूत्तर्हि न तावता भवदिष्टसिद्धिरिति

---

(१) तस्मात्सिद्धत्वं न करणत्वे प्रयोजकं यदि नाम सिद्धं वस्तु पुंव्यापारानपेक्षं फलमारभते सर्वदाऽऽरभेतेति साध्यस्यापि करणत्वं भवितुमर्हतीति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उभाभ्यामप्यंशाभ्यां भावनैवोच्यते । भावना नाम भवितुर्भवनानुकूलोभावयितुर्व्यापारविशेषः । सा

चेन्न । साध्यस्यापि भावार्थस्य यागादेरेकपदोपात्तत्वेन भावनाभाव्यनिर्वृत्तिद्वारेण भावनाकरणस्य स्वसाधनानिष्पादितस्य सतोऽपूर्वद्वारा भावनाभाव्यस्वर्गनिष्पादकत्वादित्यभिप्रायेण भावनां निरूपयितुं विधेर्विधायकत्वप्रकारम्प्रदर्शयितुं च प्रकृत्यादिकं विभजते । तथाहीत्यादिना । तत्रेति । आख्यातत्वलिङ्त्वयोर्मध्य इत्यर्थः । उभाभ्यामिति । आख्यातत्वलिङ्त्वाभ्यामित्यर्थः । भावनैवेत्येवकारेण कर्त्रादिवाचकत्वमाख्यातस्य वारयति । भावनासामान्यं लक्षयति । भवितुरिति । भवितुरुत्पद्यमानस्योत्पत्त्यनुकूलोभावयितुरुत्पादयितुः प्रयोजकस्य व्यापारविशेषो भावनेत्यर्थः । प्रयोजकव्यापारत्वादेव णिजन्तेन भावनाशब्देनोच्यते । यथोत्पद्यमानस्यौदनस्योत्पत्त्यनुकूलो देवदत्तस्य व्यापारविशेषो भावनेत्यर्थः । यथा चोत्पद्यमानायां देवदत्तप्रवृत्तेरुत्पत्त्यनुकूलः प्रवर्तकस्य चैत्रस्याभिप्रायविशेषः—यथा वा यजेत स्वर्गकाम इत्यत्रोत्पद्यमानस्य धात्वर्थस्य स्वर्गस्य वोत्पत्यनुकूलः स्वर्गकामस्य व्यापार उत्पद्यमानायाश्च स्वर्गकामप्रवृत्तेरुत्पत्त्यनुकूलो लिङो व्यापारविशेषः । तथाचान्योत्पादनानुकूलो भावकस्य व्यापारविशेषो धात्वर्थादन्यः सर्वधात्वर्थसम्बद्धाकारेण भासमानो भावनासामान्यमिति सिद्धम् । तथाचोक्तम्—

"अन्योत्पादानुकूलात्मा भावना साध्यरूपिणीति" ।

तथाचार्यैरप्युक्तम्—

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विधा । शाब्दी भावना आर्थी भावना चेति । तत्र पुरुषप्रवृत्त्यनुकूलोभावयितुर्व्यापारविशेषः शाब्दी भावना । सा च लिङ्त्वांशेनोच्यते । लिङ्श्रवणे ऽयं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवानितिनियमेन प्रतीतेः ।

"धात्वर्थव्यतिरेकेण यद्यप्येषा न लभ्यते ।
तथापि सर्वसामान्यरूपेणैवाऽवगम्यते" इति ।

भावनां विभजते । सा द्विधेति । तत्र शब्दभावनां लक्षयति । तत्रेति । तत्र–तयोः शब्दभावनार्थभावनयोर्मध्य इत्यर्थः । परिस्पन्दपरिणामविलक्षणः पुरुषप्रवृत्त्यात्मकार्थभावनोत्पत्त्यनुकूलो लिङादिशब्दस्य व्यापारविशेषः शब्दभावनेत्यर्थः । शब्दभावनैव लिङ्त्वादिना लिङाद्यर्थ इत्याह । सा चेति । तस्या लिङाद्यर्थत्वे ऽनुभवं प्रमाणयति । लिङ्श्रवण इति । अनुभवमाभिनयति । मादिति । यद्वा–ननु कथमननुभूयमानत्वाल्लिङादिवाच्यत्वम्भावनाया लिङादेः प्रवर्तकत्वेपि तत्र भावनारूपव्यापारस्याननुभवादित्याशङ्क्य तं व्यापारं स्पष्टतयाऽनुभावयति । मदित्यादिना । पुरुषप्रवृत्त्यनुकूलं व्यापारं लिङादिशब्दनिष्ठतयाऽनुभावयित्वा तस्य लिङादिशब्दान्नियमेन प्रतीयमानत्वाल्लिङादिशब्दवाच्यत्वमित्यनुमानप्रदर्शनाय व्याप्तिं दर्शयति । यदित्यादिना । तत्रोदाहरणमाह । यथेत्यादि । सा च शब्दभावना लोके वेदे च प्रवर्तनात्वेनैव लिङादिशब्दवाच्या तत्त्वेनैव च पुरुषप्रवृत्तिहेतुरिति स्वीकर्तव्यम् । अन्यथा प्रैषादेरनेकस्य पुरुषाशयविशेषस्य विधिवाच्यत्वानुपपत्तिः स्यात् आनन्त्यव्यभिचार-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यस्माच्छब्दान्नियमतः प्रतीयते तत्तस्य वाच्यम्—यथा गामानयेत्यस्मिन्वाक्ये गोत्वम् । स च व्या-

दोषप्रसङ्गात् । प्रवर्तनात्वञ्च प्रवृत्त्यनुकूलव्यापारत्वम् । अनुकूलत्वञ्च जनकत्वम् । तच्च लोके पुरुषाशयवृत्ति । वेदे तु पुरुषाभावात्पुरुषाशयाभिन्नस्यैव कस्य चिल्लिङादिशब्दनिष्ठव्यापारविशेषस्य प्रवर्तनात्वमित्याशयेनाह । स चेत्यादिना ।

अत्रेदम्बोध्यम्—तस्य व्यापारविशेषस्य प्रवृत्तिविषयस्येष्टसाधनत्वानुमानद्वारा प्रवृत्तिजनकत्वमङ्गीकरणीयम् । अन्यथा प्रवृत्तिविषयस्येष्टसाधनत्वानाक्षेपे प्रवृत्त्यनुपपतिः स्यात् । तथाचानुमानम्—विमतमिदमिष्टसाधनमयमत्र प्रवर्ततामित्याकारकाऽऽप्तनिष्ठव्यापारविशेषविषयत्वाद्यन्नैवं तन्नैवं यथा प्रतारकवाक्योपस्थितम् । अत्र सुखे सुखं मे जायतामित्युदासीनस्य कस्य चिदिच्छाविषयत्वेपीष्टसाधनत्वाभावात्तत्र व्यभिचारव्यावृत्तये हेतावाकारकान्तम् । प्रतारकस्य तादृशेच्छाविषये व्यभिचारवारणायाप्तेति । आप्तत्वञ्च लोकवेदसाधारणं प्रतारणाद्यजन्यहिताहितोपदेशकर्तृत्वे सति तद्भिन्नोपदेशाकर्तृत्वम् । प्रतारणया सर्वदा हिताहितोपदेशकर्त्र्यनाप्तेऽतिप्रसङ्गवारणायाजन्यान्तम् । कदाचित्प्रतारणाद्यजन्यतत्कर्तरि तद्दोषवारणायोत्तरदलम् । हितस्योपदेशस्तत्सङ्ग्रहायाहितस्योपदेशश्च तत्परिहाराय बोध्यः । ततश्च तत्कर्तृत्वं लोके पुरुषविशेषे । वेदे च यजेत स्वर्गकामो न कलञ्जम्भक्षयेदित्यादिवाक्ये भवति । तथाच लौकिकवैदिकव्यापारयोर्व्यापारविशेषत्वेन सङ्ग्रहाय हेतौ विशेषपदम् । वैदिकश्च स व्यापारविशेषः प्रवर्तनाप्रेरणाविध्यपरपर्याया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पारविशेषोलौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः, वैदिकवाक्ये तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव । अत एव शाब्दी भावनेति व्यवह्रियते ।

भावनैव नञ्रहिते–वाक्ये लिङाद्यर्थः । लौकिकस्तु प्रैषोऽतिसर्गः प्रेरणाऽऽज्ञा याञ्चाऽध्येषणाऽनुज्ञाऽनुमतिरित्यादि बहुविधो भवति । प्रमाणान्तरप्रमितेऽर्थे पुरुषनिष्ठा पुरुषप्रवर्तना प्रैषः । अतिसर्गः कामचारः । उत्कृष्टस्य निकृष्टम्प्रति प्रवर्तना प्रेषणाऽऽज्ञा चोच्यते । निकृष्टस्योत्कृष्टम्प्रति प्रवर्तना याञ्चाऽध्येषणा चोच्यते । समम्प्रति समस्य प्रवर्तनोत्कर्षनिकर्षौदासीन्येन जाताऽनुज्ञाऽनुमतिश्चोच्यते । ते च प्रैषादयो ज्ञानविशेषा इच्छाविशेषा वा चेतनधर्माः पुरुषस्याशयविशेषा एवेत्यभिप्रायेण ग्रन्थकारेणाप्युक्तम् लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेष इति।तथाच त एव लोके लिङाद्यर्थः। तस्माल्लोके वेदे च व्यापार एव प्रवर्तनाख्यो लिङादिवाच्योऽर्थ इति फलितम् ।

ननु किमत्र वाच्यताख्यशक्यतावच्छेदकं शक्ततावच्छेदकञ्च अन्यथाऽतिप्रसङ्गापत्तेरितिचेत् । अत्रोच्यते–लौकिके हि प्रैषादौ वैदिके च भावनारूपे व्यापारे साधारणं व्यापारत्वमेव पूर्वोक्तप्रवर्तनात्वरूपं शक्यतावच्छेदकमस्ति च लौकिके लिङादिपदोपस्थाप्ये प्रवृत्तिहेतुभूतेष्टसाधनताद्यनुमितिजनके पुरुषाशयविशेषे प्रवृत्तिप्रयोजकव्यापारत्वं, वेदेपि लिङादिशब्दश्रवणात्तदुत्तरकाले यागादिप्रवृतिदर्शनेनेयं देवदत्तस्य यागादिप्रवृत्तिः व्यापाराख्यप्रवर्तनाज्ञानपूर्विका

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यप्रेरितप्रवृत्तित्वाच्चैत्राशयज्ञानजन्यमैत्रगवानयनप्रवृत्तिवदि-त्यलौकिकमेव व्यापारमपौरुषेये वेदे इच्छादेर्बाधादनुमाय तत्प्रतीतेर्लिङादिज्ञानान्वयव्यतिरेकानुविधायित्वं तत्र लिङा-दिवाच्यत्वञ्च परिकल्प्य तस्य पूर्वोक्तविधया प्रवृत्तिहेतुभूते-ष्टसाधनताद्यनुमापकतया बालस्तत्रापि प्रवृत्तिप्रयोजकव्यापा-रत्वम्प्रतिपद्यते । कथन्तर्हि लोकेपि व्यापारप्रतिपत्तिरिति चेदित्थम्—उत्तमवृद्धस्य सविधिकवाक्यश्रवणोत्तरकालभाविनीं मध्यमवृद्धस्य गवानयनप्रवृत्तिमुपलभ्य बालो लोकेपि त-त्प्रयोजकव्यापारमनुमिमीते । तथाहि—गवानयनानुकूलोत्त-मवृद्धवाक्यश्रवणोत्तरभाविनी मध्यमवृद्धप्रवृत्तिः—प्रवर्तनाज्ञा-नपूर्विका अन्यप्रेरितप्रवृत्तित्वान्मद्रोदनपूर्वकमदीयभोजनादौ मदभिप्रायजन्यमन्मातृप्रवृत्तिवत् । अत्र स्वतःसिद्धप्रवृत्ताविष्ट-साधनताज्ञानजन्यस्वप्रवृत्तौ च व्यभिचारवारणायान्यप्रेरितेति विशेषणम् । किञ्च प्रवर्तनाज्ञानं उत्तमवृद्धवाक्यजन्यं । तदन्वयव्यतिरेकानुविधायित्वाद्दण्डान्वयव्यतिरेकानुविधायिघट-वत् । किञ्च यस्माच्छब्दाद्यत्प्रतीयते तत्तद्वाच्यं घटपदवाच्यघ-टत्ववदित्युत्तमवृद्धवाक्यस्य मुग्धाकारां शक्तिं व्यापाराख्यप्र-वर्तनायामवधार्य तत्रचावापोद्वापाभ्यां विधिशक्तिं तस्याम-वधारयति । एवं सर्वत्रोह्यम् । तस्माल्लोकवेदसाधारण्येन व्यापारत्वमेव शक्यतावच्छेदकमिति सिद्धम् । शक्तताव-च्छेदकं तु लिङ्त्वलेट्त्वलोट्त्वादिकम्बोध्यम् । किञ्च यद्यपि निरुक्तविधया व्यापारत्वेनैव सामान्यरूपेण व्यापारज्ञानं तच्च विशेषज्ञानसापेक्षमतिप्रसङ्गवारणाय, तथापि प्रमाणविशेषबोधः सुलभः, यथा घटवद्भूतलमित्यादौ घटपदाद्घटत्वावच्छि-न्नघटमात्रप्रतीतावपि तस्य योग्यसंसर्गेण भूतलादावन्वये बुद्धे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्संसर्गस्य तत्त्वेन जिज्ञासायाम्प्रत्यक्षादिप्रमाणान्तरेणैव संयोगत्वादिना संयोगादिरूपसंसर्गप्रतीतिर्भूतलवृत्तिघटविशेषप्रतीतिश्च भवति—तथा लिङादिपदाद्व्यापारत्वावच्छिन्नव्यापारमात्रस्योपस्थितावपि तस्याख्यातोपात्तार्थभावनाया योग्यसंसर्गेणान्वये बुद्धे पश्चात्तत्संसर्गस्य तत्त्वेन जिज्ञासायाम्प्रवृत्तिप्रयोजकत्वानुपपत्त्यादिना प्रमाणेनैव विशेषरूपेण संसर्गविशेषप्रतीतिर्यागादिप्रवृत्तिसम्बन्धिव्यापारविशेषप्रतीतिश्च भवति । संसर्गविशेषस्तु तत्तत्प्रवृत्तिप्रागभावकाले यल्लिङादिपदज्ञानन्तेनोत्पादितं यत्प्रेरणाज्ञानं तज्जन्येष्टसाधनताद्यनुमितिप्रयोज्यत्वं—तेन च व्यापारवती यागादिप्रवृत्तिरिति भवति विशेषनिर्णयः । एवं च लोके वेदे च लिङादिश्रवणे प्रैषादिरूपस्य वक्त्रभिप्रायस्य भावनारूपस्य च व्यापारविशेषस्य व्यापारत्वेनैव रूपेण प्रतीतिर्न विशेषरूपेण, तथैव शक्तिग्रहात् । विशेषरूपेण प्रतीतिस्तु लोकेऽजहल्लक्षणयैव । वेदे तु विशेषरूपाकाङ्क्षायाम्प्रैषादिरूपस्य वक्त्राशयविशेषस्यापौरुषेये वेदेऽसम्भवेन लिङादिशब्दनिष्ठ एव प्रेरणापरपर्यायः कश्चिद्व्यापारो विशेषरूप इत्युक्तमेव । तस्मान्निरुक्तव्यापार एव लिङाद्यर्थोनेष्टसाधनत्वादिरिति सिद्धम् ।

नन्विष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण वेदे लिङाद्यर्थ इति मण्डनमिश्रा वदन्ति । अर्थभावनाभिधानानुकूलाया लिङादिनिष्ठशक्तेरेवाभिधाख्यायाः प्रवर्तनात्वेन रूपेण लिङादिवाच्यत्वं परिकल्प्य तज्ज्ञानस्य प्रवृत्तिम्प्रति कारणत्वमात्रं वेदे कल्प्यते इति तु पार्थसारथिर्वदति । लिङादिश्रवणानन्तरम्प्रवृत्तिदर्शनात्प्रवृत्तिसामग्रीजननद्वारा लिङादिज्ञानस्य प्रवृत्तावुपयोग इति तावदविवादम् । तत्सामग्री च कृतिसाध्य-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वप्रकारकेच्छारूपा चिकीर्षा, तस्याश्च स्वरूपसत्याः कारणत्वात्तत्र लिङादिज्ञानस्यानुपयोगेपि चिकीर्षाकारणीभूतज्ञाने तदुपयोगः कल्प्यते । तच्च बलवदनिष्टाननुबन्धित्वज्ञानं कृतिसाध्यत्वज्ञानमिष्टसाधनत्वज्ञानञ्च, अन्यतमाभावे इतरद्वयसत्वेपि मधुविषान्नभोजने चन्द्रस्पर्शे मण्डलीकरणादौ वा प्रवृत्त्यनुत्पत्तेः, तस्माल्लिङादिज्ञानेन त्रितयज्ञानजननाल्लिङादेर्बलवदनिष्टाननुबन्धित्वे कृतिसाध्यत्वे इष्टसाधनत्वे च शक्तिरिति तार्किकाः । तस्मात्कथं व्यापारस्य लोकवेदसाधारणस्य लिङाद्यर्थत्वमिति चेत् । अत्रोच्यते । न तावदिष्टसाधनत्वं लिङाद्यर्थ इष्टसाधनत्वज्ञानादेव प्रवृत्त्युपपत्तौ गुरुप्रेरितोहं जलमानयामीत्यादौ गुर्वादेः प्रवर्तकत्वव्यवहारानुपपत्तेः । न च प्रवृत्तिजनकेष्टसाधनताबोधकलिङुच्चारयितृत्वात्तस्य प्रवर्तकत्वव्यवहार इति वाच्यम् । राजप्रेरितपदातेस्तादृशलिङुच्चारयितृत्वेन प्रवर्तकत्वापत्तौ पदातिप्रेरितोहं न गामानयामि किन्तु राजप्रेरित इति पदातौ प्रवर्तकत्वाभावव्यवहारानुपपत्तेः । नचान्याप्रेरितत्वे सति तादृशलिङुच्चारयितृत्वं प्रवर्तकत्वमिति वाच्यम् । पिशुनप्रेरिते राज्ञि प्रवर्तकत्वानुपपत्तेः । ततश्च तादृशव्यवहारबलात्प्रवृत्तिकारणीभूतज्ञानाविषयाशयविशेषाश्रयत्वेनैव राजादेः प्रवर्तकत्वं वाच्यम् । नचाशयविशेषस्य लिङादिवाच्यत्वाभावे ततस्तज्ज्ञानं सम्भवति । तस्माल्लिङादिवाच्यत्वन्तस्येति । नाप्यर्थभावनाभिधानानुकूलाया शक्तेर्लिङाद्यर्थत्वं सङ्ख्याभिधानानुकूलशक्त्या लिङ्त्वादिनैव वा विनिगमनाविरहात् । नापि बलवदनिष्टाननुबन्धित्वादेर्लिङाद्यर्थत्वं शक्तित्रयकल्पनायाङ्गौरवप्रसङ्गात् । बलवदनिष्टाननुबन्धित्वज्ञानाभावेपि बलवदनिष्टानुबन्धि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सा च भावनांशत्रयमपेक्षते । साध्यं साधनमितिकर्तव्यताञ्च । किम्भावयेत्केनभावयेत्कथं भावयेदिति । तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थीभावना साध्यत्वेनान्वेति । एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः ।

त्वज्ञानाभावमात्रेणेष्टसाधनत्वज्ञानादिनैव प्रवृत्तेरनुभवसिद्धत्वाच्च । तस्माद्बलवदनिष्टानुबन्धित्वज्ञानम्प्रवृत्तिप्रतिबन्धकन्तदभावश्च स्वरूपसन्नेव तत्कारणमिति स्वीकर्त्तव्यम् । तस्मान्निरुक्तस्य व्यापारस्यैव लिङाद्यर्थत्वं सर्वत्र नेष्टसाधनत्वादेरिति सिद्धम् ।

"अभिधाभावनामाहुरन्यामेव लिङादय"इति वार्तिकानुरोधेनाह । अत एवेति । शब्दनिष्ठत्वादेवेत्यर्थः । अभिधाशब्देनाभिधीयतेऽनेनेति व्युत्पत्या शब्द उच्यते । तस्य व्यापारविशेषोभावना तां स्वनिष्ठामर्थभावनाभिन्नां लिङादय आहुरिति वार्तिकवचनार्थः । सा च निरुक्ता शब्दभावना साध्याद्यंशत्रयापेक्षया तादृशांशत्रयवती भवतीत्याह । सा चेत्यादिना । साध्याकाङ्क्षामभिनयति । किमित्यादिना । तत्रेति । साध्यादिभावनांशेपीत्यर्थः । वक्ष्यमाणेति । वक्ष्यमाणं यत् स्वर्गादिरूपसाध्याद्यंशत्रयं तेनोपेतेत्यर्थः । एकप्रत्ययगम्यत्वेनेति । समानाभिधानश्रुतेः प्रमाणादर्थभावनाया एव शब्दभावनासाध्यत्वमनयोरेकलिङादिप्रत्ययगम्यत्वेनैकलिङादिप्रत्ययशब्दात्मिकायाः समानाभिधानश्रुतेः सत्त्वादित्यर्थः । एतेन यागादेः साध्यत्वाशङ्का निरस्ता तस्यैकपदादिश्रुतिगम्य-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संख्यादीनामेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न सा-

त्वेनैकप्रत्ययरूपसमानाभिधानश्रुत्यगम्यत्वात् । शब्दार्थभावनयोस्त्वेकाभिधानश्रुतिगम्यत्वेन सन्निकृष्टयोर्भवति विवक्षितः सम्बन्ध इति द्रष्टव्यम् । ननु सङ्ख्यादीनामपि शब्दभावनाभाव्यत्वं स्यात्तेषामप्येकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेरविशेषादितिचोद्यमुद्भाव्य परिहरति । सङ्ख्यादीनामित्यादिना । आदिना कालादिपरिग्रहः । सङ्ख्यादीनां साध्यत्वेनान्वयाभावे हेतुमाह । अयोग्यत्वादिति । अपुरुषार्थत्वेन तत्साधनताशून्यत्वेन च सङ्ख्यादीनां साध्यत्वयोग्यतानाश्रयत्वादित्यर्थः । शब्दभावनाया भाव्यसाकाङ्क्षत्वाद्भाव्यान्तरस्य चादर्शनादर्थभावनायाश्च विधिप्रयोज्यत्वात्पुरुषार्थानुबन्धित्वाच्च तस्या एव समानाभिधानश्रुतेः—शब्दभावनाभाव्यत्वमिति समुदायतात्पर्यम् । तदेवमर्थभावनायाः पुरुषार्थहेतुततया शब्दभावनाभाव्यत्वमुक्तं तत्र च करणाकाङ्क्षायां करणान्तरस्यादर्शनात्करणांशं लिङादिविधिशब्दज्ञानमेवाह । साधनेत्यादिना । यद्वा लिङादिशब्दव्यापारस्य सर्वदा पुरुषप्रवृत्तिजनकत्वं किं नस्यादित्याशङ्क्य करणरूपसहकार्यभावान्नैवमित्याशयेनाह । साधनेत्यादिना । अत एव ग्रन्थकारेणाप्युक्तं भावनाज्ञापकत्वेनेति । स्वज्ञानस्यैव स्वज्ञापकत्वम् । लिङादीत्यादिना लेट्लोडादिपरिग्रहः । तथा च लिङादिज्ञानं शब्दभावनायां करणत्वेनैवान्वयं लभते नतु शब्दभावनात्वेनापि कल्पनायां गौरवप्रसङ्गात् । ज्ञानस्य पुरुषनिष्ठत्वेन शब्दनिष्ठत्वाभावाच्छब्दभावनात्वासम्भवप्रसङ्गा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्यत्वेनान्वयः । साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति । तस्य च करणत्वं न भावनोत्पादकत्वेन तत्पूर्वमपि तस्याः शब्दे सत्वात् ।

ज्ज्ञानस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेन शब्दभावनाया नित्यत्वव्याघातप्रसङ्गाच्च । शब्दभावना तु निरुक्त एव व्यापारविशेष इति भावः । लिङादिज्ञानमित्यत्र लिङादिधर्मस्य भावनारूपस्य वा ज्ञानं विवक्षितम् । तदेव च शब्दभावनायाः करणांशः । तथाचोक्तम्—लिङादिशब्दव्यापारः पुरुषप्रवृत्तिलक्षणार्थभावनालक्षणभाव्यनिष्ठः—स्वज्ञानकरणक इतिद्रष्टव्यम् । ज्ञापकत्वमत्र प्रकाशकत्वमेव । तथाच तादृशधर्मज्ञाने सत्येव पुरुषप्रवृत्तिदर्शनेन तस्य वक्ष्यमाणपुरुषप्रवृत्तिनिर्वर्तकत्वेन शब्दभावनाकरणत्वं नानुपपन्नमिति भावः ।

अन्येत्वाहुः—विधिशब्दस्य पुरुषप्रवृत्तिरूपार्थभावनाज्ञानहेतुर्व्यापारस्तद्वाचकशक्तिमत्तया विधिशब्दज्ञानं स एव च तस्य प्रवृत्तिहेतुर्व्यापार इति प्रवर्तनाभिधानीयकं लभते ज्ञानद्वारेणैव शब्दस्य प्रवृत्तिजनकत्वात् । ज्ञानजनकव्यापारातिरिक्तव्यापारकल्पने मानाभावात् । ज्ञानजनकश्च व्यापारस्तस्य स्वज्ञानं शक्तिज्ञानं शक्तिविशिष्टस्वज्ञानञ्च तत्राद्ययोरन्यतरस्य शब्दभावनात्वं तृतीयस्य तु तत्र करणत्वमिति विवेक इति ।

तस्य च लिङादिज्ञानस्य शब्दभावनोत्पादकत्वेन तत्करणत्वं न सम्भवति तस्माल्लिङादिज्ञानात्पूर्वमपि तस्याः शब्दभावनायाः शब्दे विद्यमानत्वेन तदुत्पादकत्वासम्भवादित्याह । तस्य चेत्यादिना । ननु कथं लिङादिज्ञानस्य भाव-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्तु भावनाज्ञापकत्वेन शब्दभावनाभाव्य-निर्वर्तकत्वेन वा। इतिकर्तव्यताकाङ्क्षायामर्थवाद-ज्ञाप्यप्राशस्त्यमिति कर्तव्यतात्वेनान्वेति ।

नासाधकत्वेन तत्करणत्वं न स्वीक्रियते—चक्षुरादेस्तत्सन्निकर्षस्य वा रूपादिज्ञानसाधकत्वेनैव तत्करणत्वदर्शनादिति चोदयति । किन्त्विति । समाधत्ते । भावनेत्यादिना । यथा कुठारस्य छिदिक्रियाभाव्यद्वैधीभावानिर्वर्तकत्वेन छिदिभावनाकरणत्वन्तथा लिङादिज्ञानस्य शब्दभावनाभाव्यार्थभावनानिर्वर्तकत्वेन शब्दभावनाकरणत्वमिति भावः । तथाचोक्तं कुठारादीनामपि छिदिक्रियाभाव्यद्वैधीभावनिर्वर्त्तनद्वारेण छिदिभावनाकरणत्वप्रदर्शनादिति । किञ्च रूपादिज्ञानस्य चक्षुःसन्निकर्षादेः प्रागसत्वेन तस्य तत्साधकत्वेन तत्करणत्वं शब्दभावनायास्तु प्रागपि सत्वेन लिङादिज्ञानस्य तत्साधकत्वेन तत्करणत्वासम्भवेपि तद्भाव्यार्थभावनानिर्वर्तकत्वेन तस्य शब्दभावनाकरणत्वं कुठारवदुपपद्यते । ननु कुठारस्य छिदिक्रियानिर्वर्तकत्वमपि भवतीतिचेत्सत्यम् । दृष्टान्तस्तु यथा कुठारस्य छेदनानिर्वर्त्तकत्वेपि तस्याफलत्वेन छिदिक्रियाभाव्यद्वैधीभावफलनिर्वर्तकत्वेन तत्करणत्वमिति द्रष्टव्यः । ननु पुरुषो लिङादिज्ञानेन स्वप्रवृत्तिम्भावयेदित्युक्ते सर्वेषामेव यागादौ प्रवृत्तिः किं न स्यादित्याशङ्क्य सर्वेषां प्राशस्त्यज्ञानाभावेन न सर्वेषां प्रवृत्त्यापत्तिः, किन्तु यस्य पुरुषस्य कर्मप्राशस्त्यज्ञानम्भवति तस्यैव तत्फलरागादिना तत्र प्रवृत्ति रित्याशयेनाह । इतिकर्तव्यतेत्यादिना। कर्तव्यस्येति प्रकार इतिकर्तव्यता । इतिशब्दस्य प्रकारवाचकत्वात् । प्रकारश्च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी-

सामान्यस्य भेदको विशेष इत्यर्थः । तथाच कर्तव्यसामान्यस्य भेदकः कर्तव्यविशेष एव प्राशस्त्यरूपः शब्दभावनायामिति-कर्तव्यतात्वेनान्वयं लभते तच्च कर्तव्यसामान्यं लिङादिज्ञान-रूपं भावनाकरणमेव करणगतप्रकाराकाङ्क्षापूरकस्येतिकर्तव्य-तात्वात् । लिङादिज्ञानेन भावयेत्कथमित्याकाङ्क्षायां कर्मप्रा-शस्त्यविशिष्टेनेतिप्रकारान्वयात् । तस्य च प्राशस्त्यविशेषस्य ज्ञापकोर्थवादविशेष एवेति भावः । सचार्थवादः "स प्रजापति-रात्मनोवपामुदक्खिदद्" दित्यादिः । तं चार्थवादं चतुर्विध-विभागेन निरूपयिष्यामोऽर्थवादानिर्णये ।

ननु किं नाम प्राशस्त्यं यच्छब्दभावनायामिति-कर्तव्यतात्वेनान्वेतीतिचेत् । विधेयतावच्छेदकसामानाधिक-रण्येन बलवदनिष्टानुबन्धित्वे सति क्रियाजन्यदुःखा-पेक्षयाऽधिकेष्टजनकत्वं प्राशस्त्यं तदेव च विध्यर्थ-वादेषु लक्ष्यते । निषेधार्थवादेषु तु निषेध्यतावच्छेदक-सामानाधिकरण्येन क्रियाफलापेक्षयाऽधिकदुःखसाधनत्वम-प्राशस्त्यं लक्ष्यत इति बोध्यम् । लक्षणा च सर्वत्र, वाक्ये लक्षणायां बाधकाभावादर्थवादस्थपदसमुदाये वैकस्मिन्नेव वा पदे भवतीतरपदानि तात्पर्यग्राहकाणीत्यनाग्रहः । तच्च प्रा-शस्त्यादिकमितिकर्तव्यतात्वसम्बन्धेन शब्दभावनायामन्वेती-ति बहवो वदन्ति । स्वरूपसम्बन्धेन धात्वर्थादावेवान्वेती-ति केचित् । वस्तुतस्तु प्राशस्त्यं स्वविषयकज्ञानजन्येष्टवि-षयकोत्कटरागजन्यत्वसम्बन्धेन प्रवृत्तावन्वेति । अप्राश-स्त्यमपि स्वविषयकज्ञानजन्यानिष्टविषयकोत्कटद्वेषप्रयोज्या-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावप्रतियोगित्वसम्बन्धेन प्रवृत्तावेवान्वेतीत्यन्यत्र विस्तरः। इत्थंच पुरुषप्रवृत्तिलक्षणार्थभावनाभाव्यको लिङादिज्ञानकरणकः स्वज्ञानकरणको वा स्तुतिनिन्दार्थवादबोधितप्राशस्त्यादीतिकर्तव्यताको लिङादिशब्दस्य व्यापारविशेषः शब्दभावना लिङादिशब्देन लिङ्त्वांशेनोच्यते। तत्र चार्थवादबोधितप्राशस्त्यादिनोपकारं सम्पाद्य लिङादिज्ञानेन पुरुषप्रवृत्तिलक्षणामर्थभावनां भावयेद्यागविषयप्रवृत्तिलक्षणां कुर्यादिति फलितम् । अर्थभावनां लक्षयति । प्रयोजनेच्छेत्यादिना । प्रयोजनस्य स्वर्गादिरूपफलस्य येच्छा रागविशेषः—फलेच्छा साधनमुपसङ्क्रामतीति न्यायात्तेन च रागविशेषेण जनितो यो यागादिक्रियाविषयः पुरुषस्य व्यापारविशेषः साऽर्थभावनेत्यर्थः।

ननु कोऽयं व्यापारो नाम योऽर्थभावनात्वेनोच्यते न तावत्प्रयत्नमात्रं रथोगच्छतीत्यत्राव्याप्त्यापत्तेः। स्पन्द इति चेत्? देवदत्तो ग्रामं गच्छति स्वर्गकामो यागेन स्वर्गं कुर्यादित्यादौ गमनाद्यनुकूलकृतावव्याप्तेः कृतेश्चेतनधर्मत्वेन तत्र स्पन्दत्वाभावात् गच्छतीत्यादौ गमनं करोतीति करोतिप्रयोगदर्शनात्, स्पन्दत इति स्पादिप्रयोगादर्शनाच्चेति चेत्केचिदत्राहुः। स्वर्गादिफलेच्छाजनितो यागादिक्रियाविषयः प्रयत्न एव, स व्यापारोऽर्थभावनात्वेनोच्यते । नच रथोगच्छतीत्यत्राव्याप्त्यापत्तिः, रथवोढॄणामश्वानां प्रयत्नं रथे समारोप्य रथोगच्छतीति प्रयोगोपपत्तेः। येषां मतेऽन्योत्पादनानुकूलव्यापारसामान्यमेवार्थभावना तेषामपि रथे गमनव्यतिरिक्तस्य व्यापारविशेषस्यानुपलब्धे रथोगच्छतीति प्रयोगस्यौपचारिकत्वमन्तरेणानिर्वाहात्तस्य तत्त्वं स्वीकर्तव्यम् । सच प्रयत्न आ-

५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख्यातसामान्येन कथ्यते यजेत पचति गच्छतीत्याद्याख्यातश्रवणे प्रयत्नप्रतीतेः । यागेन कुर्यात्पाकं करोति गमनं करोतीति प्रयत्नार्थककरोतिनाऽऽख्यातस्य विवरणदर्शनात्प्रयत्न एवाख्यातसामान्यस्यार्थो न स्पन्दादिः, प्रयत्नपूर्वकगमनादिकर्तरि गमनं करोति पाकं करोतीति प्रयत्नार्थककरोतिप्रयोगदर्शनात् । वायुवेगादिना स्पन्दमाने त्वयं वायुवेगादिना स्पन्दते न किञ्चित्करोतीति तत्प्रतिषेधदर्शनाच्चेति।

अन्ये त्वाचार्या आहुः । अन्योत्पादनानुकूलात्मा स व्यापारो योऽर्थभावनात्वेनोच्यते यस्मिन् व्यापारे कृते करणस्य फलोत्पादनसामर्थ्यम्भवति तादृशो व्यापार इतियावत् । स एव च व्यापार आख्यातसामान्यस्यार्थः । यजेत स्वर्गकाम इत्याख्यातश्रवणे हि यागेन तथा व्याप्रियेत यस्मिन्व्यापारे कृते यागः स्वर्गजननसमर्थो भवतीति भवति बोधः । कुठारेण छिन्द्यादिति कुठारेण तथा व्याप्रियेत यस्मिन्व्यापारे कृते कुठारश्च्छेदनसमर्थो भवतीतिवत् । स च व्यापारोऽन्योत्पादनानुकूलत्वेन सामान्येन रूपेणाऽऽख्यातादेवावगम्यते, पश्चात्तु कथम्भावाकाङ्क्षायां विशेषरूपेण क्वचिदुद्यमननिपतनादिरूपेण क्वचित्त्वग्न्यन्वाधानादिब्राह्मणतर्पणान्तप्रवृत्तिरूपेण चावगम्यते(१) । नच रथो ग्रामङ्गच्छतीत्यत्रा-

(१) यद्यपि धात्वर्थातिरिक्ता भावना न प्रतीयते तथापि धात्वर्थानामेव द्वेरूपे पाको यागः प्रयत्नः सङ्कल्पश्चलनं क्लेदनमभिध्यानं छेदनमिति प्रातिस्विकमेकमक्रियात्मकं सिद्धस्वभाव, मपरं तु सर्वधात्वर्थानुयायिकरोतिप्रत्ययवेद्यं क्रियात्मकं साध्यस्वभावमन्योत्पादानुकूलात्मकमाख्याताभिधेयं यः स्पन्दते योयजते प्रयतते चलति अभिदधाति ते सर्वे करोतिप्रत्ययमनुभवन्ति भिन्नेष्वपि धात्वर्थेषु, तच्च रूपमुत्पाद्यवस्त्वन्तरकर्मकमे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याप्तिरन्योत्पादनानुकूलव्यापारस्य रथे गमनव्यतिरिक्तस्याभाव प्रतीयते सर्वदा, तदेव च भावितुः प्रयोजकव्यापारो भावनेत्युच्यते तच्चाख्यातेष्ववगम्यमानत्वात्तदभावे पाकादावनवगमादाख्याताभिधेयमाश्रीयते । येऽपि प्रयत्नं भावनामाहुः ये च स्पन्दं ये चोभयं तेऽपि स्वरूपेण न तेषां भावनात्वमाहुः किन्त्वन्योत्पादानुकूलत्वेन रूपेण, तच्च रूपं सर्वधात्वर्थानामस्तीति सर्वव्याप्येव भावनारूपमङ्गीकर्तव्यं, तस्मिंश्च क्रियारूपे प्रकृत्युपात्तो यागादिः कदाचित्कर्मत्वेन सम्बध्यते पाकं करोति यागं करोतीति, कदाचित्करणत्वेन यागेन स्वर्गं करोति पाकेनौदनं इति यथाविवक्षम् । तद्यदा यागादेः कर्मत्वेन सङ्गति स्तदा तद्धेतुभूतः प्रयत्नः सङ्कल्पादिर्वा धात्वन्तरार्थोऽपि यजेतेत्यत्र पदे यागकृतिरित्येवं रूपेणाख्याताभिधेयतां भजते सङ्कल्पादिकं तु विशेषरूपं धात्वन्तराभिधेयं प्रमाणान्तरवेद्यं नाख्यातेन स्पृश्यते, यदा तु विधिवशात् करणत्वेन यागस्य सङ्गतिः कर्मत्वं तु स्वर्गादेर्दर्शपूर्णमासयागेन स्वर्गं कुर्यादिति, तदा न यागस्य हेतुभूतैव कृतिराख्यातेनोच्यते यागस्य कर्मत्वाभावात् फलस्यैव कर्मत्वा त्तत्कर्मिका कृतिराख्यातेनोच्यते यागस्तु करणमतो यदवस्थोयागः स्वर्गं सम्पादयति तदवस्थो यागो येन व्यापारेण सम्पद्यते स व्यापारः स्वर्गकृतिरित्येवं रूपेणाख्याताभिधेयो भवति । तस्यापि व्यापारस्य विशेषरूपं प्रमाणान्तरवेद्यं नाख्यातेन स्पृश्यते यागेन स्वर्गं कुर्यादित्यनेन ह्येतावदवगम्यते यथा यागात्स्वर्गोभवति तथा व्याप्रियेतेति । तत्र कथं व्यापरितव्यं कोऽसौ व्यापार इति व्यापारविशेषात्मकथम्भावाकाङ्क्षायामुपकारसम्पादनं शास्त्रान्तरैरवगम्यते यागस्वरूपस्य च सम्पादनमर्थापत्त्या नह्यनिष्पादितस्य करणत्वमुपपद्यते तेन स्वरूपसम्पादनं प्रयाजादिभिश्चोपकारसम्पादनमिति सकलोऽयं व्यापारः स्वर्गकृतिरित्यनेनाकारेणाख्यातेनाभिधीयते विशेषरूपं च प्रयाजादिशास्त्रान्तरावगम्यं तेन सकलोऽयं प्रयाजादिव्यापारः फलभावनाया एव प्रपञ्चः तेन च व्यापारेण फलसाधनात्मना सम्पद्यमानो यागः करण, मेतदेव करणानां करणत्वं यदुत फलोद्देशप्रवृत्तकर्तृव्यापारेण फलसाधनात्मना सम्पत्तिः, तत्सिद्धा धात्वर्थातिरिक्ता भावना ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वादिति वाच्यम् । रथस्तथा गमने व्याप्रियते यस्मिन्व्यापारे कृते गमनेन ग्रामप्राप्तिर्भवतीति प्रतीतेः । कोऽसौ व्यापार इत्याकाङ्क्षायां पूर्वोत्तरावान्तरदेशविभजनसंयोजनरूप इति पश्चादवगम्यते । उद्यम्य निपात्य कुठारेण छिनत्तीतिवत्पूर्वप्रदेशेन विभज्योत्तरप्रदेशेन च संयोगं लब्ध्वा रथो ग्रामङ्गच्छतीति प्रत्ययात् । नचात्र गमनमात्रमाख्यातार्थ इति वाच्यम् । अनन्यलभ्यो हि शब्दार्थ इति न्यायात्तस्य धातुलभ्यत्वेनाख्यातार्थत्वायोगात् । एवं चैत्रः प्रयतत इत्यत्रापि चैत्रस्तथा व्याप्रियते यथा प्रयत्नो भवतीति प्रयत्नानुकूलव्यापार एवाख्यातस्यार्थो नतु प्रयत्न एव, प्रयत्नस्य धातुमात्रलभ्यत्वात् । कोऽसौ व्यापार इत्याकाङ्क्षायां पश्चाज्ज्ञानेच्छादिकमवगम्यते । नच रथोगच्छतीत्यादिप्रयोगस्यौपचारिकत्वं स्यादिति वाच्यम् । मुख्ये सम्भवत्यौचारिकत्वस्यान्याय्यत्वात् । नच गच्छति गमनङ्करोति पचति पाकङ्करोतीति प्रयत्नार्थककरोतिना ऽऽख्यातस्य समानार्थकत्वदर्शनात्प्रयत्न एवाख्यातस्यार्थ इति वाच्यम् । चैत्रः प्रयतत इत्यादौ व्यभिचारेण प्रयत्नस्याऽऽख्यातार्थत्वासम्भवात् । औपचारिकत्वस्य निरस्तत्वाच्च । करोत्यर्थोपि व्यापारविशेष एव नतु प्रयत्नः चैत्रो गच्छतीति चेतनाचेतनकर्तृकाख्यातसमानार्थकस्य करोतेः प्रयत्नार्थकत्वासम्भवात् । तस्मादन्योत्पादनानुकूलव्यापार एवाख्यातसामान्यस्यार्थ इति सिद्धमिति ।

ननु प्रयोजनेच्छाजनितक्रियाविषयव्यापार इति मूलग्रन्थे स्वर्गादिप्रयोजनेच्छाजनितस्य यागादिविषयकव्यापारस्य प्रयत्नत्वमेव कल्प्यते चेतनव्यापारत्वात्—ततश्च प्रयत्न एवाख्यातार्थ इति चेत्सत्यम् । तथापि न सर्वत्र प्रयत्नार्थकत्वमा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख्यातस्य सम्भवति । रथो गच्छतीत्यादौ व्यभिचारस्य दर्शितत्वात् । तत्र यागादिविषयकपुरुषप्रयत्नादेरपि कृतिशब्दाभिधेयस्यान्योत्पादनानुकूलव्यापारत्वेनैव सामान्याकारेणाख्यातार्थत्वन्नतु विशेषरूपेण । विशेषरूपेण तु पश्चादवगमो भवति कोसौ व्यापार इति वीक्षायाम् । तस्मात्सर्वत्रान्योत्पादनानुकूलव्यापारसामान्यमेवाख्यातार्थ इतिसिद्धम् ।

किञ्च यागादिकरणेन धात्वर्थेन स्वसाधनद्रव्यादिनिष्पादितेन स्वर्गादिफलोत्पत्तौ येयमनुकूलव्यापारस्वरूपा कृतिशब्दाभिधेया फलोत्पादनाऽऽर्थीभावना सेयन्न यज्यादिधातूनामन्यतमेन केनचिदप्यभिधीयते सर्वधात्वर्थानुगतरूपत्वात् । नापि धात्वर्थसामान्यमेव सा, प्रतिधात्वर्थं विलक्षणत्वात् । तथाहि स्वर्गकामो यजेतेत्यत्र यागेन स्वर्गम्भावयेदिति बोधः । तत्र च यागविषयकव्यापारस्य स्वर्गम्प्रति विलक्षणमानुकूल्यं भवति । ओदनकामः पचेदित्यत्र च पाकेनौदनं भावयेदिति बोधः पाकव्यापारस्य चौदनम्प्रति विलक्षणमेवानुकूल्यम् । नैरोग्यकामोभेषजपानं कुर्यादित्यत्र भेषजपानेन नैरोग्यं कुर्यादिति बोधः भेषजपानव्यापारस्य च नैरोग्यम्प्रति विलक्षणमेव चानुकूल्यम्भवति । तथाच विलक्षणानुकूल्यविशिष्टस्य व्यापारविशेषस्य प्रतिधात्वर्थं विलक्षणरूपत्वमेव अन्यथाफलविभागानुपपत्तिः स्यात् । (१)ततश्च भावनात्वसा-

(१) अयं चापरो विशेषः यतोधातोर्यज्यादिकात्प्रत्यय उत्पन्नस्ततो धात्वर्थान्तरं सङ्कल्पादिकं तत्कृतिरूपेण प्रत्ययेनोच्यते न यजिरेव, तत्तु कामं धात्वन्तरेणोच्यतां इह तावदेकान्ततः प्रत्ययार्थः यजिस्तु तत्र कर्म करणं वा तथा सङ्कल्पयतीत्यत्रापि सङ्कल्पादर्थान्तरमेव भावना सङ्कल्पस्तु कर्म करणं वा तेन यतोधातोः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावना । सा चाऽऽख्यातत्वांशेनोच्यत आख्यातसामान्यस्य व्यापारवाचित्वात् । साऽप्यंशत्रयमपेक्षते—साध्यं साधनमितिकर्तव्यतां च । किम्भावयेत्केन भावयेत्कथम्भावयेदिति । तत्र साध्याकाङ्क्षायां स्वर्गा-

मान्यं तु भिन्नासु भावनाव्यक्तिष्वनुवर्तता नाम, नैतावता प्रकृत्यर्थसामान्यं भावना । तस्माद्यज्यादिधात्वर्थाद्विशेषरूपात्सामान्यरूपाच्च भिन्नैवाख्यातप्रत्ययसामान्यार्थभूताऽऽर्थीभावना ततश्च सा तेनैवोच्यते इत्याशयेनाह । सा चाख्यातत्वांशेनोच्यते इति । तत्र हेतुमाह । आख्यातेत्यादिना । व्यापारवाचित्वादिति । अन्योत्पादनानुकूलव्यापारसामान्यवाचित्वादित्यर्थः । सा निरुक्तार्थी भावना व्यापारविशेषात्मिका व्यापारविशेषाणां च छिदिभावनारूपव्यापारस्य द्वैधीभावरूपफलादिसापेक्षत्ववत्फलादिसापेक्षत्वाद्भाव्याद्यंशत्रयमपेक्षत इत्याशयेनाह । साऽप्यंशत्रयमपेक्षत इति । अपेक्षामभिनयति । किं भावयेदित्यादिना । तत्रेति । साध्यादीनां भावनांशानां त्रयाणां मध्य इत्यर्थः । तस्यां च भावनायां स्वर्गादिफलमेव पुरुषविशेषणमपि साध्यत्वेनान्वेति पुरुषार्थत्वात् नतु धात्वर्थः समानपदोपात्तोऽप्यपुरुषार्थत्वात्तत्त्वेनान्वयं लभत इत्याह । स्वर्गादिफलमिति । किञ्च

प्रत्यय उत्पन्न स्तदर्थव्यतिरिक्तैव भावना तत्कर्मिका तत्करणिका वा तद्गतेन प्रत्ययेनोच्यते नतु तस्यैव रूपान्तरमिति न धात्वर्थसामान्यं भावनेत्युच्यते । धात्वन्तरेण तस्याभिधानं नानिष्टं यथा स्पन्दनस्य प्रयत्नस्य वा द्वयोर्वा भावनात्वे स्पन्दादिवाच्यत्वं, तस्मात्सिद्धं धात्वर्थातिरिक्तं भावनारूपम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिफलं साध्यत्वेनान्वेति । साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति । इति कर्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनान्वेति ॥

तस्यां पुनः फलभावनायाम्प्रत्ययवाच्यभूतायामेकपदोपात्तः प्रकृत्यर्थ एव करणत्वेनान्वेति सन्निकृष्टत्वात् नतु पदान्तरोपात्तं द्रव्यादि, विप्रकृष्टत्वात् । नच साध्यरूपस्य प्रकृत्यर्थस्य कथं फलसाधकत्वमिति वाच्यम् । द्रव्यादिस्वसाधननिष्पादितस्य साध्यस्यापि प्रकृत्यर्थस्य फलं साधयितुं शक्यत्वादित्युक्तमेवेत्याशयेनाह । यागादि करणत्वेनान्वेतीति । किञ्च कुठारेण छिनत्तीत्यादौ कथमिति कथम्भावाकाङ्क्षायामुद्यम्य निपात्येत्युद्यमननिपतनादेरितिकर्तव्यतात्वेनान्वयवद्यागेन स्वर्गम्भावयेदित्यत्रापि कथमिति कथम्भावाकाङ्क्षायामग्न्यन्वाधानप्रयाजावघातादिभिरुपकारं संपाद्येति प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनान्वयं भजत इत्याशयवानाह । इतिकर्तव्याकाङ्क्षायामित्यादिना । कथं भावाकाङ्क्षापूरकत्वमितिकर्तव्यतात्वं निरुक्तोवेतिकर्तव्यताशब्दार्थो बोध्यः । भवति च प्रयाजादिषु लक्षणसमन्वयः यागेन स्वर्गं कुर्यादिति । ततः कथमिति कथम्भावाकाङ्क्षायां प्रयाजादिभिरुपकारं सम्पाद्येति कथम्भावाकाङ्क्षापूरणात् कर्तव्यसामान्यस्य यागादिरूपस्य भेदकविशेषरूपत्वाच्च । तच्च प्रकरणप्रमाणनिरूपणावसरे प्रदर्शयिष्यामः । तथाच यजेत स्वर्गकाम इत्यत्राग्न्यन्वाधानावघातप्रयाजादिभिरुपकारं सम्पाद्य यागेन स्वर्गं भावयेत्स्वर्गं कुर्यादिति वाक्यार्थः । यथौदनकामः पचे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दित्यत्र लिङा भावनाऽभिधीयते। तत्र च किम्भावयेत्कथम्भावयेदिति भाव्याद्याकाङ्क्षायां तृणफूत्कारादिभिरुपकारं सम्पाद्य पाकेन तेजःसंयोगलक्षणेनौदनं भावयेदोदनं कुर्यादिति भाव्याद्यन्वयेन वाक्यार्थः सम्पद्यते तद्वदिति ।

ननु पूर्वं साध्यस्यापि यागादेः स्वसाधननिष्पादितस्य सतोऽपूर्वनिष्पादकत्वं सम्भवति तद्द्वारेणच विनश्वरस्याप्यचिरं स्वर्गसाधनत्वमपि तस्य सम्भवतीत्युक्तम्-तच्च यागेन कथमुत्पाद्यते ?, तत्र वक्तव्यं-यागेन स्वर्गं कुर्यादितितावत्फलवाक्येन यागस्य फलसाधनत्वं बोध्यते, तत्र च कथं विनश्वरेण स्वर्गः कर्तव्यस्तस्य कालान्तरभावित्वादित्याकाङ्क्षायामपूर्वं निष्पाद्येत्युच्यते, पुनः कथमपूर्वन्निष्पादनीयमित्याकाङ्क्षायां प्राच्योदीच्याङ्गविशिष्टस्य यागस्यानुष्ठानप्रकारेणेत्युच्यते । तच्चापूर्वन्दर्शपूर्णमासयोरनेकविधम्—फलापूर्वं समुदायापूर्वमुत्पत्त्यपूर्वमङ्गापूर्वं चेति । तत्र येन स्वर्गः क्रियते तत्फलापूर्वमित्युच्यते फलजनकत्वात् । तच्च समुदायापूर्वेण जन्यते । समुदायश्च द्विविधः—अमावास्यायां त्रयाणां यागानामेकः समुदायः पौर्णमास्याञ्च त्रयाणां यागानामपरः समुदायश्च ताभ्यां जन्यं यदपूर्वं तत्समुदायापूर्वमित्युच्यते । समुदाययोश्च भिन्नकालवर्तिनोः संहत्य फलापूर्वजननायोगात्तज्जननाय समुदायजन्यस्यापूर्वद्वयस्यावश्यं कल्पनीयत्वात् । अमावास्यायामिति वाक्यविहितौ सान्नाय्ययागौ यदाग्नेयोष्टाकपाल इतिवाक्यविहित आग्नेयश्च तेषां त्रयाणाम्भवति । पौर्णमास्यां समुदायस्तु "यदाग्नेयोष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवती"त्याग्नेययागो विहितः, "ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छ"दित्यग्नीषोमीययागो विहि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तः । "उपांशुयाजमन्तरा यजतीत्युपांशुयागः" "तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्या"मितिवाक्येन विहितः तेषां त्रयाणां च भवति । तयोस्तु समुदाययो र्मध्य एकसमुदायवर्तिनां त्रयाणां यागानां भिन्नक्षणवर्तिनां संहत्य समुदायद्वजन्ययोरपूर्वयोरेकापूर्वजननायोगात्तज्जननाय यागत्रयजन्यानि त्रीण्युत्पत्त्यपूर्वाणि कल्पनीयानि । तेषां चाङ्गोपपकारमन्तरेणानुत्पत्तेरङ्गानां चानेकक्षणवर्त्तित्वेन संहत्योत्पत्त्यपूर्वारम्भायोगात्तदारम्भायाङ्गापूर्वाणि कल्पनीयानि ।

तत्र चायं विभागः—सन्निपत्योपकारकाण्यवघातप्रोक्षणादीनि द्रव्यदेवतासंस्कारद्वारेण यागस्वरूपस्यैवातिशयजननेन यागोत्पत्त्यपूर्वोत्पत्तौ तत्द्वारेण हि फलापूर्वे च व्याप्रियन्ते । सन्निपत्योपकारकाङ्गापूर्वे यागोत्पत्त्यपूर्वस्य प्रयोजकत्वमिति केचित् । फलापूर्वस्यैव तादृशाङ्गापूर्वेपि प्रयोजकत्वं स्वीकर्तव्यं तस्यैव सर्वापूर्वप्रयोजकत्वे लाघवादित्यन्ये । आराद्उपकारकाणि तु प्रयाजादीनि यागोत्पत्त्यपूर्वेभ्यः सकाशाज्जायमानं फलापूर्वमेव साक्षाज्जनयन्तीति । एवं प्रकारभेदेपि सर्वाण्यङ्गान्यपूर्वोत्पत्तावनुग्राहकाणीत्येकरूपेणैवेत्थम्भावेन गृह्यन्ते । इत्थम्भाव इतिकर्तव्यता चानर्थान्तरम् । तथाच प्रधानानामाग्नेयादीनां षण्णां स्वरूपेण सर्वाङ्गसाहित्याभावेपि स्वस्वोत्पत्त्यपूर्वद्वारेण सर्वाङ्गसाहित्यं तेषामङ्गानां प्रयाजानुयाजादीनामपि स्वरूपेण सर्वप्रधानसाहित्यासम्भवेपि स्वस्वोत्पत्त्यपूर्वद्वारा प्रधानसाहित्यञ्चोपपन्नम् । तच्च साहित्यं विहितमिति वक्ष्यते । एवञ्च यदेव प्रधानोत्पत्त्यपूर्वाणाम्प्रयाजाद्युत्पत्त्यपूर्वैः साहित्यन्तदेव प्रधानानामङ्गवैशिष्ट्यरूपं साङ्गत्वमित्युच्यते । तस्मात्ताभ्यां समुदायापूर्वाभ्यामाग्नेयादिप्रधानोत्पत्त्यपूर्वत्रितयत्रितयजन्याभ्यां प्र-

६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याजाद्यङ्गापूर्वसहिताभ्यां फलजनकीभूतं फलापूर्वापरनामकं महापूर्वं जन्यते तेन च फलमिति यागस्यापूर्वद्वारेण फलसाधनत्वमुक्तमुपपन्नतरम्भवतीतिसर्वं समञ्जसम्(१) ।

ननु "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "चित्रया यजेत पशुकाम" "उद्भिदा यजेतपशुकामो" "ज्योतिष्टोमेन स्वर्गकामो यजेते" त्यादिषु सर्ववाक्येषु कस्य पदस्यापूर्वप्रतिपाद-

(१) ननु सर्वमेतदपूर्वसद्भाव एवोपपद्यते तस्यैवाऽस्तित्वे किं प्रमाणं तथाहि अपूर्वं स्वर्गयागयोः साध्यसाधनभावस्य श्रुतस्योपपत्तये कल्पनीयं तत्र का ऽनुपपत्तिर्यदर्थमपूर्वमङ्गीक्रियते कल्प्यमानं हि तत् यागसाध्यं स्वर्गसाधनं च कल्प्येत तच्चोभयमपि श्रुतिविरुद्धं स्वर्गयागयोरेव साध्यसाधनभावश्रवणात् । कथं पुनः क्षणिकस्य यागस्य विनाऽपूर्वेण कालान्तरभाविफलसाधनत्वमिति यदि परोब्रूयात् प्रतिब्रूयादेनमपूर्वेऽपि कल्पिते कथं यागस्य स्वर्गसाधनत्वं तदा ह्यपूर्वमेव यागसाधनं स्यान्न यागः । यागस्यैव शक्तिरवान्तरव्यापारोवाऽपूर्वमिति चेन्न । शक्तिमति व्यापारवति चातीते शक्तिव्यापारयोरवस्थानायोगात् तस्माद्याग एव विनष्टोऽपि फलं साधयति स एव वा फलं यावदवतिष्ठत इति शास्त्रप्रामाण्यादवगन्तव्यं नाऽपूर्वमिति चेन्न । तदेव हि श्रुतार्थानुपपत्त्या कल्पयितव्यं न यत्प्रमाणान्तरेण विरुध्यते विरुद्धं च सर्वप्रमाणैर्विनष्टस्याऽसतोऽनारब्धवस्त्वन्तरस्य कार्यारम्भकत्वमवस्थानं च क्षणमात्रवर्तिनः प्रमाणविरुद्धमेवाऽतोऽपूर्वमेव कल्पनीयम् । न च श्रुतिविरोधः तस्य यागस्य शक्तित्वादवान्तरव्यापाररूपत्वाद्वा नहि शक्त्याऽवान्तरव्यापारेण वा व्यवधिरकारणतामापादयति काष्ठादीनामिव ज्वालया । न चाऽवश्यं शक्तिमत्येवावतिष्ठते शक्तिः, कार्यानुमेयाहि शक्तिः यत्रैव कार्यायालं तत्रैव कल्प्यतेऽतो यागशक्ति रात्मनितिष्ठतीति न विरोधः कश्चिदपि, एतदेवावान्तरव्यापाराणां तत्त्वं यत्समीहितोद्देशप्रवृत्तेन साधनेन तत्सिद्ध्यर्थमन्तरा साध्यमानत्वं काष्ठैरिव ज्वालायाः, तस्मादस्यापूर्वं फलसाधनस्य कर्मणोऽवान्तरव्यापाररूपमित्यन्यत्र विस्तरः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कत्वमिति वक्तव्यम् । नच भावनावाचकस्य यजतिददात्याख्यातान्तस्यापूर्ववाचकत्वं भवत्विति वाच्यम् । अपूर्वस्य साध्यत्वेन प्रधानत्वात्सर्वेषां पदानां प्रधानान्वयलाभाय तेषां सर्वेषामेव क्रियाकारकसम्बन्धमनादृत्य प्रत्येकमपूर्ववाचकत्वात् अन्यथा तेषां प्रधानान्वयित्वं न स्यादितिचेदत्रोच्यते । अपूर्वस्यात्यन्तादृष्टरूपत्वादेकापूर्वकल्पनयैव वाक्यस्योपपत्तावनेकापूर्वकल्पनायां गौरवप्रसङ्गः स्यात् । सर्वेषां च पदानां तद्वाचकत्वे पर्यायत्वप्रसक्त्यैकस्यैव पदस्यैकापूर्ववाचकत्वं स्वीकर्त्तव्यं, पदान्तरं तु तद्गुणतयाऽन्वेति तच्चापूर्ववाचकं पदमाख्यातान्तमेव, नतु कर्मनामधेयादिकं, तस्य भावार्थसामानाधिकरण्यादिनाप्युपपत्तेः ।

ननु "सोमेन यजेत" "हिरण्यमात्रेयाय ददाति" "तस्मात्सुवर्णं हिरण्यं भार्य"मिति हि श्रुतम्—तत्र च सोमहिरण्यशब्दौ द्रव्यवाचकौ सुवर्णशब्दस्तु शोभनवर्णरूपगुणवाचकः तैरेव द्रव्यादिशब्दैरपूर्वमवगम्यते द्रव्यादीनां सिद्धस्वरूपाणामेव साध्यापूर्वसाधनत्वादिति चेन्न । द्रव्यादिसिद्धस्वरूपाणां यागदानादिरूपभावार्थशेषत्वेनाप्युपपत्तेर्भावार्थस्यैवापूर्वसाधनत्वात् क्रियां विना द्रव्यादीनां न फलसाधनत्वं सम्भवति । पचिक्रियामन्तरेण काष्ठस्थाल्यादीनामोदनसाधनत्वादर्शनादित्युक्तमेव । तस्माद्भावनावाचकस्यैवाख्यातान्तपदस्यापूर्वगमकत्वं न द्रव्यादिपदस्येति सिद्धम् ।

नन्वेवं भवतु भावनावाचकस्याख्यातपदस्यापूर्वगमकत्वं भवतु च भावनैवाख्यातसामान्यार्थः, तथापि 'सोमेन यजेत" "हिरण्यमात्रेयाय ददाति" "दाक्षिणानि जुहोती"त्यादिषु वाक्येषु भावनावाचकस्याख्यातस्यैकत्वाद्भा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनाया अप्येकत्वं युक्तम् । नच धातुभेदाद्भावनाया भेद इति वाच्यम् । धातोर्भावनावाचकत्वाभावात्तस्य तद्भेदाप्रयोजकत्वादिति चेदत्राभिधीयते । अस्तु तावदाख्यातस्यैव भावनावाचकत्वं तच्चाख्यातं न प्रतिधातुव्यक्त्येकव्यक्तिरूपं भवति नहि सर्वासां धातुव्यक्तीनामुपर्य्येकाऽऽख्यातप्रत्ययव्यक्तिः श्रूयते, व्याकरणेनापि न धातुसमूहादेकाऽऽख्यातव्यक्तिर्विहिता, तस्माद्बहूनामाख्यातव्यक्तीनामेकैकधातुविशेषानुषक्तत्वेनोत्पन्नानां भावनावाचकत्वाद्यागदानहोमभावनाः परस्परं भिद्यन्त इति भावनाभेदे तत्करणस्यापि भावार्थस्यापर्यायशब्दान्तराद्भेदः स्पष्ट एवेति सिद्धम् ।

ननु "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजती"ति दर्शादिप्रकरणे पञ्चप्रयाजाः श्रूयन्ते तत्र च पञ्चकृत्वः श्रुतयजतिपदे यजतिददातिजुहोत्यादिषु पूर्वोक्तपदेष्विव धातुभेदाभावात्तदनुषक्ताख्यातस्याप्यभेद एव ततश्चाख्यातैक्यप्रयुक्तभावनैक्यमपि दुर्वारमिति चेन्न । यजतिपदाभ्यासाद्भावनाभेदस्य स्वीकर्त्तव्यत्वात् तस्मात्करणभेदः अन्यथा कर्मैकत्वे ऽभ्यासोनिरर्थकः स्यात् । (१)त-

(१) अथोच्येत समिधोयजतीत्यनेन प्रथमश्रुतेन वाक्येन विविहितं समिन्नामकं यागमुपरितनैश्चतुर्भिर्यजतिपदैरनूद्य तनूनपादादयो देवतारूपा द्रव्यरूपा वा गुणाश्चत्वारो विकल्पिता विधीयन्ते ततोऽनुवादार्थत्वान्नाभ्यासवैयर्थ्यमिति । तन्न । तनूनपादादिशब्दानां यागनामत्वेन गुणविधित्वाभावात्, न तावदत्र देवताविधिः चतुर्थीतद्धितयोरश्रवणात्, नापि द्रव्यविधिः तृतीयान्तत्वाभावात् ततोऽग्निहोत्रं जुहोतीत्यादाविव द्वितीयान्तानां युक्तं नामत्वम् । यत्तु चतुर्णामुपरितनानां यजातिपदानामनुवादत्वं, तदसत्, तेषां विधायकत्वात् । यथा समिधोयजति इत्यत्र यजतिपदे विधित्वं श्रु-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मादविशेषपुनःश्रुतिरूपात् यजतिपदाभ्यासात्कर्मभेदः सिद्ध इत्यन्यत्र विस्तरः ।

ननु "तिस्र आहुतीर्जुहोती"त्यत्र जुहोतीत्याख्यातं "समिधो यजती"त्यादिवन्नाभ्यासेनाम्नातं किन्तु सकृदेव ततश्च भावनैक्येन कर्मैक्यमेवेतिचेदत्र वक्तव्यम् । किमिदमाख्यातम्पदान्तरान्वयनिरपेक्षस्वरूपं सदेव भावनैक्ये प्रमाणमुत पदान्तरान्वयसापेक्षस्वरूपम् । नाद्यः पदमात्रस्य वाक्यांशरूपस्य स्मारकत्वेन वाक्यकार्यरूपप्रमितिजनकत्वासम्भवात् । न द्वितीयः त्रित्वसङ्ख्यया विशेषितेनाख्यातेन कर्मबहुत्वावगमाद्भावनाबहुत्वावगमे तस्य भावनैक्ये प्रमाणत्वाभावात् । तस्मात्पदाभ्यासाभावेपि जुहोत्यर्थे होमे त्रित्वसङ्ख्यान्वयात्परस्परं त्रयोहोमा भिद्यन्त इति भावनानां त्रित्वमेवेति सिद्धम् ।

ननु "अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेते"त्यत्र हि प्रकृतं ज्योतिष्टोममेष ज्योतिरित्यादिनाऽनूद्य तस्मिन्सहस्रदक्षिणादानलक्षणो गुणो विधीयत इति

त्या प्रतीयते तथाऽन्येष्वपि चतुर्षु पदेषु विधित्वं श्रौतं, अनुवादत्वं तु पुरोवादरूपस्य समिधोयजतीत्यस्य सन्निधिनाऽवगम्यते, सन्निधिश्च श्रुतेर्दुर्बलः विधित्वे च पूर्ववाक्याविहितस्य समिन्नामकस्य यागस्य पुनर्विधानायोगात्तनूनपादादिनामकानि यागान्तराणि विधीयन्ते । नन्वेवंसति संज्ञाभेदात्कर्मभेदः सम्पद्यते न त्वभ्यासात् तथासति वक्ष्यमाणेन ज्योतिरधिकरणेन सङ्कीर्येत । मैवम्-वैषम्यात्- अथैष ज्योतिरित्यस्मिन् वक्ष्यमाणोदाहरणे यागावगमात्प्रागेव संज्ञात्वावगमात् संज्ञायाः कर्मभेदहेतुत्वमिह तु विधायकैर्यजतिपदैर्यागेष्ववगतेषु भेदे चाभ्यासादवगते भिन्नानां यागानां समित्संज्ञाया अन्याः संज्ञा अपेक्षिता इति तनूनपादादीनां संज्ञात्वं पश्चादवगम्यते इति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नात्र कर्मभेदेन भावनाभेद इति चेन्न । प्रकृतस्य ज्योतिष्टोमस्याथेत्यनेन विच्छेदात् । ततश्च ज्योतिष्टोमप्रकरणे श्रूयमाणानामपि त्रयाणां यागानां ज्योतिष्टोमसंज्ञापेक्षया पृथक्संज्ञात्रयकरणाज्ज्योतिष्टोमाद्भिन्नसंज्ञावशादेव त्रयाणाञ्च परस्परं भेद इति भावनानां भिन्नत्वमिति सिद्धम् ।

ननु "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मिति हि श्रूयते । तत्र च घनीभूतः पयःपिण्डः आमिक्षा, जलं वाजिनम् । तथा चामिक्षाद्रव्यभाजो ये विश्वेदेवास्तान्वाजिभ्य इत्यनेनानूद्य तत्र वाजिनद्रव्यरूपो गुणो विधीयते वाजोऽन्नमामिक्षारूपमेषामस्तीति तदुत्पत्तेः, तच्च द्रव्यमामिक्षाद्रव्येण सह समुच्चीयतां विकल्प्यतां वेति चेन्न । वैश्वदेवयागस्य पूर्वमेवामिक्षारूपगुणावरुद्धत्वेन तत्र वाजिनगुणस्य प्रवेशायोगात् । नहि व्रीहियवयोरिव वाजिनामिक्षयोर्विकल्पः समशिष्टत्वाभावात् । आमिक्षारूपोगुणस्तु वैश्वदेवयागस्योत्पत्तिवाक्य एव शिष्यते विधीयत इत्युत्पत्तिशिष्टः । वाजिनगुणस्य तूत्पन्ने कर्मणि विधिः कल्प्यत इत्युत्पन्नशिष्टः । उत्पत्तिशिष्टोत्पन्नशिष्टयोर्मध्य उत्पत्तिशिष्टः कर्मोत्पत्तिकाल एव तदङ्गत्वेन प्रमितत्वात्प्रबलः । उत्पन्नशिष्टस्तु तदनन्तरं प्रमितोपि विलम्बितत्वेन दुर्बलत्वात्तत्र प्रवेशमलभमानो वाजिशब्दार्थस्य देवतान्तरत्वमापाद्य तद्दैवत्यकर्मान्तरे प्रविशति । तस्माद्द्रव्यदेवतालक्षणस्य रूपस्य भेदात्कर्मभेदेन भावनाया भेद इति सिद्धम् ।

ननु "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोती"त्यत्र हि न कर्मान्तरभावनाया विधिः किन्तु नित्याग्निहोत्रमनूद्य तत्र मासरूपो गुणो विधीयते प्राप्तत्वादिति चेन्न । वाक्यभेदप्रसङ्गात् । तथाहि किन्तदनुवादेन मास एव विधीयते उतोपसदोपि । न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमः । उपसदामपि नित्याग्निहोत्रप्राप्तानां त्वन्मते विधेयत्वात् । नापि द्वितीयः प्राप्ते कर्मणि मासोपसद्रूपानेकगुणविधाने वाक्यभेदस्य दुर्वारत्वात् । स चाष्टदोषदुष्टः दोषांश्चोपरिष्टात्प्रदर्शयिष्यामः । तस्मादपूर्वकर्मविधायकात्कुण्डपायिनामयनरूपात्प्रकरणान्तरान्नित्याग्निहोत्रधर्मकं तन्नामकं च कर्मान्तरमत्र विधीयत इति कर्मान्तरभावना सिद्धा । तथाच शब्दान्तराभ्याससङ्ख्यासंज्ञागुणभेदप्रकरणान्तरैः कर्मभेदोपि द्वितीयाध्यायस्यार्थोमूले भावनाप्रदर्शनेनैव सूचितो वेदितव्यः । अग्रे चोत्पत्तिविधिनिरूपणेन स ध्वनितोऽस्माभिस्तत्रैव निरूपितः । तस्मात्स्वर्गमुद्दिश्य तत्साधनत्वेन स्वर्गकामाविधिर्यागादिकं विधत्ते । ततश्च तादृशवेदस्य धर्मादौ प्रामाण्यं निरवग्रहमुपपन्नमिति सर्वं निरवद्यम् ।

तस्य च वेदरूपप्रमाणस्य प्रमेयोऽर्थस्त्रिविध इति प्रसङ्गाच्चिन्त्यते—क्रत्वर्थः पुरुषार्थ उभयार्थश्चेति । तत्र प्रयाजादिः प्रोक्षणादिश्च केवलं क्रत्वर्थः । फलं यागादिरूपं तत्करणं च पुरुषार्थः । यथा स्वर्गादिर्दर्शपूर्णमासादिश्च । दध्यादि तूभयार्थं "दध्ना जुहोती"ति फलासंयुक्तवाक्येन तस्य क्रत्वर्थत्वावगमात् । दध्नेन्द्रियकामस्य जुहुया"दिति फलसंयोगपरवाक्येन पुरुषार्थत्वावगमाच्च । एकस्य तूभयार्थत्वे विनियोजकप्रमाणभेदस्य नियामकत्वात् । तथाचोक्तम्— "एकस्य तूभयत्वे संयोगपृथक्त्व"मिति(१) । किञ्च क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः पुरुषार्थे च दर्शादौ फलं, प्रयोजकत्वं चानुष्ठापकत्वम् । तथाच विधिर्यदर्थं यदनुष्ठाप-

(१) मीमांसादर्शने चतुर्थाध्याये तृतीयपादे तृतीयाधिकरणम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ को वेद इतिचेदुच्यते । अपौरुषेयं वाक्यं वेदः । स च विधिमन्त्रनामधेयनिषेधार्थवादभेदात्प-

---

यति स तत्र प्रयोजकः यथा दर्शादिविधिः स्वर्गार्थं दर्शादिक-मनुष्ठापयति इति स्वर्गादिर्दर्शादौ प्रयोजकः । यथाच प्रयाजादि-विधिः प्रयाजादीन् दर्शाद्यर्थमनुष्ठापयति दर्शादिः प्रयाजादिषु प्रयोजकोदध्यानयनविधिश्च दध्यानयनमामिक्षार्थमनुष्ठापयती-त्यामिक्षा दध्यानयने प्रयोजिका, वाजिनं तु दध्यानयनानु-ष्ठानेनामिक्षायां जायमानायामनुनिष्पाद्यमानत्वान्मधुररसस्य चामिक्षायामेव विशेषणोपलभ्यमानत्वान्न दध्यानयने प्रयोजक-मित्यादिका चतुर्थाध्यायार्थचिन्ता स्वयमूहितव्या ।

तदेवं सामान्यतः प्रयोजनवदर्थावबोधकत्वेन वेदस्य धर्मे प्रा-माण्यं धर्मविधायकत्वप्रदर्शनेन चोपपाद्येदानीं तस्य विध्यादिरू-पविभागेन तत्र प्रामाण्यमुपपादयितुं तल्लक्षणं पृच्छति। अथेति। उत्तरम्प्रतिजानीते । उच्यते इति । तत्र सामान्यलक्षणमाह । अपौरुषेयं वाक्यमिति । वेद इतिलक्ष्यनिर्देशः । तत्र भार-तादावतिव्याप्तिवारणायापौरुषेयमिति विशेषणम् । आत्मादौ तद्दोषवारणाय वाक्यमिति विशेष्यम् । प्रमाणान्तरेणार्थमुपलभ्य विनिर्मितत्वं पौरुषेयत्वं तद्भिन्नवाक्यत्वमिति फलितम् । नहि वेदं परमेश्वरस्तदर्थम्प्रमाणान्तरेणोपलभ्य विरचयति । वेदाध्ययनं गुर्वध्ययनपूर्वकं वेदाध्ययनत्वाद्वर्त्तमानवेदाध्ययनवदित्यनुमानेन वेदस्यापौरुषेयत्वसाधनात् । यः कल्पः सकल्पपूर्वक इति न्यायेन संसारस्यानादित्वात् परमेश्वरस्य च सर्वज्ञत्वात्परमेश्वरोगतक-ल्पीयं वेदमस्मिन्कल्पे स्मृत्वोपदिशतीत्येतावन्मात्रेणोपपत्तौ वे-दपौरुषेयत्वस्यानौचित्याच्चेति भावः । वेदं विभजते । सचे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिविधः । तत्राज्ञातार्थज्ञापको वेदभागो विधिः । स च तादृशप्रयोजनवदर्थविधानेनार्थवान् यादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते—यथा "अग्निहोत्रं जुहुयात्स्वर्गकाम" इति विधिर्मानान्तरेणाप्राप्तं स्वर्गप्रयोप्रयोजनवद्धोमं विधत्ते । अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः । यत्र कर्म मानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते—यथा "दध्ना जुहोति" इत्यत्र होमस्य "अग्निहोत्रं जुहुया"दित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति । यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते यथा "सोमेन यजेत" इत्यत्र सोमयागयोरप्राप्तत्वात्सोमवि-

---

त्यादिना । तत्र विधिं लक्षयति । तत्रेत्यादिना । तत्र—पञ्चविधेषु वेदभागेषु मध्य इत्यर्थः । अज्ञातेति । अज्ञातस्य प्रयोजनवतोऽर्थस्य ज्ञापकत्वं विधित्वमित्यर्थः । तदेवाह । स चेत्यादिना । स विधिर्यादृशं प्रमाणान्तरेणाप्राप्तम्भवति तादृशमर्थं विधत्ते तेन चाज्ञातप्रयोजनवदर्थविधानेनार्थवानिति योजना । तत्रोदाहरणमाह । यथाऽग्निहोत्रमिति । गुणविधिस्तु मानान्तरेणाप्राप्तं गुणमात्रं विधत्ते । प्रधानकर्मणस्तु मानान्तरेण प्राप्तस्यानुवाद एवेत्याह । यत्र कर्मेत्यादिना । उभयमिति । शेषशेषिलक्षणमुभयमित्यर्थः । विशिष्टमिति । शेषविशिष्टं शेषिणमित्यर्थः । तत्रोदाहरणमाह । यथा सोमेन

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिष्टयागविधानम्। सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टम्भावयेदिति वाक्यार्थबोधः। न चोभयावि-

---

यजेतेति। ननु सोमरूपस्यैव यागस्यात्र विधिरस्तु, किं विशिष्टविधानेनेत्याशङ्क्य सोमस्य द्रव्यत्वेन यागत्वासम्भवात्सोमपदे मत्वर्थलक्षणास्वीकारेण विशिष्टस्यैव विधेर्युक्तत्वान्मैवमित्याह। सोमपदे इत्यादिना। ननु शेषशेषिलक्षणस्योभयपदार्थस्य विधाने वाक्यभेदः स्यादेव। नच स इष्ट इति वाच्यम्। यत्र वाक्यभेदस्तत्राष्टदोषप्रसङ्गात्। यथा हि "व्रीहिभिर्यजेत यवैर्वा" इत्यत्र। तत्र च प्रथमप्रयोगे व्रीह्यनुष्ठाने यवशास्त्रप्रामाण्यस्य स्वार्थानुष्ठापकत्वरूपस्य परित्यागः स्वार्थाननुष्ठापकत्वरूपस्याप्रामाण्यस्य च स्वीकारो भवति। ततो द्वितीयप्रयोगे यवानुष्ठाने तु पूर्वं परित्यक्तस्य यवशास्त्रप्रामाण्यस्य स्वीकारः स्वीकृतस्य च तदप्रामाण्यस्य परित्यागश्चेति यवशास्त्रे चत्वारो दोषा भवन्ति। तथा प्रथमप्रयोगे यवानुष्ठाने व्रीहिशास्त्रप्रामाण्यस्य स्वार्थानुष्ठापकत्वलक्षणस्य परित्यागः स्वार्थाननुष्ठापकत्वस्वरूपस्य चाप्रामाण्यस्य स्वीकारः। ततो द्वितीयप्रयोगे व्रीह्यनुष्ठाने तु व्रीहिशास्त्रप्रामाण्यस्य पूर्वम्परित्यक्तस्य स्वीकारः स्वीकृतस्य च तदप्रामाण्यस्य परित्यागश्चेति व्रीहिशास्त्रे चत्वारो दोषा भवन्तीत्यष्टदोषदुष्टोविकल्पो यथा व्रीहियववाक्ये प्रसिद्धस्तथाऽत्रापि स्यात्। न च तद्वदत्रापीष्ट एवेति वाच्यम्। तत्र व्रीहियवयोः पुरोडाशरूपैककार्यकारित्वेन विकल्पस्येष्टत्वाद्गत्यन्तराभावाच्च। प्रकृते तु गुणविधिमात्रस्वीकारेणाप्युपपत्तौ नोभयविधिः साधुरित्याशङ्क्य परिहरति। न चेत्यादिना। यद्वा न-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धाने वाक्यभेदः, प्रत्येकमुभयस्याविधानात्, किन्तु

नु यागेनेष्टं भावयेत्सोमेन च यागम्भावयेदित्यावृत्त्योभयविधावावृत्तिलक्षणो वाक्यभेदः स्यात् । यदा तु युगपत्तन्त्रेण यागेनेष्टम्भावयेत्सोमेन यागम्भावयेदित्युभयविधानं तदा तु विरुद्धत्रिकद्वयप्रसङ्ग(१) इत्याशङ्क्य परिहरति । नचेत्यादिना । एकवाक्यस्य प्रत्येकमुभयपदार्थे व्यापारभेदेनोभयविधायकत्वे वाक्यभेदो भवति तथाऽस्वास्वीकारादित्यर्थः । ननु विधेयस्योभयत्वे तद्विधायकवाक्यस्यापि व्यापारभेदेनैव तद्विधायकत्वं सम्भवति नान्यथेति शङ्कते । किन्त्विति । विशिष्टस्यैकरूपत्वेन विधेयस्योभयत्वासिद्धेर्न व्या-

---

(१) यजतेस्तन्त्रेणोभयसम्बन्धे विरुद्धत्रिकद्वयापत्तिः स्यात्–उपादेयत्वं विधेयत्वं गुणत्वं चेत्येकं त्रिकम् उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वं चेत्यपरं त्रिकम् तत्रोद्देश्यत्वादयस्त्रयः फलनिष्ठा धर्माः उपादेयत्वादयस्त्रयः साधनभूतयजिनिष्ठा धर्माः । फलमुद्दिश्य यजिरुपादीयते, फलमनूद्य यजिर्विधीयते, फलं प्रधानम्, यजिरुपसर्जनम्, फलस्योद्देश्यत्वं नाम मानसापेक्षोविषयत्वाकारः यजेरुपादयत्वं नामानुष्ठीयमानत्वाकारः तावुभौ मनःशरीरोपाधिकौ धर्मौ, अनुवाद्यत्वविधेयत्वधर्मौ तु शब्दोपाधिकौ, ज्ञातस्य कथनमनुवादः अज्ञातस्यानुष्ठेयत्वकथनं विधिः । फलयागयोः साध्यसाधनत्वरूपतया प्रधानत्वोपसर्जनत्त्वे, एवं सति फलतत्साधनयोः स्वर्गयागयोः स्वभावपर्यालोचनायां यथा फलस्योद्देश्यत्वादित्रिकं यागस्योपादेयत्वादित्रिकं व्यवतिष्ठते तथा यागस्य सोमस्य च साध्यसाधनभावपर्यालोचनायां यागफलस्योद्देश्यत्वादित्रिकञ्च पर्यवस्यति । ततो यागस्य फलद्रव्याभ्यां युगपत्सम्बन्धे सति विरुद्धं त्रिकद्वयमापद्येतेत्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशिष्टस्यैकस्यैव विधानात् । नच "ज्योतिष्टोमेन स्वर्गकामोयजेत"इति विधिना प्राप्तयागोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति, किं मत्वर्थलक्षणयेति वाच्यम् । तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात् । ननु "उद्भिदा यजेत

पारभेदेनैतद्विधानं ततश्च न वाक्यभेदप्रसङ्ग इति परिहरति । विशिष्टस्येति । विशिष्टविधौ विशेषणविधेरार्थिकत्वेन श्रूयमाणविधिना गुणस्य पृथगविधेयत्वादिति भावः । ननु "सोमेन यजेत"इत्यस्य गुणविधित्वमेवास्तु सोमयागस्वरूपविधिस्तु "ज्योतिष्टोमेन स्वर्गकामोयजेत"इत्ययमेव भवतु । ततश्च ज्योतिष्टोमेनेत्यादिना प्राप्ते कर्मणि गुणविधायकत्वेनापि सोमवाक्यस्योपपत्तौ न मत्वर्थलक्षणा पददोषरूपत्वेनान्याय्या स्वीकर्त्तव्ये त्याशङ्कते । नच ज्योतिष्टोमेनेत्यादिना । नच वाच्यमित्यत्र हेतुमाह । तस्याधिकारविधित्वेनेति । तर्हि भवतु तस्याधिकारविधित्वमुत्पत्तिविधित्वमपि कुतो न स्यादित्याशङ्क्याह । उत्पत्तिविधित्वासम्भवादिति । कर्मस्वरूपमात्रबोधकस्यैव विधेरुत्पत्तिविधित्वं व्यवह्रियते उत्पत्तिविधिविहितस्य च कर्मणः फलविशेषेण सह सम्बन्धमात्रमधिकारविधिः करोति—यथा "यदाग्नेयोऽष्टाकपालोभवतीत्येतदुत्पत्तिविधिविहितस्य कर्मणः स्वर्गरूपफलविशेषेण सम्बन्धो "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"इत्यनेन विधिना क्रियत इति तस्याधिकारविधित्वमेव, नोत्पत्तिविधित्वं तद्वदस्याप्यधिकार-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पशुकाम" इत्यस्येव ज्योतिष्टोमेनेत्यस्याप्युत्पत्त्यधिकारविधित्वमस्त्विति चेन्न । दृष्टान्त उत्पत्तिवाक्यान्तराभावेनाऽन्यथानुपपत्त्या तथात्वाश्रयणात् । किञ्च ज्योतिष्टोमेनेत्यस्योभयविधित्वेऽनेनैव यागस्तस्य फलसम्बन्धोपि बोधनीय इति सुदृढो वाक्यभेदस्तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम् ।

विधेर्नोत्पत्तिविधित्वं सम्भवतीति भावः । ननु "उद्भिदा यजेत पशुकाम" इत्यस्य विधिवाक्यस्य यथोद्भिन्नामकर्मरूपबोधकत्वरूपोत्पत्तिविधित्वेपि तस्य कर्मणः पशुरूपफलसम्बन्धबोधकत्वरूपाधिकारविधित्वमपि भवति तद्वदस्याप्युभयविधित्वमविरुद्धमित्याशङ्कते । नन्वित्यादिना । दृष्टान्ते तु कर्मस्वरूपबोधकोत्पत्तिवाक्यान्तराभावेनैकस्य वाक्यस्योभयविधित्वमाश्रितं कर्मणः स्वरूपबोधनमन्तरेण तस्य फलसम्बन्धबोधनानुपपत्त्या तस्यैव वाक्यस्योभयविधित्वाश्रयणादिति परिहरति । दृष्टान्त इत्यादिना । ननु "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यस्य वाक्यस्योभयविधित्वस्वीकारे "सोमेन यजेत" इत्यस्य मत्वर्थलक्षणामन्तरेणैव गुणमात्रविधायकत्वनिर्वाहे को दोषोऽन्यथा मत्वर्थलक्षणाप्रसङ्गादित्याशङ्क्य परिहरति । किञ्चेत्यादिना । उभयविधित्व इति । सोमयागस्योत्पत्तिविधित्वेऽधिकारविधित्वे चेत्यर्थः । "ज्योतिष्टोमेन स्वर्गकामोयजेत" इत्यनेनैव सोमयागस्वरूपं तस्य स्वर्गरूपफलसम्बन्धश्च बोधनीय इत्यर्थः । दृसुढोवाक्यभेद इति । गौरवलक्षणो वाक्यभेदो दृढतरोभवेदित्यर्थः । तथाचोक्तम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"श्रौतव्यापारनानात्वे शब्दानामति गौरवम् ।
एकोक्त्यवसितानान्तु नार्थाक्षेपो विरुध्यत" इति ॥

ननु सोमेन यजेतेत्यत्रापि गुणस्य कर्मस्वरूपस्य च विधाने वाक्यभेदस्य सुदृढत्वादिति चेन्न । विशिष्टविधौ विशेषणविधेरार्थिकत्वेन श्रूयमाणविधिना गुणस्य पृथगविधेयत्वादिति निरस्तत्वात् । नच तस्योत्पत्तिविधित्वे वाक्यभेदस्याभावेपि लक्षणादोषस्तु दुर्वार इतिवाच्यम् । तस्या वाक्यभेदादल्पदोषत्वात् । लक्षणायाः पददोषत्वाद्वाक्यभेदस्य तु वाक्यदोषत्वात् पदवाक्यदोषयोर्मध्ये पददोषस्यैव कल्पनीयत्वाद्गुणे त्वन्याय्यकल्पनेति न्यायात्(१)। तस्माज्ज्योतिष्टोमेन

(१) ज्योतिष्टोमे ऽग्नीषोमीयपशावेकवचनान्तबहुवचनान्तौ द्वौ पाशमन्त्रावाम्नातौ भिन्नयोः शाखयोः "अदितिः पाशं प्रमुमोक्तेत"मित्येकत्र, "अदितिः पाशान् प्रमुमोक्तैता"नित्यपरत्र । तत्र बहुवचनान्तमन्त्रस्य प्रकरणादुत्कर्षो बहुपाशयुक्तेषु पशुगणेषु कर्तव्यः एकस्मिन् पशौ बहुवचनस्यानन्वितत्वादिति पूर्वपक्षे सिद्धान्तः नोत्क्रष्टव्यः किन्त्वेकवचनान्तेन मन्त्रेण सह विकल्पनीयः नहि पाशानित्यत्र प्रधानांशस्यानन्वितत्वमस्ति प्रातिपदिकाविभक्त्योः प्रातिपदिकं प्रधानं धर्मिवाचकत्वात्, विभक्तिस्तु कर्मत्वकरणत्वादिधर्मवाचकत्वात् गुणभूता, तथा विभक्तिवचनयो र्विभक्तेस्तु कर्मादिकारकवाचित्वात् प्राधान्यं, वचनस्य कारकसङ्ख्याभिधायित्वाद्गुणत्वं, तथा सति बहुवचनान्ते पाशशब्दे प्रातिपदिकं कर्मकारकविभक्तिश्चैकस्मिन्नपि पाशे सङ्गच्छते, गुणभूते तु बहुवचने लक्षणावृत्तिः कल्पनीया पाशावयवगतं बहुत्वं लक्ष्यत इति, तस्माद्गुणभूतं वचनमात्रमनुसृत्य कृत्स्नस्य मन्त्रस्य प्रकरणपाठो न बाधनीयः किन्तु प्रधानानुसारेण मन्त्रयोः समानबलत्वाद्विकल्पः कर्तव्यः इति नवमाध्यायस्य तृतीयपादे पञ्चमाधिकरणे निर्णीतम् । गुणे-अप्रधाने अन्याय्यकल्पना लक्षणादिकल्पना युक्तेति सूत्रैकदेशस्यार्थः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधिश्चतुर्विधः—उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति । तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथा "अग्निहोत्रं जुहो-

---

स्वर्गकामोयजेतेत्यस्योभयविधित्वे वाक्यभेदप्रसङ्गाद्वरं सोमपदे मत्वर्थलक्षणां स्वीकृत्य गुणविशिष्टकर्मस्वरूपविधानमेवेत्याशयेनोपसंहरति। तद्वरमित्यादिना।

विधिं विभजते। विधिश्चतुर्विध इति। तत्रोत्पत्तिविधिं लक्षयति । तत्रेत्यादिना। तत्र—चतुर्णां विधीनां मध्य इत्यर्थः । कर्मस्वरूपमात्रेत्यत्र मात्रपदेनोत्पत्तिविधेः कर्मणः फलादिना सह सम्बन्धबोधकत्वं वारयति । "उद्भिदा यजेत पशुकाम" इति विधेस्तु श्रौतमधिकारविधित्वमेवोत्पत्तिविधित्वं तु कर्मस्वरूपबोधकाविध्यन्तराभावेनाऽऽर्थिकमेवेति न दोषः। तत्रोदाहरणमाह। यथाऽग्निहोत्रं जुहोतीति।एतदुपलक्षणम् "सोमेन यजेत" "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्योवाजिनं" "यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतोभवती"त्यादीनाम् । तथाच तत्र द्वितीयाध्याये कर्मोत्पत्तिविधीनामेव भेदो निरूपितः अत्राप्युत्पत्तिविधिलक्षणप्रदर्शनेनैव तेषां भेदोपि ध्वनित एव शब्दान्तरादिभिर्हेतुभिरस्माभिस्तु पूर्वमेव तेषां भेदः सङ्क्षेपेण निरूपित इत्युपरम्यते ।

ननु चात्रोत्पत्तिविधौ कर्मणः साध्यत्वेनान्वयोभवतु अग्निहोत्रहोमं कुर्यादिति व्रीहीन् प्रोक्षतीतिवदग्निहोत्रं जुहोतीत्यत्रापि द्वितीयायाः साध्यत्ववाचकत्वात्, तथाच साध्यस्य साध्यत्वस्वभावादेव साध्यान्तरसाधनत्वासम्भवेन साध्यान्तरान्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ति” इति । अत्र विधौ कर्मणः करणत्वेनान्वयः अग्निहोत्रहोमेनेष्टं भावयेदिति । ननु याग-

---

यायोगादधिकारविध्यवगतफलसम्बन्धानुपपत्तिः स्यादित्याशङ्क्याह। अत्रच विधावित्यादिना । अग्निहोत्रहोमेनेष्टं भावयेदिति करणत्वेनान्वये तु किन्तादिष्टमिति वीक्षायामग्निहोत्रं जुहुयात्स्वर्गकाम इत्यधिकारविध्यवगतफलसम्बन्धोपपत्तेः स्वसाधननिष्पादितस्य सिद्धस्वभावस्यैव करणत्वेनान्वयाच्च न कोपि दोष इति भावः। ननूत्पत्तिविधाविष्टबोधकपदस्याभावादग्निहोत्रहोमेनेष्टं भावयेदिति कथं वाक्यार्थः स्यादिति चेन्न। विधेरेवेष्टाक्षेपकत्वात्, अन्यथा तस्याऽपुरुषार्थभूते कर्मणि पुरुषप्रवर्तकत्वानुपपत्तिः स्यात् ।

ननु गुरुमते विधिः स्वसिद्ध्यर्थमेव नित्यादिषु कर्मसु पुरुषं प्रवर्तयति तथाच काम्यकर्मोत्पत्तिविधीनामिष्टान्तराक्षेपकत्वेपि न नित्यादिकर्मोत्पत्तिविधीनामिष्टान्तराक्षेपकत्वं सम्भवति । न च लिङादिशब्दव्यापारस्य विधेर्नित्यत्वेन कथं तस्य स्वसिद्ध्याक्षेपकत्वमिति वाच्यम् । गुरुमतापरिज्ञानात् । तथाहि विधिशब्दस्तावल्लिङादिशब्दवचनस्तदर्थवचनश्च भवति । तत्र भट्टमते तदर्थस्तु शब्दव्यापारविशेषो भावनैव । गुरुमते तु नियोगाख्यमपूर्वमेव लिङादिशब्दार्थभूतो विधिः। तस्य च साध्यस्वभावत्वेन स्वसिद्ध्याक्षेपकत्वमुपपद्यते। तथा च लोके लिङः कार्यव्युत्पत्त्यनुरोधेनाग्निहोत्रंजुहुयादित्यादावपि लिङा नियोग एव प्रतीयते नियोगश्चाधिकारिविषयादिसापेक्ष एव, तत्र कस्य नियोग इ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यधिकार्याकाङ्क्षायां जीवनादिमत इति जीवनादिविशिष्टोऽधिकारित्वेन सम्बद्ध्यते । कुत्र नियोग इति विषयाकाङ्क्षायां तु होमादाविति होमादिर्विषयत्वेन सम्बद्ध्यते होमादिविषयश्च नियोगः कृतिसाध्यतयैव प्रतीयते तस्य च साक्षात्कृतिसाध्यत्वासम्भवेन स्वस्य कृतिसाध्यत्वनिर्वाहार्थं विषयतया सम्बद्धस्य होमादेः करणत्वमप्याक्षिपति । तदुक्तं शालिकायां—

"कृतितत्साध्यमध्यस्थोयागादिर्विषयो मतः ।
कार्ये ऽसङ्घटिताकारे करणत्वेन सम्मत" इति ॥

तस्मात्काम्यकर्मोत्पत्तिविधेः "विश्वजिता यजेत"इत्यादिविधेश्च स्वप्रवर्तकत्वान्यथानुपपत्त्या सामान्यतः प्रयोजनविशेषाक्षेपकत्वेपि नित्यकर्मोत्पत्तिविधेः स्वसिद्धेरेव प्रयोजनत्वान्न प्रयोजनान्तराक्षेपकत्वमिति चेन्न । नियोगाख्यविधेः स्वरूपेणाप्रयोजनत्वेन स्वसिद्धये पुरुषप्रवर्तकत्वानुपपत्तेः । अन्यथा "विश्वजिता यजेत"इत्यादावपि विधेः स्वसिद्ध्यर्थमेव पुरुषप्रवर्तकत्वापत्तेः । तच्चानिष्टं "स स्वर्गः स्या त्सर्वान्प्रत्यविशिष्टत्वा"दिति(१) न्यायविरोधात् तस्मान्नित्यादिष्वपि क-

---

(१) इदमाम्नायते विश्वजितायजेतेति । तत्र फलस्याश्रुतत्वान्नास्ति किञ्चित्फलमिति प्राप्ते उच्यते फलाकल्पने आकाङ्क्षाया अनिवृत्तेः विश्वजिन्नाम्ना यागेन कुर्यादित्युक्ते किमिति भाव्याकाङ्क्षापूरणाय किञ्चित्फलमध्याहर्तव्यं तथासति तत्कामिनः पुरुषस्य तत्र प्रवृत्त्याऽनुष्ठानं सेत्स्यति इतरथा कस्याप्यप्रवृत्त्या विधिरनर्थकः स्यात्, एवं स्थिते विश्वजिति पशुपुत्रवीर्येन्द्रियादिकं सर्वमेव फलत्वेन कल्पनीयमेतदेवास्य फलमितिविशेषहेतोरभावादिति पूर्वपक्षे इदमुच्यते स स्वर्गः स्यादिति । एकोऽपि स्वर्ग एव फलं स्यात् सर्वान्प्रति अविशिष्टत्वादवैलक्षण्यात् सर्वाभिलषितत्वादित्यर्थः । अनेकेषां फलत्वकल्पने गौरवादे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्य द्वेरूपे द्रव्यं देवता च, तथा चरूपाश्रवणे "अग्निहोत्रं जुहोती"ति कथमुत्पत्तिविधिः—अग्निहोत्रशब्दस्य तु तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न । रू-

र्मसु स्वर्गो "धर्मेण पापमपनुदति" इत्यादिशास्त्रानुरोधेन पापक्षयादिकं वा प्रयोजनं स्वीकर्तव्यमित्यलमतिप्रसङ्गेन ।

प्रकृतमनुसरामः । तस्मात्साधूक्तमुत्पत्तिविधौ कर्मणः करणत्वेनान्वय इति । नन्वग्निहोत्रं जुहोतीत्यस्य नोत्पत्तिविधित्वं द्रव्यदेवतात्मकस्य कर्मरूपस्यात्राश्रवणादित्याशङ्कते । नन्विति । नन्वग्नये होत्रमत्रेत्यग्निहोत्रशब्देनाग्निदेवतात्मकस्य कर्मरूपस्य श्रवणात्कथं रूपाश्रवणमित्याशङ्क्याह । अग्निहोत्रशब्दस्येति । अग्निहोत्रशब्दस्य "तत्प्रख्यं चान्यशास्त्र"(१) मिति तत्प्रख्यन्यायेन नामधेयत्वस्य वक्ष्यमाणत्वा-

कस्य फलस्य कल्पनीयत्वे सर्वाभिलषितत्वेन स्वर्ग एव फलं कल्पनीय इति सिद्धान्तान्नित्यकर्मसु फलानङ्गीकारे एतदधिकरणविरोधापत्तेरिति भावः ॥

(१) प्रथमाध्यायस्य चतुर्थपादे निर्णीतम्—किमग्निहोत्रशब्दोऽग्निदेवतागुणविधिरुत कर्मनामेति । तत्राऽग्नये होत्रमस्मिन्निति व्युत्पत्त्या समासान्तर्वर्तिन्या चतुर्थ्या अग्नेर्होमे देवतात्वप्रतीतेर्गुणविधिरिति प्राप्ते सिद्धान्तः यदग्नये च प्रजापतये च सायं जुहोतीति शास्त्रादग्नेर्देवतात्वप्रख्यापनात् प्राप्ते च विधिवैयर्थ्यान्नामधेयम् । न चाऽत्र चतुर्थीसमाससम्भवः तादर्थ्यप्रकृतिविकारयोरभावात् । नन्वग्नये होत्रमस्मिन्निति बहुव्रीहिसमासः करिष्यते नच तत्र तादर्थ्यप्रकृतिविकारापेक्षाऽस्ति तत्पुरुषाधिकारे एव चतुर्थी तदर्थार्थइत्यादिना तदर्थसमासस्य विहितत्वात् तस्यैव च तदर्थसमासस्य तस्मिन्सूत्रे बलिरक्षितग्रहणेन ज्ञापकेन प्रकृतेस्तादर्थ्यस्य स्फुटत्वेन वार्तिककृद्वचनेन च प्रकृतिविषयत्वनिय-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्न कस्यापि कर्मरूपस्य श्रवणमत्रेत्यर्थः । यद्यप्यत्र कर्मणो रूपं न श्रूयते तथापि विध्यन्यथानुपपत्त्या तत्कल्प्यते, तच्च

मसिद्धेरिति चेन्न । समानाधिकरणानां बहुव्रीहिरिति शाब्दिकनियमेन चतुर्थीगर्भव्यधिकरणबहुव्रीहेरलाक्षणिकत्वात् । ननु तथापि सिद्धान्ते प्राप्तदेवतासम्बन्धप्रवृत्तिनिमित्तकं यौगिकमेवाग्निहोत्रनामेष्यते, अत एव बहुव्रीहिसमासोऽपि प्रदर्श्यते तत्कथमुपपद्यत इति चेत् ? उच्यते । नात्यन्तं व्यधिकरणबहुव्रीहेरसम्भवः सप्तमीविशेषणे बहुव्रीहौ इति सप्तमीग्रहणेन ज्ञापकेन कण्ठेकाल इत्यादौ तस्याऽभ्युपगमात् । तदेव व्याप्तिन्यायेन विभक्त्यन्तरगर्भव्यधिकरणबहुव्रीहेरपि ज्ञापकमाश्रित्य वामनेन अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति सच्छास्त्रजन्मा हि विवेकलाभ इत्यादिप्रामाणिकप्रयोगदृष्टस्य पञ्चम्यादिगर्भव्यधिकरणबहुव्रीहेः साधुत्वप्रतिपादनाच्च । किन्त्वेवं ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिः प्रामाणिकप्रयोगदर्शने सति समर्थनीयो न सर्वत्र । अन्यथा शेषो बहुव्रीहिरिति सूत्रे शेषग्रहणेनाहत्य वार्तिकवचनेन च सिद्धस्य समानाधिकरणानां बहुव्रीहिरित्यौत्सर्गिकनियमस्य निर्हेतुकभङ्गापत्तेः ततश्च सिद्धान्ते यदग्नये चेत्यादिवाक्यान्तरप्राप्ताग्निदेवतासम्बन्धानुवादकं यौगिकमग्निहोत्रनामेति प्रतीतेस्तदुपपादनार्थः प्रमाणमूलो युज्यते व्यधिकरणबहुव्रीहिः । गुणविधिरिति पूर्वपक्षे तु यदग्नये चेत्यादिशास्त्रमग्निप्रजापतिरूपानेकगुणविशिष्टहोमान्तरविधायकमग्निर्ज्योतिरितिमन्त्रस्तु अस्यैव होमान्तरस्याङ्गमिति तयोर्विषयान्तरप्रदर्शनेन विधित्सितगुणप्रापकत्वाभावस्य समर्थनीयत्वादग्निदेवताया अप्राप्तेरकस्मादभ्युपगम्यमानो व्यधिकरणबहुव्रीहिर्न प्रमाणमूल इति स न युज्यते इति ब्रूमः । तत्प्रख्यसूत्रे यस्मिन् गुणोपदेश इति पूर्वसूत्रात् यस्मिन्नित्यस्य अपि वा नामधेयमिति तत्पूर्वसूत्रात् नामधेयमित्यस्य चानुषङ्गः तथाच तस्य विधित्सितस्य गुणस्य अग्नेः प्रख्यं प्रख्यापकं अन्यत् शास्त्रं यस्मिन् तदग्निहोत्रशब्दादिकं नामधेयमित्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाश्रवणेऽप्यस्योत्पत्तिविधित्वात् । अन्यथा रूपश्रवणाद्दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात् । तथाचाऽग्निहोत्रं जुहोतीति वाक्यमनर्थकं स्यात् ।

सामान्यतः कल्प्यमानं द्रव्यदेवतात्मकं कर्मणो रूपं विशेषाकाङ्क्षया गुणविधिमन्त्रवर्णाभ्यां विशेषेण चावगम्यमानमत्र सम्भवति ततश्चाग्निहोत्रं जुहोतीत्यत्र द्रव्यदेवतात्मकस्य कर्मरूपस्य श्रवणाभावेऽप्यस्य होमरूपकर्मस्वरूपमात्रबोधकत्वरूपमुत्पत्तिविधित्वं सम्भवतीत्याशयेन परिहरति । नेति । तत्र निरुक्ताशयं हेतुमाह । रूपाश्रवण इति । विपक्षे बाधकमाह । अन्यथेति । अग्निहोत्रं जुहोतीत्यस्य रूपाश्रवणमात्रेणोत्पत्तिविधित्वानङ्गीकारे "दध्ना जुहोति" इत्यस्यैवोत्पत्तिविधित्वं स्या(१)दत्र कर्मस्वरूपस्य श्रवणादित्यर्थः । दध्ना जुहोतीत्यस्याग्निहोत्रकर्मोत्पत्तिविधित्वे वाक्यान्तरस्यानर्थकत्वमनिष्टमापादयति । तथाचेति । नचाग्निरूपगुणविधित्वेनाप्यस्योपपत्तिरिति वाच्यम् । अग्निर्ज्योतिरित्यादिमन्त्रवर्णेनाग्निरूपगुणस्य प्राप्तत्वात् कर्मनामधेयत्वस्य वक्ष्यमाणत्वाच्च तस्मादनर्थकमिति साधूक्तम् । किञ्च दध्ना जुहोतीत्यस्योत्पत्तिविधित्वे पयसा जुहोतीत्यस्यापि वैयर्थ्यं कर्मान्तरविधायकत्वं वा स्याद्धोमस्योत्पत्तिशिष्टदध्यवरुद्धत्वेन

---

(१) तथाचाघाराग्निहोत्राधिकरणविरोधः । तत्र हि अग्निहोत्रं जुहोति आघारमाघारयति इत्यादिविधयः उत्पत्तिविधयः दध्ना जुहोति पयसा जुहोति ऊर्ध्वमाघारयति सन्ततमाघारयतीत्यादयस्तु गुणविधय इत्युक्तत्वात् इति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः यथा "दध्ना जुहोति" इति । स हि तृतीयया प्रतिपन्नाङ्ग-

---

तत्र पयोरूपगुणविधित्वासम्भवात्(१) तथाचानेकादृष्टकल्पनापत्तिः । अग्निहोत्रं जुहोतीत्यस्य होमोत्पत्तिविधित्वे तु "दध्ना जुहोति" "पयसा जुहोति" इत्यादिवाक्यस्य सर्वस्यापि तत्र खले(२) कपोतन्यायेन युगपद्दध्यादिगुणविधायकत्वेनाप्युपपत्त्या नानेकादृष्टकल्पनाप्रसङ्ग इत्यग्निहोत्रं जुहोतीत्यस्यैवोत्पत्तिविधित्वं न्याय्यमित्यलमतिविस्तरेण ।

तृतीयाध्यायस्यार्थभूतं शेषशेषिभावं निरूपयितुमिदानीं विनियोगविधिं लक्षयति । अङ्गप्रधानेति । अङ्गानां द्रव्यदेवतादिलक्षणानां प्रधानैर्क्रियान्तरविहितैः सह सम्बन्धस्य शेषत्वलक्षणस्य बोधको विधिरित्यर्थः । तत्रोदाहरणमाह । यथा दध्नेति । दध्ना जुहोतीति पयसा जुहोतीत्यादेरुपलक्षणार्थम् । स हि विधिस्तृतीयया प्रतिपन्नाङ्गभावस्य दध्यादेरग्निहोत्रं जुहोतीति विहितहोमसम्बन्धं विधत्त इत्याह । स हीत्यादिना । ननु दध्ना होमं भावयेद्धोमेनेष्टं भावयेदिति साध्यत्वेन करणत्वेन च होमस्यान्वयः स्यात्–तथाच विरुद्धत्रिकद्वयप्रसङ्गः तथाहि–दध्ना जुहोतीत्यत्र सकृदुच्चरितस्य

---

(१) उत्पत्तिशिष्टोत्पन्नशिष्टयोर्मध्ये उत्पत्तिशिष्टस्यैव प्रबलत्वेन तेनैव दुर्बलस्योत्पन्नशिष्टस्य बाधौचित्यादितिभावः ।

(२) वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत्पतन्ति । तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति इत्युक्तन्यायेन सर्वेषां गुणवाक्यानां युगपदेवान्वयबोधकत्वान्नानेकादृष्टकल्पनाप्रसङ्ग इति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जुहोतीत्याख्यातस्य दधिरूपगुणे किञ्चिदिष्टे च तन्त्रेण सम्बन्धाङ्गीकारे सत्युपादेयत्वं विधेयत्वं गुणत्वं चेत्येकं त्रिकमुद्देश्यत्वमनुवाद्यत्वं प्राधान्यं चेत्यपरं त्रिकं होमे सम्पद्यते, कथं ? शृणु, फलमुद्दिश्य होम उपादीयते फलमनूद्य होमो विधीयते फलं प्रधानं होम उपसर्जनम् । एवं होममुद्दिश्य दध्युपादीयते होममनूद्य दधि विधीयते होमः प्रधानं दध्युपसर्जनम् । ततश्च होमे फलापेक्षयोपादेयत्वं विधेयत्वं गुणत्वं दधिरूपगुणापेक्षया चोद्देश्यत्वमनुवाद्यत्वं प्राधान्यं च सम्पद्यते । नचात्र न तन्त्रेण सम्बन्धः—किन्तु पृथक् होमावृत्त्या सम्बन्धो भवतीति वाच्यम् । वाक्यभेदप्रसङ्गात् दध्ना होमं भावयेत् होमेन चेष्टं भावयेदिति वाक्यद्वयप्राप्तेः तस्मान्न दधिशब्दो गुणपर इति चेन्न । भ्रान्तिमत्वात् । तथाहि यत्र हि साध्यत्वेन करणत्वेन चैकस्य युगपत्तन्त्रेण सम्बन्ध आशङ्क्यते तत्रैव विरुद्धत्रिकद्वयस्य प्रसक्तिर्भवति यथा "वाजपेयेन स्वाराज्यकामो यजेत" इत्यत्र, तत्र च वाजशब्दस्य पेयसुराद्रव्यवाचित्वेन गुणविध्याशङ्कायां मत्वर्थलक्षणाप्रसङ्गाक्षेपे तन्त्रेण युगपत्स्वाराज्यफलवाजपेयगुणसम्बन्धो यागस्य पूर्वपक्षितः, तत्र विरुद्धत्रिकद्वयप्रसङ्गापादनेन यथोक्तद्रव्यानिमित्तं वाजपेयशब्दस्य नामधेयत्वं राद्धान्तितम् । विरुद्धत्रिकद्वयप्रसङ्गश्च फलमुद्दिश्य याग उपादीयते फलमनूद्य यागो विधीयते फलं प्रधानं याग उपसर्जनं, एवं यागमुद्दिश्य वाजपेय उपादीयते यागमनूद्य वाजपेयो विधीयते । यागः प्रधानं वाजपेय उपसर्जनं, फलस्योद्देश्यत्वं च मानसापेक्षो विषयत्वाकारः । यागस्योपादेयत्वं त्वनुष्ठीयमानत्वाकारः । तौ चोभौ मनःशरीरोपाधिकौ धर्मौ भवतः । अनुवाद्यत्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावस्य दध्नो होमसम्बन्धं विधत्ते दध्ना होमं भावयेदिति । गुणविधौ च धात्वर्थस्य साध्यत्वेनान्वयः ।

विधेयत्वे तु शब्दोपाधिकौ धर्मौ स्तः । अनुवाद्यत्वं नाम मानान्तरज्ञातस्यानुकथ्यमानत्वं, विधेयत्वं चाज्ञातस्यानुष्ठेयत्वेन प्रतिपाद्यमानत्वम् । फलस्य प्राधान्यं (नाम) साध्यत्वेन, यागस्योपसर्जनत्वं च साधनत्वेन बोध्यम् । तथा यागस्योद्देश्यत्वं नाम मानान्तरसिद्धस्य विधेयान्वयितया निर्देश्यत्वमन्यत् यथोक्तम् । नचैवं होमे विरुद्धत्रिकद्वयप्रसङ्गः, तस्य साध्यत्वेन साधनत्वेन चात्र विधौ युगपत्तन्त्रेणान्वयानङ्गीकारात्—किन्तु साध्यत्वेनैव, तथाच होमस्योद्देश्यत्वमनुवाद्यत्वं प्रधानत्वमेव, न तूपादेयत्वादिकं, तस्मान्न विरुद्धत्रिकद्वयापत्तिरित्याशयेनाह । गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वय इति । धात्वर्थस्य—यागदानहोमादेः । साध्यत्वेनैवेत्यनेन साधनत्वेनान्वयं वारयति । साधनत्वेनान्वयस्तु धात्वर्थस्योत्पत्तिविधावधिकारविधौ च भवति न तु गुणविधावित्यर्थः । ननु गुणविधौ धात्वर्थस्य साध्यत्वेनैवान्वये "दध्नेन्द्रियकामस्य जुहुया"दित्यत्र दध्ना होमं भावयेदिन्द्रियकामस्येति वाक्यार्थः स्यात् तथाचेन्द्रियस्य साध्यत्वेनानन्वये तस्याफलत्वप्रसङ्गः । न च नात्र गुणविधिः गुणपदस्यानर्थकत्वप्रसङ्गात्, होमस्योभयरूपेणान्वये तु पूर्वोक्तदोषापत्तिश्चेत्याशङ्क्याह । क्वचिदित्यादिना । यद्वा-गुणविधौ धात्वर्थस्य साध्यत्वेनैवान्वयो नान्यथा यत्र तु तृतीययोपात्तं दध्यादिगुणकरणत्वं तस्य प्रत्ययार्थत्वेन दध्यादिगुणादपि प्रधानत्वात्फलभावनायां करणत्वेन विधीयते तत्र तु धात्वर्थस्याश्रयत्वेनैवान्वय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्वचिदाश्रयत्वेनापि । यथा "दध्नेन्द्रियकामस्य जुहुया"दित्यत्र दधिकरणत्वेनेन्द्रियं भावयेत् । तच्च किन्निष्ठमित्याकाङ्क्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति ॥

इत्याह । क्वचिदित्यादिना । क्वचिदिति । यत्र दध्यादिगुणकरणत्वस्य फलभावनायां करणत्वेन विधानं तत्रेत्यर्थो न तु गुणविधाविप्यर्थः । तच्चेति । तृतीययोपात्तं दधिकरणत्वं चेत्यर्थः । होमाश्रयदधिकरणत्वेनेन्द्रियं भावयेदिति वाक्यार्थः । तथाच करणस्य कर्तृव्यापारव्याप्यत्वनियमात्केवलदध्नः कर्तृव्यापारानाविष्टस्य करणत्वानुपपत्तेः, होमस्य च वाक्यान्तरप्राप्तत्वात्तयोर्विध्यनुपपत्तेः होमस्य गुणसम्बन्धाविधाने फलपदस्यानर्थकत्वप्रसङ्गात्तस्य फलसम्बन्धविधौ च गुणपदस्यानर्थक्यापातात्फलगुणोभयसम्बन्धविधौ च प्राप्ते कर्मण्यनेकपदार्थविधाने वाक्यभेदप्रसङ्गात् प्राप्ते कर्मण्यनेकपदार्थविधानस्य च वाक्यभेदापादकस्य—

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवो ऽप्येकयत्नत"

इति वचनविरोधेन स्वीकर्तुमशक्यत्वात्तृतीययोपात्तस्य दधिकरणत्वस्य होमनिरूपितत्वेन फलभावनायां करणत्वमत्र विधीयत इति भावः । प्राप्ते कर्मणीत्यत्र कर्मणो द्रव्याद्युपलक्षणत्ववद्गुणस्यापि प्रधानोपलक्षणत्वमेकोद्देशेनानेकाविधावेव वाक्यभेदात् । अतएव ग्रहैकत्वाधिकरणे(१) "ग्रहं स-

---

(१) तृतीयाध्याये १ पादे ७ अधिकरणे निर्णीतम्—दशापवि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म्मार्ष्टी” त्यत्र ग्रहोद्देशेनैकत्वसम्मार्जनविधौ वाक्यभेदात् ग्रहैकत्वमविवक्षितमित्युक्तम् । तेन दध्नेन्द्रियकामस्य जुहुयादित्यत्रेन्द्रियसम्बन्धस्य प्रधानसम्बन्धत्वेपि न क्षतिः । ननु कर्मणो द्रव्योपलक्षणत्वं भवतु ग्रहस्य द्रव्यत्वात्, गुणस्य प्रधानोपलक्षणत्वं कुत्र चरितार्थमिति चेन्न । रेवत्यधिकरणे चरितार्थत्वात् । तत्र हि “एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति” तत्र च(१) पशुका-

---

त्रेण ग्रहं सम्मार्ष्टीति श्रूयते । दशापवित्रं नाम वासःखण्डः तत्र यथा पशुना यजेतेत्यत्रोपादेयपशुगतमेकत्वं विवक्षितं तद्वदुद्देश्यग्रहगतमप्येकत्वं विवक्षितव्यं किञ्च ग्रहशब्दस्य जातिवाचित्वेन जातेः संस्कार्यत्वे सति तदाश्रयभूते यस्मिन् कस्मिन्नपि द्रव्येऽनुष्ठितेन संस्कारेण जातिः संस्कृता भवति तस्मादेक एव ग्रहः शोधनीय इति प्राप्ते ब्रूमः ग्रहमिति द्वितीयया ग्रहस्योद्देश्यतया प्रयोजनवत्तया च प्राधान्यं गम्यते ग्रहं प्रति गुणः संमार्गः प्रतिप्रधानञ्च गुण आवर्तनीय इति न्यायेन यावन्तो ग्रहाः सन्ति ते सम्मार्जनीया एवं निश्चये सति सम्मार्जयितव्यग्रहेयत्ताया अबुभुत्सितत्वादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम् । अथोच्येत नेदमुद्देश्यगतं किन्तु स्वयं विधेयमिति । तन्न । वाक्यभेदापत्तेः ग्रहं संमृज्यात्तं चैकमित्येवं विधेयार्थभेदाद्वाक्यभेदः पशुनायजेतेत्यत्र तु यागं प्रति गुणभूतः पशुः नहि प्रतिगुणं प्रधानस्यावृत्तिरिति कश्चिन्न्यायोऽस्ति । तत इयत्ताया बुभुत्सितत्वात् श्रूयमाणमेकत्वं विवक्षितमिति वैषम्यं, नच जातिः संस्कार्या तस्या अमूर्तत्वात् ततो जातिद्वारा द्रव्यलक्षको ग्रहशब्दः तत्र चावृत्तिरुक्ता तस्मात् सर्वे ग्रहाः सम्मार्जनीयाः ।

(१) अग्निष्टोमस्य विकृतिरूपः कश्चिदेकाहोऽग्निष्टुन्नामकः स च पृष्ठस्तोत्रे त्रिवृत्स्तोमयुक्ततया त्रिवृदित्युच्यते अग्निष्टोमोक्थ्यादीनां सप्तानां सोमसंस्थानां मध्येऽग्निष्टोमसंस्थारूपत्वादाग्निष्टोम इत्युच्यते प्रकृतौ तृतीयसवन आर्भवपवमानस्योपरि यज्ञाय-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि । एतत्सहकृतेनानेन विधिनाऽङ्गत्वं परोद्देशप्रवृत्तकृतिसा-

---

मस्य "रेवतीर्नः सदमाध"इत्यादिरेवतीष्वृक्षु वारवन्तीयं साम गातव्यं तथाचात्र रेवतीनामृचां वारवन्तीयनामकेन साम्ना यः सम्बन्धः सोऽयं पशुफलायाग्निष्टुति गुणो विधीयते, एतस्यैवेत्यत्र प्रकृतपरामर्शकेनैतच्छब्देनान्यव्यावर्तकेन चैवकारेणाग्निष्टुतः समर्प्यमाणत्वादिति चेन्न । रेवत्यृगाधारकवारवन्तीयसाम्नोऽग्निष्टुत्कर्मसाधनत्वं पशुफलसाधनत्वं चेत्युभयस्य विधाने वाक्यभेदप्रसङ्गात्—ततश्च पशुफलकं रेवत्यृगाधारकवारवन्तीयगुणविशिष्टं कर्मान्तरमत्र विधीयते न प्रकृते गुणः—एतच्छब्दस्य तु बुद्धिस्थपरामर्शकत्वेनाप्युपपत्तेः। एवकारस्य चायोगव्यवच्छेदकत्वमन्ययोगव्यवच्छेदकत्वं वोपपद्यत इत्युक्तम् । तस्मात्प्राप्ते होमे गुणफलसम्बन्धोभयविधौ वाक्यभेदो दुष्परिहर इत्यलम् ।

एतस्य विधेरिति । लक्षितस्य विनियोगविधेरित्यर्थः। एतत्सहकृतेनेति । एतत्प्रमाणषट्कसहकृतेनेत्यर्थः । विनियोगविधिसहकारित्वं च तेषां विनियोगविधिकृतविनियोगे प्रमाणत्वाद्भवतीति बोध्यम् । अनेन विधिनाऽङ्गत्वं ज्ञाप्यत इत्यन्वयः । अङ्गत्वं लक्षयति । परोद्देशेत्यादिना ।

न्तीयं साम गीयते तेन च साम्नाऽग्निष्टोमयागस्य समाप्यमानत्वादग्निष्टोमसामेत्युच्यते तच्च प्रकृतौ यज्ञायज्ञावो अग्नये इत्याद्याग्नेयीष्वृक्षु गीयते । अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चसकामेन वायव्यास्वृक्षु तत्साम गातव्यं तच्च प्रकृताविवैकविंशस्तोमयुक्तम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वरूपं पारार्थ्यापरपर्य्यायं ज्ञाप्यते ।

यद्वा ननु न शेषत्वापरनामकस्याङ्गत्वस्य विनियोगविधिबोध्यत्वं सम्भवति तस्यानिरूपणात्, तदनिरूपणं च लक्षणप्रमाणाभावात् । न तावदविनाभूतत्वं तत्त्वं आग्नेयादीनां षण्णामविनाभूतत्वेन परस्परं शेषत्वापत्तेः । नापि प्रयोज्यत्वं शेषत्वं "पुरोडाशकपालेन तुषानुपवपती"त्यत्र तुषोपवापनं प्रति शेषत्वेन श्रुतस्यापि पुरोडाशकपालस्योपवापाप्रयोज्यत्त्वात् । नच विध्यन्तविहितत्वं शेषत्वमितिवाच्यम् । इषेत्वेतिच्छिनत्तीत्यत्र पलाशशाखाच्छेदनस्य सत्यपि शेषत्वे विध्यादिविहितत्वेनाव्याप्तिप्रसङ्गात् । नापि तत्र प्रत्यक्षं प्रमाणं लोकेतत्वेपि वेदे तस्य शब्दैकगम्यत्वोपगमात् । नापि शब्दः केनापि शब्देन शेषशेषिभावस्याप्रतीयमानत्वात् । लोके क्रियाकारकान्वयस्यैव व्युत्पत्तिप्रयोजकत्वदर्शनेन तत्र कस्यापि शब्दस्य व्युत्पत्त्यग्रहात् तत्र च न हेतुरप्युपलभ्यत इतिचेदत्रोच्यते । न तावदस्य लक्षणासम्भवः पारार्थ्यस्यैव निर्दुष्टशेषत्वलक्षणत्वात् । नापि तत्र प्रमाणाभावः शब्दगम्यत्वात् । नच तत्र व्युत्पत्त्यभावात्कथं शब्दगम्यत्वमिति वाच्यम् । शेषशेषिभावस्यान्वयेऽन्तर्भावात्तत्र व्युत्पत्त्युपपत्तेः । नहि गुणप्रधानभावमन्तरेणान्वयः सम्भवति द्वयोः प्रधानयोर्गुणयोर्वा परस्पराकाङ्क्षारहितत्वेनान्वययोग्यत्वाभावात् । ततो यथा क्रियाकारकतदन्वयाः शब्दगम्याः तथा तदन्वयान्तर्गतः शेषशेषिभावोपि शब्दगम्य एव । नापि तत्र हेतोरभावः विवादास्पदं प्रयाजानुयाजप्रोक्षणादि शेषो भवितुमर्हति पारार्थ्यात् भृत्यादिवदिति हेतुसत्वात् । नच पारार्थ्यस्यैव लक्षणत्वे हेतुत्वे च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साङ्कर्यप्रसङ्ग इति वाच्यम् । सेनानीमहारथिवदाकारभेदेन तद्भेदोपपत्तेः । दृष्टान्ते गृहीतव्याप्तिं हि सहायीकृत्य बोधकत्वाकारो हेतुरितरव्यावृत्त्या बोधकत्वाकारश्च लक्षणमिति तद्भेद इत्यभिप्रेत्याङ्गत्वं लक्षयति । परोद्देशेनेति । परं स्वर्गादिरूपमुत्कृष्टं साध्यं फलं तदुद्देशेन सङ्कलनया मनसि सिद्धवत्करणेन तत्साधनयागादिषु प्रवृत्तस्य पुरुषस्य कृतिसाध्यत्वरूपं कृतिव्याप्यत्वरूपमित्यर्थः । तथाच स्वर्गफलोद्देशेन दर्शादिषु प्रवृत्तपुरुषकृतिव्याप्यत्वं प्रयाजानुयाजावघातप्रोक्षणादीनां सुप्रसिद्धमिति तेषां शेषत्वम् । यद्वा परशब्दो दर्शादिपरः तथाच तदुद्देशेन प्रवृत्तपुरुषकृतिव्याप्यत्वं प्रयाजादीनां भवतीति तेषां तत्त्वं दर्शादेस्तु प्रयाजाद्युद्देशेन प्रवृत्तपुरुषकृतिव्याप्यत्वाभावान्न तत्रातिव्याप्तिः केवलप्रयाजाद्युद्देशेन कस्य चिदपि पुरुषस्य प्रवृत्त्यभावादिति ध्येयम्(१) । ननु "कर्माण्यपि जैमिनिः फलार्थत्वात्" तत् "फलं च पुरुषार्थत्वात्" "पुरुषश्च कर्मार्थत्वा" दित्यत्र जैमिनिसूत्रत्रये कर्मफलपुरुषाणामपि शे-

(१) ननु यदि परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यं शेषत्वं कथं तर्हि श्रुत्यादिगम्यं शेषत्वं भवेत् नहि सोमेन यजेतेति तृतीयया परोद्देशप्रवृत्तत्वं सोमस्योच्यते करणमात्राभिधानादिति चेदत्र ब्रूमः न श्रुत्यादयः परार्थत्वमभिदधीति ब्रूमः किन्तु विधिसहिताः पारार्थ्यं बोधयन्तीति, विधिरपि नाभिधानेन पारार्थ्यं गमयति किन्त्वर्थापत्त्या, सहि चेतनप्रवर्तनात्मा न चानुद्दिष्टफले व्यापारे चेतनः प्रवर्तयितुं शक्यते इत्यर्थाद्विधिविषयस्य व्यापारस्य फलोद्देशप्रवृत्तताऽवगम्यते फलार्थश्च व्यापारः फलवदेव पुरुषस्याभिलषित इति तत्साधनत्वेन श्रुत्यादिभिरवगतानां तत्साधनत्वेन च विधीयमानानां सोमादीनामपि तदुद्देशप्रवृत्तिः सिद्धा भवति तस्माद्युक्तं श्रुत्यादिगम्यं पारार्थ्यलक्षणं शेषत्वमिति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र निरपेक्षो रवः श्रुतिः । सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री च। तत्राऽऽद्या लिङा-द्यात्मिका । द्वितीया व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोक्त्री ॥

षत्वमुक्तं तत्र च कर्मणां फलोद्देशेन प्रवृत्तकृतिसाध्यत्वेपि फलपुरुषयोस्तु पुरुषकर्मोद्देशेन प्रवृत्तपुरुषकृत्यसाध्यत्वात्क-थं शेषत्वमितिचेदत्र वक्तव्यम् । स्वर्गस्य साक्षात्कृतिसाध्य-त्वाभावेपि यदा पुरुषः स्वस्वर्गोद्देशेन दर्शादिषु प्रयतते त-दैव कालान्तरेऽपूर्वद्वारेण स्वर्गोजायते नान्यथेति भवति पु-रुषकृतिव्याप्यत्वं तस्य, तथा स्वर्गफलोद्देशेन दर्शादुद्देशेन वा प्रवृत्तः पुरुषो यदैव तदनुष्ठानानुकूलं स्वं प्रयत्नेन सम्पा-दयति तदैव कर्म निष्पद्यते नान्यथेति तस्यापि भवति पु-रुषकृतिव्याप्यत्वमिति सर्वमनवद्यम् ।

तत्र श्रुतिं लक्षयति, तत्र निरपेक्षो रव इति । तत्र—षण्णां श्रुत्यादिप्रमाणानां मध्ये इत्यर्थः । स्व-करणीये शेषत्वबोधे प्रमाणान्तरनिरपेक्षः शब्दः श्रुतिरि-त्यर्थः । रव इत्युक्ते वाक्यादावतिप्रसङ्गस्तद्वारणाय निरपे-क्ष इत्युक्तम् । तां च श्रुतिं विभजते । सा च त्रि-विधेति । विधात्री–विधानकर्त्री, अभिधात्री–अभिधान-कर्त्री, विनियोक्त्री–विनियोगकर्त्री । तत्राद्यामुदाहरति । तत्राद्या लिङाद्यात्मिकेति । तत्र—तिसृणां श्रुतीनां म-ध्य इत्यर्थः । आदिना लेडादिग्रहः । अभिधात्रीमुदाहरति । द्वितीया व्रीह्यादीति । तृतीयां विनियोक्त्रीं लक्षयति । यस्य चेत्यादिना । सम्बन्ध इति । विनियोज्यविनियो-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सापि त्रिविधा—विभक्तिरूपा एकाभिधानरूपा एकपदरूपा चेति। तत्र विभक्तिश्रुत्या अङ्गत्वम्। यथा "व्रीहिभिर्यजेत" इति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। तदपि पुरोडाशप्रकृतितया-यथा पशोर्हृदयादिरूपहविःप्रकृतितया यागाङ्गत्वम्। "अरुणया पिङ्गाक्ष्या

जकभावः सम्बन्ध इत्यर्थः। शेषशेषिणोः सम्बन्ध इति वा शेषः। विनियोक्त्रीमपि श्रुतिं विभजते। सा त्रिविधेति। तत्र विभक्तिरूपां विनियोक्त्रीमुदाहरति। तत्रेति। यद्वा ननु विनियोक्त्र्याः श्रुतेर्लक्षणविभागावनुपपन्नौ तस्या अङ्गत्वाबोधकत्वादित्याशङ्क्य तत्र विभक्तिश्रुतेरङ्गत्वबोधकत्वं दर्शयति। तत्रेति। तिसृणां विनियोक्त्रीणां मध्य इत्यर्थः। विभक्तिश्रुत्याऽङ्गत्वं बोध्यत एव तथोपलब्धेरिति शेषः। कुत्रोपलम्भ इति वीक्षायां तत्रोदाहरणमाह। यथा व्रीहिभिरिति। तदपीति। व्रीहीणां यागाङ्गत्वमपीत्यर्थः। व्रीहीणां पुरोडाशप्रकृतितया यागाङ्गत्वे दृष्टान्तमाह। यथा पशोरिति। "अथ हृदयस्याग्रे ऽवद्यत्यथ वक्षस" इत्यादि शास्त्रात्पशोर्हृदयादिरूपहविरुपादानतयैव यागाङ्गत्वं न साक्षात् तद्वदत्रापीत्यर्थः। क्वचित्तु साक्षात्पशोरेव यागाङ्गत्वं यथा पात्नीवद्यागे, तत्र हि पशोराग्नेयस्य जीवत एवोत्सर्गः क्रियते "पर्यग्निकृतं पात्नीवन्तमुत्सृजन्ती"ति वाक्यात्। तथाच यत्र पशोर्विशसनं हृदयाद्यवदानं च भवति तत्र हृदयादिप्रकृतिरेव पशुरिति सिद्धम्। तृतीयाविभक्तिरूपाया विनियोक्त्र्या उदाहरणान्तरमाह। आरुण्यस्यापीत्यादिना। "अरुणया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकहायन्या गवा सोमं क्रीणाति" इत्यस्मिन् वाक्ये आरुणयस्यापि तृतीयाश्रुत्या क्रयाङ्गत्वम् । तदपि गोरूपद्रव्यपरिच्छेदद्वारा, न तु साक्षात् अमूर्तत्वात् ।

पिङ्गाक्ष्या एकहायन्या सोमङ्क्रीणातीति" ज्योतिष्टोमप्रकरणे श्रुतस्यारुणिमगुणस्येत्यर्थः । क्वचित्पुस्तके मूलग्रन्थ एवेदं वाक्यमुदाहृतम् । अत्रारुणाशब्दोऽरुणिमानं गुणमाचष्टे तस्य गुणविषयतया प्रयुक्तस्यापि नागृहीतविशेषणा विशिष्टबुद्धिरिति न्यायेन गुणबोधकत्वादन्वयव्यतिरेकसिद्धगुणमात्रव्युत्पत्तिकत्वाच्च, पिङ्गाक्षीशब्दस्तु पिङ्गलवर्णविशिष्टाक्षिमद्द्रव्यवाचको भवति एकहायनीशब्दश्चैकसंवत्सरविशिष्टगोद्रव्यवाचकः। तौ च शब्दौ यद्यप्येकगोवाचकौ भवतस्तथापि विशेषणभूतधर्मभेदाच्छब्दद्वयमुपपद्यते तच्च युगपत्प्रवृत्तं सद्धर्मद्वयविशिष्टं गोद्रव्यं क्रयसाधनत्वेन विधत्ते । अरुणशब्दस्त्वरुणिमगुणस्य कारकाणां क्रियान्वयनियमेन सोमक्रयणान्वयेपि साक्षात् तत्साधनत्वेनामूर्तमरुणिमानं गुणं न विदधात्यमूर्तस्य साक्षात्तत्साधनत्वासम्भवात्, किन्तु सोमक्रयणसाधनीभूतगोद्रव्यपरिच्छेदकत्वेन तत्साधनं, तथाच परस्परमनन्वितानामेवाऽऽरुण्यपिङ्गाक्षीत्वादीनां कारकाणां क्रियान्वयनियमात्करणविभक्तिभिः सोमक्रयणेऽङ्गत्वेनान्वये सत्यारुण्यादेश्च गुणत्वेनामूर्तस्य स्वतः सोमक्रयणसाधनत्वायोगात् तत्साधनगोद्रव्यपरिच्छेदकत्वेन पश्चात्परस्परं पाष्ठिकान्वयो भवति या एकहायनी गौः सा पिङ्गाक्ष्यरुणा चेत्याशयवानाह । तदपीति । क्रयाङ्गत्वमपीत्यर्थः । द्वितीयारूपां विनियोक्त्रीं श्रुति-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तन्त्रश्रुति २
द्वितीया २
लक्ष्मी

व्रीहीन्प्रोक्षतीति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या। तच्च प्रोक्षणं न व्रीहिस्वरूपार्थम् तस्य तेन विनाप्युपपत्तेः, किन्त्वपूर्वसाधनत्वप्रयुक्तं व्रीहीनप्रोक्ष्य यागानुष्ठानेऽपूर्वानुपपत्तेः । एवं सर्वेष्वङ्गेष्वपूर्वप्रयुक्तमङ्गत्वं बोध्यम् । "एवमिमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र द्वितीयाश्रुत्या म-

---

मुदाहरति । व्रीहीन्प्रोक्षतीति । तच्चेति । प्रोक्षणस्य व्रीह्यङ्गत्वं चेत्यर्थः । तच्चेत्यस्यापूर्वसाधनत्वप्रयुक्तमित्यनेनान्वयः । प्रोक्षणं व्रीहिस्वरूपार्थमेव स्यादिति कुतस्तस्यापूर्वप्रयुक्तं व्रीह्यङ्गत्वमित्यत आह । प्रोक्षणं नेति । प्रोक्षणस्य व्रीहिस्वरूपार्थत्वाभावे हेतुमाह । तस्येत्यादिना । तस्य—व्रीहिस्वरूपस्य । तेन विना—प्रोक्षणेन विनेत्यर्थः । ननु यागानुष्ठानेनैवापूर्वसिद्धौ किं प्रोक्षणेन व्रीहिस्वरूपानुपयोगिनेत्यत आह । व्रीहीनप्रोक्ष्येति । अनुपनीतानुष्ठितवेदाध्ययनस्यापूर्वाजनकत्ववद्व्रीहीणां प्रोक्षणमकृत्वा तैरनुष्ठितस्य यागस्यापूर्वजनकत्वानुपपत्तेरित्यर्थः । प्रोक्षणे सिद्धमपूर्वसंयुक्तं व्रीह्यङ्गत्वमन्यत्रातिदिशति । एवमित्यादिना । एवं दर्शपूर्णमासप्रकरणसहकृतया द्वितीयाश्रुत्या प्रोक्षणस्य तण्डुलनिष्पत्तिप्रणालिकया व्रीहीणामपूर्वसाधनत्वप्रयुक्ताङ्गत्ववत्सर्वेषामङ्गानामवघातादीनां तत्तत्प्रमाणवशादपूर्वसाधनत्वप्रयुक्तमेवाङ्गत्वमित्यर्थः । द्वितीयारूपाया विनियोक्त्र्याः श्रुतेरुदाहरणान्तरमाह । एवमित्यादिना । एवं द्वितीयाश्रुत्या प्रोक्षणस्य व्रीह्यङ्गत्ववदित्यर्थः । ऋतस्येति । सत्यफलस्येत्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्त्रस्याश्वाभिधान्यङ्गत्वम् । यदाऽऽहवनीये जुहोतीत्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या । एवमन्योपि विभक्तिश्रुत्या विनियोगो ज्ञेयः । पशुना यजेतेत्य-

---

तथा च सत्यफलसम्बन्धिनीं रशनामिमां गृहीतवन्त इति मन्त्रार्थः । अश्वाभिधान्यङ्गत्वमिति । अश्वाभिधान्या अश्वरशनाया अङ्गत्वमित्यर्थः । केचित्तु वाक्यीयमिमं विनियोगमाहुः । अन्येतु वाक्याल्लिङ्गस्य बलीयस्त्वेन यावद्वाक्यादश्वाभिधान्यङ्गत्वं भवति तावद्रशनामात्राङ्गत्वमेव स्यादिति तत्र दूषणमाहुः । वाक्यविनियोगवादिनस्तु मन्त्रस्य न रशनामात्रप्रकाशकत्वं किन्तु ऋतस्य सत्यफलसाधनभूतस्याश्वस्येमां रशनां गृहीतवन्त इत्यश्वरशनाप्रकाशत्वमेवेति लिङ्गसहकृतादश्वाभिधानीमादत्त इति वाक्यान्मन्त्रस्याश्वरशनादाने विनियोग इति स्वाशयमाहुः । रशनाविशेषस्य न लिङ्गमिति तु मूलग्रन्थतात्पर्यम् । सप्तमीविभक्तिरूपां विनियोक्त्रीं श्रुतिमुदाहरति । यदाहवनीय इति । एवमन्योऽपीति । "दध्नाजुहोति" "पयसा जुहोती"त्यादौ होमानुवादेन दध्यादेस्तदङ्गत्वेन तृतीयाविभक्तिश्रुत्या विनियोग इत्यर्थः । एकाभिधानरूपामेकपदरूपां च विनियोक्त्रीं श्रुतिमुदाहरति । पशुना यजेतेति । पशुनेत्यत्रैकपदश्रुत्या ह्येकत्वपुंस्त्वयोः पशुद्रव्याङ्गत्वमेकाभिधानश्रुत्या च कारकाङ्गत्वं च भवति, यजेतेत्यत्राप्याख्याताभिहितसङ्ख्याया एकाभिधानश्रुत्या भावनाङ्गत्वमेकपदश्रुत्या च यागाङ्गत्वं च भवतीति भावः। यजेतेत्याख्याताभिहितसंख्यायाः समानाभिधा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम् । यजेतेत्याख्याताभिहितसङ्ख्याया आर्थीभावनाङ्गत्वं

नश्रुतेरेव भावनाङ्गत्वमिति सम्बन्धः। समानाभिधानश्रुतेरेवेति । एकशब्दरूपप्रत्ययश्रुतेरेवेत्यर्थः । अभिधीयतेऽनेनेतिव्युत्पत्त्याऽभिधानशब्देन शब्द उच्यते । पदश्रुत्या चेति । यजेतेत्येकपदश्रुत्या चेत्यर्थः ।

अत्रेदम्बोध्यम्—यथा "दशापवित्रेण ग्रहं सम्मार्ष्टी"त्यत्रैकत्वमुद्देश्यतगतत्वेनाविवक्षितं तथा प्रकृते नोद्देश्यगतमेकत्वं किन्तु विधेयगतत्वेन विवक्षितमेव । नच ग्रहं सम्मार्ष्टीत्यत्र नोद्देश्यगतमेकत्वं किन्तु स्वयं विधेयमिति वाच्यम् । ग्रहं सम्मृज्याद्यं संमृज्यात्तं चैकमिति वाक्यभेदप्रसङ्गात् । तथा च ग्रहमिति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्प्रयोजनवत्त्वाच्च प्राधान्यङ्गम्यते, सम्मार्गस्तु ग्रहं प्रति गुणभूत एव ततश्च प्रतिप्रधानं गुण आवर्तनीय इति न्यायाद्यावन्तो ग्रहास्तावतां सर्वेषां सम्मार्ग इति निश्चये सति कति ग्रहाः सम्मार्जनीया इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमपि न विवक्ष्यते, यस्य च विशेषणस्य विवक्षामन्तरेणोद्देश्यप्रत्ययो न पर्यवस्यति तादृशं विशेषणमुद्देश्यगतमपि विवक्ष्यत एव यथा तत्रैव ग्रहत्वं तद्विवक्षामन्तरेण चोद्देश्यस्वरूपं ज्ञातुमशक्यमेव उद्देश्यतावच्छेदकानिर्णयमन्तरेण चमसेष्वपि सम्मार्गप्रसङ्गात् । तेन च तत्र तद्धारणं फलम् । पशुना यजेतेत्यत्र तु यागं प्रति पशोर्विधेयत्वेन गुणभूतत्वात्प्रतिप्रधानं गुण आवर्तनीय इति न्यायप्रवेशो नास्ति, यागस्य च प्रधानत्वादिति कियता पशुना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समानाभिधानश्रुतेरेकपदश्रुत्या च यागाङ्गत्वम् । न चामूर्तायास्तस्याः कथं भावनाङ्गत्वमिति वाच्यम् । कर्तृपरिच्छेदद्वारा तदुपपत्तेः । कर्ता चाक्षेपलभ्य

यागः कर्तव्य इति बुभुत्सायाः सत्त्वादेकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितमेव । किञ्च लिङ्गसङ्ख्याविशेषितस्यैकपदोपात्तस्य पशुद्रव्यरूपकारकस्य विधेयपशुद्वारा तत्तल्लिङ्गसङ्ख्यादेरपि क्रियाङ्गत्वादेकत्वादिकं विवक्षितम् । किञ्च तृतीयया विभक्त्याऽभिहितयोर्लिङ्गसङ्ख्ययोर्विभक्त्यभिहिततया करणकारकशक्त्याऽऽत्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण सह सम्बन्धमनादृत्य पशुवदेव साक्षाद्यागक्रियाङ्गत्वेन विधौ पश्चादरुणैकहायनीन्यायेन वा परस्परमन्वयोपि भवति यो यागाङ्गत्वेन विहितः पशुः स एकः पुमांश्चेति तस्मात्सर्वथा पश्वेकत्वादिकं विवक्षितमेवेति ।

ननु सङ्ख्याया न यागाङ्गत्वं भावनाङ्गत्वं च भवति गुणत्वेनामूर्तत्वात्—नह्यमूर्तस्य रूपादेः कुत्र चिदङ्गत्वं दृश्यते व्रीह्यादिद्रव्यस्यैव मूर्त्तभूतस्य ह्यङ्गत्वमित्याशङ्क्य परिहरति । नचेत्यादिना । भावनाया यागस्याप्युपलक्षणत्वम् । नचेति प्रतिषेधे हेतुमाह । कर्त्रिति । कर्तुरर्थभावनारूपव्यापारवतो यागकर्तुः—परिच्छेदद्वारा—सङ्ख्याया भावनाद्यङ्गत्वोपपत्तेरित्यर्थः । नन्वेवं समानाभिधानश्रुत्या साक्षादेव कर्तरि सङ्ख्याऽऽख्यातार्थभूताऽन्वेतु तस्यैवाख्यातार्थत्वात् भावना तु कर्तृव्यापारभूता धातुनापि लभ्यते, तथाचोक्तम्—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः” इति ।

फलं—विक्लित्यादि, व्यापारस्तु भावनाऽभिधा, तत्र धातुः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मृतः, आश्रये तु—फलाश्रये कर्मणि व्यापाराश्रये कर्तरि च तिङः स्मृता इति वैयाकरणवृद्धवचनपदार्थः । न च कर्तुराख्यातवाच्यत्वमप्रामाणिकमिति वाच्यम् । "लः कर्मणि च भावे चाकर्मकेभ्य" इति मुनिप्रणीतसूत्रस्यैव चकारात्कर्त्तरिकृदिति सूत्रोक्तकर्तरीत्यनुकर्षणेन लकाराणां सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि चाकर्मकेभ्यश्च भावे कर्तरि च विधायकस्य प्रमाणत्वात् । तस्मात्कर्तर्येव समानाभिधानश्रुत्या ऽऽख्यातार्थसङ्ख्या सम्बध्यते न भावनायामित्याशङ्क्याह । कर्ता चाक्षेपलभ्य इति । आक्षेपोऽनुमानमर्थापत्तिर्वा, तादृशाक्षेपेण लभ्यः—अनुमेयः—कल्प्यो वेत्यर्थः । तथा च भावना साश्रया गुणत्वाद्व्यापारविशेषत्वाच्च सम्प्रतिपन्नगुणवत्तादृशव्यापारविशेषवच्च तथा लोके व्यापारविशेषस्य निराश्रयस्यादर्शनाद्भावनारूपो व्यापारविशेषोऽप्यन्यथाऽनुपपद्यमानः स्वाश्रयमाक्षिपतीत्यर्थापत्तिः । न चाचेतनस्यैव कस्य चिदाश्रयस्य लाभ इति वाच्यम् । कृतिशब्दाभिधेयस्य भावनारूपव्यापारविशेषस्याचेतनाश्रयत्वानुपपत्तेः । किंच भावनाक्षिप्ते च कर्तर्याख्यातस्य लक्षणास्वीकारान्न शाब्द्याः सङ्ख्याया अशाब्देन कर्त्राऽन्वयानुपपत्तिः तस्यापि लक्षणया शाब्दत्वात् । शब्दगम्यत्वस्य हि शाब्दत्वात् । नच कर्तुरेवाख्यातवाच्यत्वेन भावनाया आक्षेपलभ्यत्वं स्यादिति वाच्यम् । कृतिमत एव कर्तृत्वेन कृतेरेव भावनापरनामधेयाया आकृत्यधिकरणन्यायेना(१)ख्यातवाच्यत्व-

(१) १ अध्याये ३ पादे १० अधिकरणे विचारितं व्रीहीनवहन्ति पशुमालभेत गामानय ब्राह्मणो न हन्तव्य इत्यादिप्रयोगेषु व्रीह्यादिशब्दानां कोऽर्थ इति संशये प्राप्तं व्यक्तिरेवार्थ इति अवहननादिक्रियाभिर्व्यक्तेरन्वेतुं शक्यत्वात् न ह्याकृतिरवहन्तुमालब्धुमपनेतुं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्भवे तद्गतः कर्तुराख्यातवाच्यत्वकल्पनायां गौरवात् । किञ्च यस्य हि प्रकारान्तरेणालाभः स एव शब्दस्यार्थो भवति नतु तदन्यः शब्दवाच्यार्थ अनन्यलभ्यः शब्दार्थ इति न्यायात् । अत एव न तीरं गङ्गापदार्थः तस्य लक्षणयैव प्रतिपन्नत्वात् एवं चोक्तन्यायेन भावनाया आख्यातवाच्यत्वे सम्प्रतिपन्ने तया च कर्तुराक्षेपेण लाभे पुनरपि तस्याख्यातवाच्यत्वकल्पनं न न्यायविदां शोभते । नच "लः कर्मणि च भावे चाकर्मकेभ्य" इति मुनिस्मरणबलादेव कर्तुराख्यातवाच्यत्वं न स्वयं कल्पितमिति युक्तम्। वाच्यवाचकभावस्योक्तन्यायसहकृतान्वयव्यतिरेकगम्यत्वेन तस्य मुनिस्मरणाप्रयोज्यत्वात् तत्र कर्तृकर्मपदयोः कर्तृत्वकर्मत्वपरत्वेन तस्य कृतिकर्मत्वयोर्लकारविधायकत्वसम्भवाच्च । किञ्च नास्य स्मरणस्य कर्तुराख्यातवाच्यत्वे प्रमाणत्वं सम्भवति "द्व्येकयोर्द्विवचनैकवचने" "बहुषु बहुवचनम्" इत्यनेन सूत्रेण तस्य स्मरणस्यैकवाक्यत्वेन कर्तुरेकत्व एकवचनात्मको लकारो द्वित्वे द्विवचनात्मको लकारो भवेदित्य-

---

वा योग्या। नन्वानन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः सम्भवति अनन्ता हि गोव्यक्तयः अतीतानामनागतानामनेकदेशवर्तिनां गवामियत्ताया अनवधारणात् किं च शुक्लव्यक्तौ व्युत्पन्नो गोशब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थं व्यभिचरेत् तत्र कथं व्युत्पत्तिरिति चेत्। एवं तर्हि व्युत्पत्तिकाले सा व्यक्ति राकृत्योपलक्ष्यतामिति प्राप्ते ब्रूमः अन्वयव्यतिरेकाभ्यामाकृतेः शक्तिग्रहणनिमित्तत्वाच्छब्दार्थत्वं तस्या एवोचितं किञ्च गोशब्द उच्चारिते व्यक्तिवादिनः संशयो भवेत् तस्मादाकृतेरेवाभिधेयत्वम् । यद्याकृतावहननादिक्रिया न पर्यवस्येत् तर्हि व्यक्ति स्तत्रोपलक्षणीया किञ्च श्येनचितं चिन्वीतेत्यादावाकृतेरेव सादृश्यप्रतियोगितया कार्यान्वयो दृश्यते तस्मादाकृतिः शब्दार्थ इति ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मिन्नेवार्थे प्रमाणत्वात् । नच कर्तुराख्यातानभिधेयत्वे देवदत्तेन पचतीति प्रयोगापत्तिरनभिहितयोः कर्तृकरणयोस्तृतीयाया एव विहितत्वादिति वाच्यम् । उक्तन्यायेन कर्तुर्भावनयैवाक्षेपात्तद्गतसङ्ख्यायाश्चाख्यातेनैव प्रतीतेस्तृतीयायाः कर्तृप्रतिपत्त्यर्थत्वतद्गतसङ्ख्याप्रतिपत्त्यर्थत्वयोरसम्भवात् । तथाचोक्तं वृद्धैः—

"सङ्ख्यायां कारके वा धीर्विभक्त्या हि प्रवर्तते ।
उभयं चात्र तत्सिद्धं भावनातिङ्विभक्तित" इति ।

नच कृतामपि ण्वुल्तृजादीनां कर्तृवाचकत्वं न स्यात्तत्र मानस्य वक्तव्यत्वादिति वाच्यम् । कर्तरिकृदिति मुनिप्रणीतसूत्रस्यैव तेषां तत्र शक्तिग्राहकत्वात् । ननु तर्हि "कर्तरि कृ"दिति सूत्रादेव लःकर्मणीत्यत्र कर्तृपदमनुवर्तते तथाच तत्र तस्य धर्मिपरत्वेऽत्रापि तत्परता न्याय्याऽत्र धर्मपरतायां तु तत्रापि धर्मपरतैव स्यादिति चेन्न । शब्दाधिकाराश्रयणादनुवर्तितस्य कर्तृपदस्य धर्मपरतायां बाधकाभावात् । नच शाब्दाधिकाराश्रयस्य गमकमन्तरेणासम्भवात्कृतामिवाख्यातस्यापि कर्तृवाचित्वमेवास्त्विति वाच्यम् । कृतिमत इत्यादिना तत्र गमकस्य दर्शितत्वात् । तथाच कृतिशब्दाभिधेयस्य कर्तृधर्मस्याख्यातवाच्यत्वे सिद्धे ऽनुवर्तितस्य कर्तृपदस्य धर्मपरत्वमेव न्याय्यं समुच्चयार्थकेन लःकर्मणिचेति सूत्रस्थचकारेणैव वा कर्तृधर्मस्यैव लाभो भवति न कर्तृपदानुवृत्तिः कर्तव्या कल्पनालाघवात्पूर्वोक्तन्यायेन कर्तृधर्मस्य भावनारूपस्याख्यातवाच्यत्वसिद्धेश्चेत्यलमतिविस्तरेण ।

तस्माद्भावनैवाख्यातवाच्या न कर्ता तद्वाच्य इत्यभिप्रे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आख्यातेन हि भावनोच्यते सा च कर्तारं विनाऽनुपपन्नेति ।

सेयं श्रुतिर्लिङ्गादिभ्यः प्रबला लिङ्गादिषु हि न प्रत्यक्षोविनियोजकः शब्दोऽस्ति, किन्तु कल्प्यो, यावच्च तैर्विनियोजकः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्व्याहतत्वात् । अत एवैन्द्र्या लिङ्गान्नेन्द्रोपस्थानार्थत्वं, किन्तु

त्याह । आख्यातेन हि भावनोच्यत इत्यादिना । सा-कर्तृव्यापाररूपा भावना, कर्तारं विनाऽनुपपद्यमाना पूर्वोक्तप्रकारेण कर्तारमाक्षिपतीत्यर्थः । एवं श्रुतेः प्रमाणान्तरानिरपेक्षविनियोजकत्वं निरूप्य तस्या लिङ्गादिभ्यः पञ्चभ्यः प्रमाणेभ्यः प्राबल्यमाह । सेयं श्रुतिर्लिङ्गादिभ्यः प्रबलेति । कुत इत्याकाङ्क्षायां तत्र हेतुमाह । लिङ्गादिषु न प्रत्यक्ष इत्यादिना । यावच्च लिङ्गादिभिर्विनियोजकः शब्दोऽर्थप्रकाशनादिना कल्प्यते तावत्प्रत्यक्षोपलब्धया श्रुत्या शेषिणा शेषसम्बन्धबोधस्य कृतत्वेन लिङ्गादीनां विनियोजकश्रुतिकल्पनद्वारेण विनियोगशक्तेः प्रतिबद्धत्वादित्यर्थः । तत्र लिङ्गाच्छ्रुतेः प्राबल्यासिद्ध्यैव तस्मादपि दुर्बलेभ्यो वाक्यादिभ्यस्तस्याः प्राबल्यसिद्धये तावल्लिङ्गात्प्राबल्यमुदाहरणं प्रदर्शयन्साधयति । अत एवेत्यादिना । अत एव लिङ्गादिभ्यः श्रुतेः प्रबलत्वादेव । ऐन्द्र्या इति षष्ठी । नेन्द्र सश्चसीतीन्द्रप्रकाशनसमर्थाया अपि ऋचो न लिङ्गादिन्द्रोपस्थानाङ्गत्वमित्यर्थः । ननु यदीन्द्रप्रकाशनसामर्थ्यरूपाल्लिङ्गादैंन्द्र्या ऋच इन्द्रोपस्थाना-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इत्यत्र गार्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्योपस्थानार्थत्वम् ॥

र्थत्वं न भवति तर्हि तत्रान्यप्रकाशनसामर्थ्यादर्शनेन तस्याः कस्य चिदप्युपस्थानार्थत्वासम्भवाद्वैयर्थ्यमेव स्यादित्याशङ्कते । किन्त्विति । यद्यपीन्द्रशब्दस्य गार्हपत्येऽग्नौ रूढिर्नास्ति तथापि तस्यैश्वर्यगुणयोगेन यागसाधनत्वेन वा मुख्येन्द्रसदृशत्वाद्गुणवृत्तिरस्ति तथाचैन्द्र्यास्तत्प्रकाशनसामर्थ्यस्यापि सत्वेन द्वितीयाश्रुत्या तदुपस्थानार्थत्वं निर्विघ्नमुपपद्यत इति समाधत्ते । ऐंद्र्या गार्हपत्यमित्यादिना । अत्रायमाशयः—"ऐंद्र्या गार्हपत्यमुपतिष्ठत" इति श्रूयते । तत्र च "कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे" । इत्यसावृगैन्द्री तत्रेन्द्रस्य प्रकाशात्, भो इन्द्र ? कदाचिदपि घातको न भवासि किन्त्वाहुतिं दत्तवते यजमानाय प्रीयस इति तस्या अर्थः । तत्रेन्द्रप्रकाशनसामर्थ्यरूपाल्लिङ्गान्मन्त्रस्येन्द्रविषयक्रियासाधनत्वं गम्यते । यद्यसौ मन्त्रः इन्द्रप्रधानक्रियायाः साधको न भवेत् तदानीमनेन मन्त्रेणेन्द्रप्रकाशनं व्यर्थं स्यात् तस्मादेतन्मन्त्रकरणकक्रियां प्रति इन्द्रः प्रधानमित्येतादृशबुद्ध्युत्पादनं लिङ्गविनियोगः, कासौ क्रियेति विशेषजिज्ञासायामैन्द्र्योपतिष्ठत इत्यनेनाविरुद्धपदद्वयरूपेण वाक्येनोपस्थानक्रियायां पर्यवसानं क्रियते । तथा सत्यैन्द्रमन्त्रेणेन्द्रमुपतिष्ठेतेत्ययमर्थः पर्यवस्यति । तथा गार्हपत्यमित्यनया द्वितीयान्तपदरूपया श्रुत्या गार्हपत्यस्य प्राधान्यं गम्यते। तच्च गुणभूतां यत्किञ्चित्करणकक्रियामन्तरेण न सम्भवति ततस्तादृशीं काञ्चित् क्रियां प्रति गार्हपत्यः प्रधानमित्येता-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हशब्दबुद्ध्युत्पादनं श्रुतिविनियोगः ऐन्द्र्योपतिष्ठत इति पदद्वये मन्त्रविशेषक्रियाविशेषयोः पर्यवसानं भवति तथासत्यैन्द्रमन्त्रेण गार्हपत्यमुपतिष्ठत इत्यर्थो भवति । यद्यपि प्रमाणत्वाविशेषाच्छ्रुतिलिङ्गयोर्विरोधे प्राप्ते व्रीहियववद्विकल्पः स्यात् इति प्रथमः पक्षः। इन्द्रगार्हपत्ययोः प्रधानत्वाविशेषादुपस्थानस्य च गुणत्वात्प्रतिप्रधानं गुणावृत्तिरितिन्यायेनोपस्थानावृत्त्या श्रुतिलिङ्गयोः समुच्चयो वा स्यात् इति द्वितीयः, श्रुतिर्विनियुञ्जाना वस्तुसामर्थ्यमनुसृत्यैव विनियुङ्क्ते अन्यथा वह्निना सिञ्चेद्वारिणा दहेदित्यपि विनियुज्येत, तस्मात्तदुपजीव्यत्वेन लिङ्गस्य प्रबलत्वादिन्द्र एव मन्त्रेणोपस्थेयो वाक्यात् इति तृतीयः । तथाप्यैन्द्रमन्त्रस्य गार्हपत्येऽग्नौ मुख्यवृत्त्या सामर्थ्याभावेपि गुणवृत्त्या सामर्थ्यस्योक्तत्वात्सामर्थ्याभावकृतप्रतिबन्धाभावान्निर्विघ्ना श्रुतिराशु विनियुङ्क्ते, लिङ्गं तु विलम्बेन विनियुङ्क्ते । तथाहि—तत्र प्रथमं मन्त्रपदानि स्वाभिधेयार्थं प्रतिपादयन्ति, तत ऊर्ध्वं मन्त्रस्य वस्तुप्रकाशनसामर्थ्यं निरूप्यते । तत ऊर्ध्वञ्च तत्सामर्थ्यवशात्साधनत्ववाचिनी प्रधानत्ववाचिनी च श्रुतिः कल्प्यते। कल्पिता च श्रुतिः पश्चादैन्द्रमन्त्रेणेन्द्रमुपतिष्ठेतेति विनियुङ्क्ते इति मन्त्रपदाभिधेयप्रतिपादनविनियोगयोर्मध्यवर्तिनौ सामर्थ्यनिरूपणश्रुतिकल्पनव्यापारौ भवतः । प्रत्यक्षश्रुतिविनियोगपक्षे तु मन्त्रपदाभिधेयप्रतिपादनमात्रेण तस्या विनियोजकत्वसम्भवान्न तौ मध्यवर्तिनौ व्यापारौ भवत इति श्रुतेः प्राबल्यात् तया लिङ्गं बाध्यते । नच प्रत्यक्षश्रुतिविनियोगवेलायामलब्धात्मकत्वेनाप्राप्तं लिङ्गं श्रुत्या कथं बाध्यत इति वाच्यम् । तार्तीयबाधत्वेन भविष्यत्प्राप्तिप्रतिबन्धस्यैवात्र बाधत्वात् । बाधश्च द्विविधः—प्राप्तबाधो ऽप्राप्तबाधश्च । तत्र

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दशमे प्राकृतानामङ्गानां चोदकेन विकृतौ प्राप्तानां प्रत्याम्नानादर्थलोपात्प्रतिषेधाद्वा यो बाधः स प्राप्तबाधः–यथा चोदकप्राप्तानां प्राकृतानां कुशानां "शरमयं बर्हि"रिति प्रतिकूलशराम्नानाद्बाधः । यथा चावघातप्रयोजनस्य वैतुष्यरूपस्य लोपात्कृष्णलेष्ववघातस्य(१) बाधः। यथा च पित्र्येष्टौ "न होतारं वृणीत" इति प्रतिषेधाद्धोतृवरणस्य बाधः। अप्राप्तबाधस्तु तृतीयाध्याये यो बाधः, तत्र हि यावद्दुर्बलप्रमाणेन विनियोगः कर्तुमारभ्यते तावत्प्रबलप्रमाणेन विनियोगस्य कृतत्वादेव तेन वा तद्बोधितेन वेतरबाधोऽप्राप्तबाध एव, दुर्बलप्रमाणस्याप्रवृत्तत्वादेव, ततश्च कथञ्चित्प्राप्तभाविप्रवृत्तिप्रतिबन्धस्यैवात्र बाधत्वमिति सिद्धम् । तस्माद्द्वितीयया श्रुत्या विनियुक्तस्यैव मन्त्रस्य पुनर्विनियोगाकाङ्क्षाया अनुदयाद्विनियोजकं तस्यैव लिङ्गं न प्राप्स्यति तस्माद्गार्हत्योपस्थान एव मन्त्रः प्रत्यक्षश्रुत्यैव विनियुज्यते इति सिद्धम् ।

एवमग्निचयने समाम्नाता "निवेशनः सङ्गमन" इत्यादिकापि काचिदृगैन्द्री भवति तस्या उत्तरार्द्धे इन्द्रो न तस्थाविति पठनात् । सापि "निवेशनः सङ्गमनोवसूनामित्यैन्द्या गार्हपत्यमुपतिष्ठत" इति ब्राह्मणे तृतीययैन्द्र्येति श्रुत्या गार्हपत्योपस्थाने विनियुज्यते तस्या अपि पूर्वोक्तन्यायेन गार्हपत्यप्रकाशनसामर्थ्यस्य सत्वात् । नच मन्त्रस्थेन्द्रपदस्य गुणवृत्त्या गार्हपत्येऽग्नौ वृत्तत्वेपि रूढ्या तु स्वर्गाधिपतौ सहस्राक्ष इन्द्रे वृत्तत्वान्मन्त्रेण प्रकाशिते मुख्येन्द्रे मन्त्रब्राह्मणयोर्विवादपरिहाराय ब्राह्मणस्थगार्हपत्यशब्देन निरुक्तगुणसम्बधद्वारेणेन्द्रो लक्षणीय इति

(१) सुवर्णनिर्मितेषु माषेषु ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शब्दसामर्थ्यं लिङ्गम् । यथाहुः—

वाच्यम् । इन्द्रगार्हपत्यशब्दयोरन्यतरस्य गौणत्वे ऽवश्यम्भाविनि सति मन्त्रस्य प्राप्तार्थत्वेनानुवादकत्वसम्भवान्मन्त्रस्थेन्द्रपदस्यैव गौणत्वस्य न्याय्यत्वात् ब्राह्मणवाक्यस्याप्राप्तार्थत्वेन विधायकत्वाद्विधौ लक्षणाया अन्याय्यत्वाच्च । तस्माद्गार्हपत्यप्रकाशने समर्थमेव मन्त्रमैन्द्र्येति तृतीया श्रुतिर्गार्हपत्योपस्थाने विनियुङ्क्त इति सिद्धम् । एवं श्रुतेर्लिङ्गस्य दौर्बल्यवल्लिङ्गादेः पूर्वस्मात्पूर्वस्मात्परस्य परस्य वाक्यादेरेकविनियोज्यविषयत्वेन विरोधे दौर्बल्यं स्वार्थाववोधने परस्य पूर्वव्यवधानेन प्रवृत्तेः—तथाच सूत्रं "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा"दिति(१) !

एवं श्रुतिं निरूप्य लिङ्गं लक्षयति । शब्दसामर्थ्यमिति । लिङ्गमिति लक्ष्यानिर्देशः । सामर्थ्यं लिङ्गमित्युक्तेऽङ्कुरादिजननानुकूलबीजादिसामर्थ्ये तत्प्रसङ्गः स्यात्तद्वारणाय शब्देति विशेषणम् । सामर्थ्यं द्विविधं शब्दगतमर्थगतं चेति। तत्राद्यस्य लक्षणमत्रोक्तं तत्रैव वृद्धसम्मतिं प्रदर्शयन् तदर्थमाह । यथाऽऽहुरित्यादिना । अन्त्यं तु यथा "स्रुवेणावद्यती"त्यवदानसामान्यशेषत्त्वावगमेपि स्रुवस्य लिङ्गात्सामर्थ्य-

---

(१) जैमिनिसूत्रे ३ अ० पा०७ अ०-षण्णां मध्ये द्वयोर्विरुद्धयोः समवाये एकत्र सन्निपाते पारदौर्बल्यमुत्तरोत्तरं पूर्वपूर्वाद्दुर्बलं पूर्वेणोत्तरस्य बाधः अर्थविप्रकर्षात् उत्तरप्रमाणस्य पूर्वप्रमाणकल्पकत्वादर्थस्य विनियोगस्य विप्रकर्षात् विलम्बात् इत्यर्थः उदाहरणानि दर्शितान्येव ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते" । सामर्थ्यं रूढिरेव, तेन समाख्यातो नाभेदः । यौगिकशब्दसमाख्यातो रूढ्यात्मकलिङ्गशब्दस्य भिन्नत्वात् । "तेन बर्हिर्देवसदनं दामी"तिमन्त्रस्य कुश-

रूपादाज्यसान्नाय्यादि(१)द्रवद्रव्यावदानविशेषाङ्गत्वं, स्रुवेण मांसादिद्रव्यावदानस्य कर्तुमशक्यत्वादिति । ननु रूढिरूपस्य सामर्थ्यस्य समाख्यातो न भेदः स्यात् तथाच "बर्हिर्देवसदनन्दामि"इति मन्त्रस्योलपादिलवनाङ्गत्वमपि स्यादित्याशङ्क्याह । समाख्यातो भेद इति । रूढिरूपस्य सामर्थ्यस्येतिशेषः । यौगिकशब्दरूपसमाख्यातो रूढात्मकस्य लिङ्गशब्दस्य भेद एव प्रसिद्धेः, तथाच न तयोरभेद इत्यर्थः । समाख्यातो नाभेद इति पाठेपि स एवार्थः । रूढिरूपस्य सामर्थ्यस्य समाख्यातो भेदे फलितमाह । तेनेति । रूढिसमाख्ययोर्मिथोभेदेन पुरोडाशसदनभूतं बर्हिः खण्डयामीति श्रुतपदसामर्थ्याद्बर्हिर्देवसदनं दामीति मन्त्रस्य कुशकाशादिरूपाणां मुख्यबर्हिषां लवनाङ्गत्वं न तु समाख्यातोदर्भसदृशानामुलपादिरूपतृणविशेषाणां गौणबर्हिषां लवनाङ्गत्वमित्यर्थः । उक्तेऽर्थे हेतुमाह । तस्येत्यादिना । तस्येति । बर्हिर्देवेत्यादिमन्त्रस्येत्यर्थः । तल्लवनमिति । कुशलवनमित्यर्थः । एवमन्यत्रापीति । बार्हिर्देवसदनन्दामीति मन्त्रस्य कुशलवनाङ्गत्ववत् "अग्नयेजुष्टं निर्वपामी"त्यादिमन्त्रस्यापि निर्वापादिप्रकाशनसामर्थ्यरूपाल्लिङ्गान्निर्वापादौ विनियोग इत्यर्थः ।

अत्रेदं बोध्यम्—तस्य हि मन्त्रस्य निर्वापाङ्गत्वं स-

(१) सान्नाय्यं दधिपयसी ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लवनाङ्गत्वं न तूलपादिलवनाङ्गत्वं तस्य बर्हिर्दामीति लिङ्गात् तल्लवनं प्रकाशयितुं समर्थत्वात् । एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः । तदिदं

म्भवति यस्य यत्प्रकाशनसामर्थ्यं तस्य मन्त्रस्य तदङ्गत्वमिति न्यायात् । तच्च लिङ्गं द्विविधं सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षं तत्सापेक्षं चेति । तत्र यद्विना यन्न सम्भवति तस्य तदङ्गत्वं—सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षकेवललिङ्गाद्भवति यथाऽर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वं, अर्थज्ञानं विना तदनुष्ठानासम्भवात् । यद्विना यत्सम्भवति तस्य तदङ्गत्वं तत्सापेक्षलिङ्गाद्भवति यथोक्तमन्त्रस्य निर्वापाङ्गत्वं, निर्वापस्य हि विनापि मन्त्रमुपायान्तरेण स्मृत्वा कर्तुं शक्यत्वान्न मन्त्रो निर्वापस्वरूपार्थः सम्भवति, किन्त्वपूर्वसाधनीभूतनिर्वापप्रकाशनार्थ एव, तादृशनिर्वापप्रकाशनार्थत्वं च न सामर्थ्यमात्राल्लभ्यते सामर्थ्यस्य निर्वापप्रकाशनमात्रे सत्त्वात् । ततश्चावश्यं प्रकरणादि सामान्यसम्बन्धबोधकं प्रमाणं स्वीकर्तव्यम् । तथा च दर्शपूर्णमासप्रकरणे तस्य मन्त्रस्य पाठादेवानेन मन्त्रेण दर्शपूर्णमासापूर्वसम्बन्धि किञ्चित्प्रकाश्यत इत्यवगम्यते—अन्यथा दर्शादिप्रकरणपाठस्य वैयर्थ्यापत्तेः । किन्तद्दर्शपूर्णमासापूर्वसम्बन्धि प्रकाश्यमित्याकाङ्क्षायां निर्वापप्रकाशनसामर्थ्यात्पुरोडाशनिर्वाप इत्यवगम्यते । निर्वापश्च पुरोडाशसंस्कारद्वारा ऽपूर्वसम्बन्धीति लिङ्गान्मन्त्रस्य निर्वापार्थत्वे सति न तस्यानर्थक्यापत्तिः । तस्मादग्नये जुष्टं निर्वपामीति मन्त्रस्य प्रकरणाद्दर्शपूर्णमाससम्बन्धितयाऽवगतस्य निर्वापप्रकाशनसामर्थ्यरूपाल्लिङ्गान्निर्वापाङ्गत्वमिति । तदिदं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्गं वाक्यादिभ्यो बलवत् । अत एव "स्योन-

निरुक्तं सामर्थ्यरूपं लिङ्गं वाक्यप्रकरणादिभ्यः प्रबलमित्याह । तदिदमित्यादिना । अत एवेति । लिङ्गस्य वाक्यादिभ्यो बलवत्त्वादेवेत्यर्थः ।

"स्योनन्ते सदनं कृणोमी"त्यत्र "घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान" इति वाक्यशेषः । भो पुरोडाश ! ते—तव स्योनं-समीचीनं सदनं स्थानं—कृणोमि-करोमि तच्च स्थानं घृतस्य धारया सुशेवं सुष्टु सेवितुं योग्यं कल्पयामि । भो व्रीहीणां मेध व्रीहिसारभूत ! त्वं सुमनस्यमानः समाहितमनस्कः सन् तस्मिन्नमृते—समीचीने स्थाने सीद उपविश प्रतितिष्ठ—तत्र स्थिरोभवेत्यर्थः । तत्र च तस्मिन्नित्यनेन तच्छब्देन—प्रकृतवाचकेन पूर्वोत्तरार्द्धयोरेकवाक्यत्वे सिद्धे मन्त्रद्वयस्याभावात्सर्वोऽप्ययं मन्त्रः स्थानकरणस्याङ्गं पुरोडाशस्थापनस्य चाङ्गं भवति तत्र विनियोजिका श्रुतिश्चैवं कल्पनीया सर्वेणानेन मन्त्रेण स्थानं कर्तव्यमिति तथा सर्वेणानेन मन्त्रेण तत्र पुरोडाशः स्थापनीय इति च । तथा च सदनकरणपुरोडाशस्थापनयोरस्य मन्त्रस्य विकल्पः—समुच्चयो वा स्वेच्छया भविष्यतीति पूर्वपक्षः । तत्र हि यदेतत्पूर्वोतरार्द्धयोः परस्पराऽन्वयेनैकवाक्यं सम्पन्नन्तदेतदुत्तरार्द्धस्य सदनकरणे शक्तिमकल्पयित्वा सकलं मन्त्रं सदने विनियोक्तुं नार्हति तथा तदेव वाक्यं पूर्वार्द्धस्य पुरोडाशस्थापने शक्तिमकल्पयित्वा न पुरोडाशस्थापने कृत्स्नं मन्त्रं विनियोक्तुं प्रभवति ततश्च लिङ्गकल्पनव्यवधानेन वाक्यं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi
पर्ण = पलाश, जुहू = जुमेल

न्ते सदनं कृणोमी"ति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वं सदनं कृणोमीति लिङ्गात्, नतु वाक्यात् ।

समभिव्याहारो वाक्यम् । समभिव्याहारश्च साध्यत्वादिवाचकद्वितीयाद्यभावेऽपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम् । यथा "यस्य पर्णमयी जुहुर्भवति न स पापं श्लोकं शृणोति" । अत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णताया जुह्वङ्गत्वम् । नचानर्थक्यं अन्यथापि जुह्वाः सिद्ध-

---

श्रुतिं प्रति विप्रकृष्यते प्रत्यक्षं तु लिङ्गद्वयं तां श्रुतिं प्रति न विप्रकृष्यते तथा सति लिङ्गेन वाक्यस्य वाधान्मन्त्रस्यार्द्धद्वयं सदनकरणस्थापनयोर्व्यवस्थितमिति राद्धान्तः ।

तमेतमभिप्रेत्याह । मन्त्रस्येत्यादिना । लिङ्गादिति । सदनकरणप्रकाशनसामर्थ्यरूपादित्यर्थः । नतु वाक्यादिति । मन्त्रस्य पुरोडाशसदनसादनरूपार्थकरणाङ्गत्वं न तु सदनसादनलक्षणशेषशेषिरूपार्थप्रतिपादकात्सदनं कृणोमि तस्मिन्सीदेत्येवं सहोच्चारणरूपाद्वाक्यादित्यर्थः ।

वाक्यं लक्षयति । समभिव्याहार इति । वाक्यमिति लक्ष्यनिर्देशः । समभिव्याहारशब्दं व्याचष्टे । समभिव्याहारश्चेत्यादिना । तत्रोदाहरणमाह । यथेत्यादिना । पर्णताजुह्वोरिति । शेषशेषिलक्षणयोरिति शेषः । ननु काष्ठान्तरेणैव जुह्वाः सिद्धत्वात्पर्णताया आनर्थक्यं स्यादित्याशङ्क्य परिहरति । नचेत्यादिना । नच वाक्यमित्यत्र हेतु-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वादिति वाच्यम् । जुहूशब्देन तत्साध्यापूर्वलक्षणात् तथाच वाक्यार्थः पर्णतयाऽवत्तहविर्धारणद्वारा जुह्वपूर्वं भावयेदिति । एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यत इति न पर्णताया वैयर्थ्यम् । अवत्तहविर्धारणद्वारेति चावश्यं वक्तव्यं अन्यथा स्रुवादिष्वपि पर्णतापत्तेः । सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु । तत्र चोदकेनापि तत्प्राप्तिसम्भवात्पौनरुक्त्यापत्तेः । यत्र

माह । जुहूशब्देनेत्यादिना । यदि जुहूः पर्णतयैव क्रियते तदैव जुह्वाऽपूर्वं जन्यते नान्यथेति भावः । फलितं वाक्यार्थमाह । तथाचेत्यादिना । क्वचित्पुस्तकेऽवत्तेत्यतः प्रागितः परत्रैवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यत इति न पर्णताया वैयर्थ्यमिति पाठः । अवद्यत इत्यवत्तं, अवत्तं च तद्धविश्च तस्य धारणद्वारेत्यर्थः । अवत्तेत्यादेर्व्यावृत्तिमाह—अन्यथेत्यादिना । अन्यथाऽवत्तेत्यादेरनुपादान इत्यर्थः । स्रुक्स्रुवादिभिराज्यहविर्धारणद्वारैवोपक्रियत इति भावः । ननु पर्णताया अनारभ्याधीतत्वादनारभ्यविधेश्च सामान्यविधित्वात्पर्णता सर्वेषु प्रकृतिविकृतियागेषु समन्वेतित्याशङ्क्याह । सेयमित्यादिना । एवकारव्यावर्त्यमाह । न विकृतिष्विति । तत्रेति । विकृतिष्वित्यर्थः । चोदकेनेति । प्रकृतिवद्विकृतिः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समग्राङ्गोपदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादिः तत्प्रकरणे सर्वाङ्गपाठात् । यत्र न सर्वाङ्गोपदेशः सा विकृतिः । यथा सौर्य्यादिः तत्र

कर्तव्येति चोदकशाब्दितातिदेशवाक्येनेत्यर्थः । तत्प्राप्तिसम्भवादिति । पर्णताप्राप्तिसम्भवादित्यर्थः । पौनरुक्त्यापत्तेरिति । "प्रकृतौ वाऽद्विरुक्तत्वा"(१)दितिन्यायविरोधेन पौनरुक्त्यरूपदोषापत्तेरित्यर्थः । केयं प्रकृतिर्विकृतिश्चेत्याकाङ्क्षायां तल्लक्षणमाह । यत्रेत्यादिना । अतिदेशेनेति । उक्तचोदकशाब्दितातिदेशवाक्येनेत्यर्थः । किञ्च यत्र चोदकेनाङ्गाप्राप्तिस्तत्रानारभ्याधीतानां सन्निवेशः दर्शपूर्णमासयोरपि चोदकप्रमाणेनाङ्गानामप्राप्तेः प्रकरणपठितैरेवाङ्गैर्नैराकाङ्क्ष्यात्—तत्र पर्णतायाः सन्निवेशो न्याय्य एव । गृहमेधीययागाद्यद्यपि कुत्रापि विकृतौ नाङ्गानामतिदेशेन प्राप्तिस्तथापि तस्य क्लृप्तोपकारैराज्यभागादिभिरेव नैराकाङ्क्ष्येण तत्रापि चोदकादङ्गाप्राप्तेः सत्त्वात्तत्रापि पर्णतासान्निवेशो भवत्येव । किञ्च योऽनारभ्यविधिः स सामान्यविधिरित्युच्यते । सामान्यविधेश्चास्पष्टत्वात्तस्य विशेषेणोपसंहारो भवति । तथाचोक्तम्—

"सामान्यविधिरस्पष्टः संह्रियेत विशेषत"(२) ।

(१) यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यनारभ्य श्रुतापर्णता प्रकृतौ निविशत उत विकृताविति संशये ३ अ. ६ पा. १ अधिकरणे सूत्रम्-प्रकृतौ दर्शपूर्णमास एवाद्विरुक्तत्वात् विकृतावतिदेशशास्त्रेण एकदा उक्तवचनेन चैकदेति सर्वार्थत्वे द्विरुक्तता स्यादिति तस्यार्थः ।

(२) तन्त्रवार्त्तिके ३ अध्याये ४ पादे ४७ सूत्रे ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कपितयाङ्गानामतिदेशेन प्राप्तत्वात् । अनारभ्यविधिः सामान्यविधिः ।

इति । तथाच सामिधेन्यृचां साप्तदश्यस्यानारभ्याधीतत्वेपि न प्रकृतिषु गमनं, तस्य प्रकृतियागानां सामिधेन्यृक्पाञ्चदश्यावरोधात् । नापि विकृतिमात्रे तद्गमनं तत्र चोदकप्राप्तपाञ्चदश्यबाधप्रसङ्गात् । किन्तु प्रत्यक्षश्रुतसाप्तदश्यासु मित्रविन्दादिष्वेव विकृतिषु तस्य साप्तदश्यस्य गमनं भवति । तथाचोक्तम्—

"एवं च प्रकृतावेतत्पाञ्चदश्यम्प्रतिष्ठितम् ।
विकृतौ च न यत्रास्ति साप्तदश्यं पुनः श्रुति"रिति ।

नच वाक्यवैयर्थ्य,मनारभ्याधीतस्यैव साप्तदश्यस्य मित्रविन्दादिप्रकरणस्थवाक्येनोपसंहारात् । उपसंहारश्च नाम सामान्यप्राप्तस्य विशेषे नियमनं(१) ततश्च साप्तदश्यस्यानारभ्याविधिः सामान्यविधिः । मित्रविन्दादिप्रकरणस्थश्च विशेषविधिरिति सर्वमभिप्रेत्याह । **अनारभ्य विधिः सामान्यविधिरिति ।** किञ्च ताद्धि वाक्यं प्रकरणाद्बलीयो भवति स्थानादितस्तु सुतरां, तस्य प्रकरणादपि दुर्बलत्वात्, वाक्यस्य प्रकरणादिभ्यो बलवत्त्वादैन्द्राग्नी इदं हविरित्यादि मन्त्रस्य दर्शैकवाक्यत्वाद्दर्शाङ्गत्वं, न तु दर्शपूर्णमासप्रकरणाद्दर्शपूर्णमासोभयाङ्गत्वमित्या-

---

(१) यथा पुरोडाशं चतुर्द्धा करोतीति वाक्येन पुरोडाशसामान्येन प्राप्तस्य चतुर्द्धाकरणस्य आग्नेयं चतुर्द्धा करोतीति वाक्यादाग्नेयपुरोडाशमात्रे सङ्कोचनम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदिदं वाक्यं प्रकरणादिभ्यो बलवत् । अत एवेन्द्राग्नी इदं हविरित्यादेरेकवाक्यत्वाद्दर्शाङ्गत्वं न तु प्रकरणात् दर्शपूर्णमासाङ्गत्वम् ।

उभयाकाङ्क्षा प्रकरणम्—यथा प्रयाजादिषु। "समिधो यजती"त्यादौ वाक्ये फलविशेषस्यानिर्देशात् समिद्यागेन भावयेदिति बोधानन्तरं किमिति उपकार्याकाङ्क्षा, दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां

ह । तदिदमित्यादिना ।

अत्र चेदं बोध्यम्—"अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातां इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महोज्यायोक्राता"मिति सूक्तवाके श्रूयते । तत्र च देवतावाचकं पदमग्नीषोमादिरूपं पौर्णमास्यादिकाले यथादैवतं विभज्य प्रयोक्तव्यमिति तृतीये स्थितम् । इदं हविरित्यादि पदमवशिष्टं तु यथोक्ताग्नीषोमैन्द्राग्निमन्त्रद्वयगतमपि यथाक्रमममावास्यायामग्नीषोमपदपरित्यागेन पौर्णमास्यामिन्द्राग्निपदपरित्यागेन च पठनीयं, तथाच सति तेषां मन्त्रभागानां सर्वशेषत्वबोधकोदर्शपूर्णमासप्रकरणपाठोऽनुगृहीतो भवतीति प्राप्ते ऽभिधीयते—अग्नीषोममन्त्रशेषस्येदं हविरित्यादिरूपस्येन्द्राग्निपदान्वयाश्रवणात्प्रकरणेन प्रथमं तदन्वयरूपं वाक्यं कल्पनीयं तेन च वाक्येनेन्द्राग्निप्रकाशनसामर्थ्यरूपं लिङ्गं कल्पनीयम् । तच्च लिङ्गमनेन मन्त्रभागेनेन्द्राग्निविषया का चित्क्रियाऽनुष्ठेयेति विनियोजिकां तृतीयां श्रुतिं कल्पयति । ततः प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानं भवति,

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वर्गं भावयेदिति बोधानन्तरं कथमित्युपकारकाकाङ्क्षा, इत्थं चोभयथा प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् ।

तच्च प्रकरणं द्विविधम्—महाप्रकरणमवान्तर-

अग्नीषोमपदान्वयरूपं वाक्यं तु श्रूयमाणत्वाल्लिङ्गश्रुतिभ्यामेव व्यवधीयते । एवमिन्द्राग्नीमन्त्रशेषस्याप्यग्नीषोमपदान्वयाश्रवणात्प्रकरणेन प्रथमं तदन्वयरूपं वाक्यं कल्पनीयमित्यादि स्वयमूह्यम् । तस्माद्वाक्येन स्वस्माद्दुर्बलस्य प्रकरणस्य बाधितत्वात्तन्मन्त्रशेषस्तत्र तत्रैव व्यवतिष्ठत इति ।

प्रकरणं लक्षयति । उभयेत्यादिना । आकाङ्क्षात्वं चेल्लक्षणं शाब्दबोधकारणीभूताकाङ्क्षायामतिप्रसङ्गस्तद्वारणायोभयेति विशेषणम् । उभयत्वं चेत्तदोभयत्वावच्छिन्ने घटपटादावतिव्याप्तिस्तद्वारणायोत्तरन्दलम् । परस्परमुभयाकाङ्क्षेत्यर्थः । (१)प्रकरणमिति लक्ष्यनिर्देशः । तत्रोदाहरणद्वारोभयाकाङ्क्षां प्रदर्शयन् लक्षणसमन्वयं करोति । यथेत्यादिना । इत्थञ्चेति । अनेन प्रकारेणचेत्यर्थः । तच्च प्रकरणं विभजते । तच्च प्रकरणमित्यादिना । तच्चेति । उक्तलक्षणलक्षितं चेत्यर्थः । तत्रेति । महाप्रकरणावान्तरप्रकरण-

---

(१) पदार्थानां परस्परं जिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा-अजिज्ञासोरपि वाक्यार्थावबोधायोग्यत्वमुपात्तम् विषयतावच्छेदकधर्मवत्त्वं योग्यत्वं तादृशश्च धर्मः क्रियात्वकारकत्वादिकं अभेदान्वयस्थले च समानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकं श्रुत्यादीनां प्राबल्यदौर्बल्यप्रयोजकौ प्रकृताकाङ्क्षासद्भावासद्भावावेवेति चिन्तनीयम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकरणं चेति । मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम् । तेन च प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् । एतच्च प्रकृतावेव, उभयाकाङ्क्षायाः सम्भवान्नतु विकृतौ । तत्र प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशेन कथम्भावाकाङ्क्षाया उपशमेनापूर्वाङ्गाना-

---

योर्मध्य इत्यर्थः । मुख्यभावनेति । फलभावनेत्यर्थः । तेन चेति । महाप्रकरणेन चेत्यर्थः । अङ्गत्वं बोध्यत इति शेषः । तद्धि महाप्रकरणं प्रयाजादीन्यङ्गानि दर्शपूर्णमासयोर्विनियुङ्क्त इत्यर्थः । एतच्चेति । महाप्रकरणञ्चेत्यर्थः । तत्र हेतुमाह । उभयेति । प्रकृतावेवेत्यनुषङ्गः । एवकारव्यावर्त्यमाह । नत्विति । विकृतावुभयाकाङ्क्षाया असम्भवादिति भावः । तत्रेति । विकृतावित्यर्थः । अतिदेशेनेति । अतिदेशवाक्यप्राप्तप्राकृताङ्गजातेनेत्यर्थः । कथम्भावाकाङ्क्षया—इतिकर्तव्यताकाङ्क्षया इत्यर्थः । तथाच यद्यप्युपहोमादीनामपूर्वाङ्गानामुपहोमादिभिर्भावयेत्किम्भावयेदित्यस्त्याकाङ्क्षा तथापि सौर्यादिविकृतियागस्यातिदेशवाक्यप्राप्तप्राकृताङ्गैरेव नैराकाङ्क्ष्येण नापूर्वाङ्गानामप्युपहोमादीनामुभयाकाङ्क्षया विकृतौ विनियोगः सम्भवतीति भावः । ननु प्राकृताङ्गानां विकृतावपठितत्वादप्रत्यक्षाणां कथं विकृत्याकाङ्क्षोपशमहेतुत्वं वैकृताङ्गानान्तूपहोमादीनामत्र पठितत्वेन प्रत्यक्षाणां सम्भवत्याकाङ्क्षोपशान्तिहेतुत्वमिति चेन्न । तेषां विकृतौ पठितत्वेन प्रत्यक्षत्वेऽप्यन्यत्राक्लृप्तोपकारकत्वाच्छीघ्रं विकृत्याकाङ्क्षोपशान्तावसामर्थ्यात् । अतिदिष्टानां तु प्रकृतौ क्लृप्तोपकारकत्वेन स-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

मप्युभयाकाङ्क्षया विनियोगासम्भवात् । तस्माद्पूर्वाङ्गानां स्थानादेव विकृत्यर्थत्वमिति ।

अङ्गभावनासम्बन्धि प्रकरणमवान्तरप्रकरणम् । तेन चाभिक्रमणादीनां प्रयाजाद्यङ्गत्वम् । तच्च सन्दं-

---

म्भवति तदाकाङ्क्षोपशमनसामर्थ्यम् । नच तेषामेव प्राकृताङ्गानां विकृतौ प्रकरणात् ग्रहणं स्यादिति वाच्यम् । तेषामपि प्रकृतावुपकारकत्वेनोपक्षीणाकाङ्क्षत्वात् । नच प्राकृताङ्गानामत्रोपस्थापकाभावेनाऽनुपस्थितत्वमिति वाच्यम् । उपमानप्रमाणस्योपस्थापकस्य सत्त्वेन तेषामत्रोपस्थितत्वात् । तथाहि- सौर्यवाक्यस्य दर्शने ह्यौषधद्रव्यस्यैकदैवत्यत्वस्य च सादृश्यस्य दर्शनेनानेन सदृशमाग्नेयवाक्यमित्याग्नेयवाक्यमुपमीयते गवयदर्शनादनेन सदृशी मदीया गौरिति गोरुपमानवत् । आग्नेयवाक्ये चोपमिते तेन तदर्थो ज्ञायते । स च त्र्यंशभावनारूपस्तस्मिंश्च ज्ञाते सौर्यवाक्ये भावनाया भाव्यस्य करणस्य च विद्यमानत्वेन तत्राकाङ्क्षाभावेऽपीतिकर्तव्यताकाङ्क्षायां प्राकृतोपकारपृष्ठभावेनाग्नेयेतिकर्तव्यतामतिदिश्य सौर्ययागेन ब्रह्मवर्चसम्भावयेदाग्नेयवदिति सिद्ध्यति । तस्मादाग्नेयेतिकर्तव्यतयैव विकृत्याकाङ्क्षोपशमने सौर्यादौ विकृतावुभयाकाङ्क्षारूपात्स्थानादेवोपहोमादीनामपूर्वाङ्गानां विकृतिशेषत्वमित्युपसंहरति । तस्मादिति । अवान्तरप्रकरणं लक्षयति । अङ्गभावनेति । तेन चेति । अवान्तरप्रकरणेन चेत्यर्थः । अत्रापि बोध्यत इति शेषः । तच्चेति । तेन तेषां तदङ्गत्वं चेत्यर्थः । सन्दंशेनेति । सन्दंशो लोहकण्टकविद्धलोहशलाकाद्वयरू-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शेनैव ज्ञायते, तदभावे चाविशेषात्सर्वेषां फलभावनाकथम्भावेन ग्रहणप्रसङ्गेन प्रधानाङ्गत्वापत्तेः। एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तरालविहितत्वं सन्दंशः यथाऽभिक्रमणे। तत्र हि "समानयत उपभृतस्तेजो वा" इत्यादिना प्रयाजानुवादेन किञ्चिदङ्गं विधाय तदनन्तरमपि "यस्यैवं विदुषः प्रयाजा

पस्तेनेत्यर्थः। तन्न्यायेनेति यावत्। तदनङ्गीकारे दोषमाह। तदभाव इति। सन्दंशाभाव इत्यर्थः। अविशेषात्- प्रकरणाविशेषात्। सर्वेषां प्रयाजादीनामभिक्रमणादीनां च कथंभावेनेतिकर्तव्यतारूपेण प्रधानाङ्गत्वापत्तेः—दर्शादिप्रधानाङ्गत्वापत्तेः। तथाचाभिक्रमणादीनां प्रयाजाद्यङ्गत्वग्रहे सन्दंशस्याभावे सति दर्शादिप्रधानयागप्रकरणपाठाविशेषात् प्रयाजादिवदभिक्रमणादीनामपि दर्शादिफलभावनाया इतिकर्तव्यताकाङ्क्षया ग्रहणप्रसङ्गेन दर्शादिप्रधानयागाङ्गत्वापत्तेस्तत्सन्दंशेनैव ज्ञातुं शक्यत इति समुदायार्थः। सन्दंशं लक्षयति। एकाङ्गानुवादेनेति। तत्रोदाहरणमाह। यथा ऽभिक्रमण इति। अभिक्रमणे ह्येकस्य प्रयाजरूपस्याङ्गस्यानुवादेन विधीयमानयोः प्रयाजाङ्गयोरन्तराले विहितत्वं भवत्येव। तदेवाह। तद्धीत्यादिना। तद्धि—अभिक्रमणं हीत्यर्थः। समानयते जुह्वामुपभृत इति। उपभृतो घृतपात्रविशेषा, ज्जुह्वां जुहूपात्रविशेषे घृतं समानयत इति मन्त्रार्थः। किञ्चिदङ्गमिति। उपभृतः पात्राज्जुह्वां प्रयाजार्थं घृतानयनरूपमङ्गमित्यर्थः। तदनन्तरमपीति। अभिक्रमणानन्तरम-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

इज्यन्ते प्रैभ्योलोकेभ्यो भ्रातृव्यान्नुदतेऽभिक्रामं जुहोत्यभिजित्यै" इत्यनन्तरं "यो वैप्रयाजाना मिथुनं वेदे"त्यादि किञ्चिदङ्गं विधीयते । अतः प्रयाजाङ्गमध्ये ऽभिहितमभिक्रमणं तदङ्गम् । प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदिति ज्ञाते कथमेभिरपूर्वं कर्तव्यमिति कथंभावाकाङ्क्षायाः सत्वात् । सा च सन्दंशपठितैरभिक्रमणादिभिः शाम्यति । नचाङ्गभा-

पीत्यर्थः । तदनन्तरमपीत्यस्य किञ्चिदङ्गं विधीयत इत्युत्तरेणान्वयः । प्रयाजत्वामिति पाठे तु तस्यापि किञ्चिदङ्गमित्यनेनोत्तरेणैवान्वयः । भ्रातृव्यानिति । शत्रूनित्यर्थः । नुदत इति । व्यथयति अपनुदतीति वार्थः जयतीति यावत् । अभिक्रामं जुहोत्यभिजित्या इति । विजयायाहवनीयं सर्वतः सञ्चरणं कृत्वा जुहुयादित्यर्थः । मिथुनं वेदेतीति युगलं जानातीत्यर्थः । अत इति । प्रयाजानुवादेन विहिततदङ्गमध्ये विहितत्वादित्यर्थः । ननु प्रयाजानामितिकर्तव्यताकाङ्क्षाभावान्न तत्र सन्दंशेनाप्यभिक्रमणस्याङ्गत्वेनान्वयः साकाङ्क्षस्यैव गुणेऽन्वेषणेति न्यायादित्यत आह । प्रयाजैरित्यादिना। सा च प्रयाजानामिति कर्तव्यताकाङ्क्षा सन्दंशलब्धैरेवाभिक्रमणादिभिः शाम्यतीत्याह । सा चेत्यादिना । तथा चोक्तम्—

" परप्रकरणस्थानामङ्गे श्रुत्यादिभिस्त्रिभिः ॥
ज्ञाते पुनश्च तैरेव सन्दंशेन तदिष्यत " इति ।

ननुप्रयाजभावनाया अङ्गभावनात्वेन कथंभावाकाङ्क्षाभावान्न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनायाः कथं भावाकाङ्क्षाऽभावः, भावनासामान्येन तत्रापि तत्सम्भवात् ।

तदिदं प्रकरणं क्रियाया एव साक्षाद्विनियोजकं

प्रयाजभावनाकथंभावेनाभिक्रमणं गृह्यत इत्याशङ्क्य परिहरति । प्रचेत्यादिना । (१)प्रयाजादिभावना कथंभावाकाङ्क्षाशून्या अङ्गभावनात्वादित्यत्र हेतोरसाधारणानैकान्तिकत्वात्साकाङ्क्षत्वसाधने हेतुसत्वाच्च न प्रयाजाद्यङ्गभावनायाः कथंभावाकाङ्क्षाशून्यत्वमित्याह । भावनासाम्येनेति । प्रयाजाद्यङ्गभावना कथंभावसाकाङ्क्षा भावनात्वाद्दर्शादिभावनावदिति प्रयोगोऽत्र बोध्यः । न चावहननादिभावनायां व्यभिचारः । तस्याः पक्षसमत्वात्(२) । तत्रापि तत्सम्भवादिति । प्रयाजाद्यङ्गभावनायामपि कथंभावाकाङ्क्षासम्भवादित्यर्थः ॥

निरूपितप्रकरणस्य साक्षाद्विनियोज्याविषयमुपन्यस्यति ।

---

(१) सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिहेतुरसाधारण इत्युक्तलक्षणेन सपक्षे घटादौ विपक्षे फलभावनायामुक्तहेतोरसत्त्वेन सन्दिग्धसाध्यके पक्षमात्र एव सत्त्वेनाऽसाधारणदोषदुष्टत्वात्साकाङ्क्षत्वसाधकभावनात्वहेतुना सत्प्रतिपक्षितत्वाच्चेदमनुमानं दुष्टमिति भावः ।

(२) पक्षे यथा साध्यसन्देहेन तत्र हेतुसत्त्वेपि न व्यभिचारस्तथा पक्षभिन्नेपि साध्यसन्देहश्चेत् तत्र हेतुसत्त्वेन न काचिद्धानिः साध्यसन्देहस्थलेपि हेतुसत्त्वेन व्यभिचारोद्भावनेऽनुमानमात्रोच्छेदप्रसङ्गात् न च तर्हि साध्यसन्देहवत्त्वरूपपक्षत्वस्य तत्र सत्त्वात् पक्षसमत्वाभिधानं न सङ्गच्छते इति वाच्यम् । प्रतिज्ञाविषयत्वाभावमात्रेण पक्षसमत्वाभिधानात । न च तर्हि प्रतिज्ञाविषयत्वमेव पक्षत्वमास्तां स्वार्थानुमाने तदभावात् ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रव्यगुणयोस्तु तद्द्वारा । तथाहि "यजेत स्वर्गकाम" इत्यत्र फलभावनायां कथंभावाकाङ्क्षायां सान्निधिपठिताऽश्रूयमाणफलकं क्रियाजातमुपकार्याकाङ्क्षयेतिकर्तव्यतात्वेनान्वेति, क्रियाया एव लोके कथंभावाकाङ्क्षायामन्वयदर्शनात्, नहि हस्तेन कुठारेण

तदिदमित्यादिना । तस्यैव व्यवहितविनियोज्यमादर्शयति । द्रव्येति । तद्द्वारेति । क्रियाद्वारेत्यर्थः । अत्र च द्रव्यस्य क्रियाद्वारैव प्रकरणं विनियोजकं गुणस्य तु द्रव्यक्रियोभयद्वारा विनियोजकमिति भावः । फलभावनायामिति । फलभावनायां क्रियाजातमितिकर्तव्यतात्वेनान्वेतीति सम्बन्धः । भिन्नप्रकरणस्थक्रियाया अन्यत्र क्रियायामन्वयापत्तिवारणाय सन्निधिपठितमित्युक्तम् । श्रूयमाणफलस्य क्रियाजातस्येतिकर्तव्यतात्ववारणायाश्रूयमाणफलमित्युक्तम् । प्रधानस्योपकाराकाङ्क्षाऽभावे तत्र तदन्वयादर्शनात्कथंभावाकाङ्क्षायामित्युक्तम् । गुणस्याप्युपकार्याकाङ्क्षाऽभावेह्युपकारकत्वेनान्वयादर्शनादुपकार्याकाङ्क्षयेत्युक्तम् । इतिकर्तव्यताकाङ्क्षायां क्रियाया एव साक्षादन्वये लोकप्रसिद्धिं हेतुत्वेन दर्शयति । क्रियाया एवेत्यादिना । क्रियाया एवान्वयदर्शनादित्यन्वय इत्यर्थः । कुठारेण छिन्द्यादित्यत्र कथमिति कथंभावाकाङ्क्षायां हस्तेनेत्युच्चार्यमाणोपि हस्तो नहि छिदिभावनायां साक्षादन्वेतीत्यभिप्रेत्याह । नहीत्यादिना । उद्यमननिपातन एवान्वित इति शेषः । उद्यमनञ्च निपातनञ्चोद्यमननिपातने इति द्विवचनं सन्धिस्तु लेखकप्रमादतः । यद्वा उद्यमनेन निपातन उद्यमननि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छिन्द्यादित्यत्र कथंभावाकाङ्क्षायामुच्चार्य्यमाणोपि हस्तोऽन्वेति, किन्तु हस्तेनोद्यम्य निपात्येति उद्यमननिपातने एव, हस्तश्च तद्द्वारैवान्वेतीति सार्वजनीनमेतत् ।

पातन इति व्याख्येयम् । अत्र चान्वेतीत्यनुषङ्गः । तद्द्वारैवेति । उद्यमनानिपातनद्वारैवेत्यर्थः । सार्वजनीनमिति । सर्वेषु जनेषु भवमित्यर्थः । सर्वजनप्रसिद्धमिति यावत् । किञ्च कथं भावाकाङ्क्षा नाम करणगतप्रकाराकाङ्क्षा थमुत्रः प्रकारवाचित्वात् । सामान्यस्य भेदको विशेषः प्रकारः सामान्यं च क्रियारूपमेवाख्यातेनोच्यते । यजेत स्वर्गकाम इत्यस्य ह्ययमर्थः—यागेन तथा कर्तव्यं यथा स्वर्गो भवतीति । क्रियासामान्यस्य च विशेषः क्रियैव भति नहि ब्राह्मणविशेषः परिव्राजकादिरब्राह्मणो भवति, एवं च करणगतक्रियाविशेषाकाङ्क्षापरनामधेयकथंभावाकाङ्क्षायां क्रियैवान्वेतीति युक्तं, स च करणगतः क्रियाविशेषोऽन्वाधानादिब्राह्मणतर्पणान्तः क्रियारूप एवेति युक्तं तस्य प्रकरणेनैव ग्रहणं, तस्य च करणगतत्वं तदुपकारकत्वमेव, तेन विना यागेनापूर्वाजनात् । न ह्युद्यमननिपातनव्यतिरेकेण कुठारेण द्वैधीभावो जन्यते, तत्सिद्धं कथम्भावाकाङ्क्षया क्रियैवान्वेतीति ।

तदिदं प्रकरणं स्थानादितो बलीयो भवति । तथाहि राजसूयप्रकरणे पश्विष्टिसोमयागादयः समप्रधानभूताः पठ्यन्ते । तत्र च कश्चिदभिषेचनीयसंज्ञकः सोमयागः पठितः तस्य हि सन्निधौ विदेवनादयो धर्माः—"अक्षैर्दीव्यति राजन्यं जिनाति शौनःशे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदं च स्थानादिभ्यो बलवत् । अत एव "अक्षैर्दीव्यति राजन्य"मिति देवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अपि स्थानान्न तदङ्गं, किन्तु प्रकरणाद्राजसूयाङ्गमिति ।

देशसामान्यं स्थानं तद्द्विविधम्,—पाठसादेश्य-

पमाख्यापयती"ति श्रूयते । जिनाति—जयतीत्यर्थः । बह्वृचब्राह्मणे समाम्नातं शुनःशेपविषयमुपाख्यानं शौनःशेपं तदाख्यापयतीत्यर्थः । तत्र च विदेवनादीनां सन्निधिबलादभिषेचनीयाङ्गत्वमिति प्राप्ते राद्धान्तः—राजसूयेतिकर्तव्यताकाङ्क्षायामनुवृत्तायां विहिता विदेवनादयः प्रकरणेन राजसूयशेषा एव भवन्ति राजसूयश्च बहुयागात्मको भवति ततश्च तत्रत्यसर्वयागशेषत्वं विदेवनादीनां सिद्ध्यति । किञ्चाभिषेचनीयस्य काचिदप्याकाङ्क्षा त्रिदेवनादिषु नास्त्येव, तस्य ज्योतिष्टोमविकृतित्वेनातिदिष्टैरेव प्राकृताङ्गैस्तदाकाङ्क्षानिवृत्तेः । ननु सन्निहितविधिबलादाकाङ्क्षोत्थाप्यत इति चेत्तर्ह्याकाङ्क्षारूपमन्तराले प्रकरणमादौ परिकल्प्य तद्द्वारा वाक्यलिङ्गश्रुतिकल्पनया सान्निधिर्विप्रकृष्यते राजसूयाकाङ्क्षारूपं महाप्रकरणं तु क्लृप्तत्वादेकयाऽऽकाङ्क्षया सन्निकृष्यते । ततश्च प्रकरणेन सन्निधेर्बाधात्सर्वयागशेषा विदेवनादयो धर्मा इत्यभिप्रेत्य प्रकरणस्य स्थानादिभ्यो बलवत्त्वमाह । इदञ्चेत्यादिना ।

स्थानं लक्षयति । देशसामान्यमिति । सन्निधिविशेषत्वमिति लक्षणान्तरम् । स्थानं क्रमश्चेति लक्ष्यत्वेन निर्दिश्यते ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

मनुष्ठानसादेश्यं चेति । स्थानं क्रमश्चेत्यनर्थान्तरम् । पाठसादेश्यमपि द्विविधम् । यथासन्निधिपाठः यथासङ्ख्यपाठश्चेति ।

तत्र "ऐन्द्राग्नमेकादशकपालं निर्वपेत्" "वैश्वानरं द्वादशकपालं निर्वपे"दित्येवं क्रमाविहितेषु "इन्द्राग्नीरोचना दिव" इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासङ्ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं रूपो विनियोगो यथासङ्ख्यपाठात् । प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात् । एवं द्वितीयमन्त्रस्यापि । वैकृताङ्गानां प्राकृ-

---

पाठसमानदेशत्वेनानुष्ठानसमानदेशत्वेन च स्थानं विभजते । तत् द्विविधमित्यादिना। यथासङ्ख्यपाठत्वेन सन्निधिपाठत्वेन च पाठसमानदेशत्वमपि विभजते। पाठसादेश्यमित्यादिना। तत्र यथासङ्ख्यपाठत्वेन समानदेशत्वं समुदाहरति । तत्रैन्द्राग्नमित्यादिना । प्रथमस्य प्रथममिति। प्रथमस्यैन्द्राग्नमित्यैन्द्राग्नेष्टियागस्येन्द्राग्नीरोचनादिव इति प्रथमं याज्यानुवाक्यायुगलमङ्गं, द्वितीयस्य वैश्वानरमिति वैश्वानरेष्टियागस्य वैश्वानरोऽजीजनादित्यादि द्वितीयमङ्गमित्यर्थः । एवंरूपे विनियोगे हेतुमाह । प्रथमपठितमन्त्रस्येत्यादिना । कैमर्थ्याकाङ्क्षायामिति । किमर्थोयं मन्त्र इति कैमर्थ्याकाङ्क्षायामित्यर्थः । एवं द्वितीयमन्त्रस्यापीति । किमर्थोयं मन्त्र इति द्वितीयमन्त्रस्या-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

ताङ्गानुवादेन विहितानां सन्दंशपतितानां विकृत्य-

पि कैमर्थ्याकाङ्क्षायां द्वितीयस्थाने विहितमेव कर्मोपतिष्ठते समानदेशत्वादित्यर्थः । कोर्थो यस्य स किमर्थः तस्य भावः कैमर्थ्यं तस्याकाङ्क्षायामिति निरुक्त्या किमनेन मन्त्रेण भाव्यमिति सिद्ध्यति । अत्र च क्रमस्योदाहरणान्तरमपि वर्तते।

तथाहि—दर्शपूर्णमासयोराध्वर्यवे काण्डे आग्नेयोपांशुयाजाग्नीषोमीययागाः क्रमेणाम्नाताः याजमाने च काण्ड आग्नेयादिविषयास्तेनैव क्रमेण मन्त्रा आम्नाताः "अग्नेरहं देवयज्ययाऽन्नादो भूयासं दब्धिरस्यदब्धो भूयासममुन्दभेयमग्नीषोमयोरहं देवयज्यया वृत्रहा भूयास" मिति । तत्राद्यन्तयोराग्नेयाग्नीषोमीययोः कर्मणो राद्यन्तो मन्त्रौ, मध्यस्थ चोपांशुयाजस्य कर्मणो मध्यमो"दब्धिरस्यदब्धोभूयासममुन्दभेय"मिति मन्त्रोऽङ्गं तस्य च ब्राह्मणवाक्यमेवमाम्नायते—"एतया वै दब्ध्या देवा असुरानदभ्नुवन्तयैव भ्रातृव्यं दभ्नोती"ति । दब्धिर्घातकमायुधमित्यर्थः । नचाऽग्नेयाग्नीषोमीययोरप्यनिष्टनिवारकत्वेन साधारणलिङ्गेन दब्धिमन्त्रस्याङ्गत्वं किं न स्यादिति वाच्यम्। यथा वाक्यद्वयानुसन्धानेन सम्पन्नं प्रकरणं पृथक्प्रमाणं तथा प्रकरणद्वयानुसन्धानसम्पन्नेन क्रमप्रमाणेनोपांशुयाजे तस्य मन्त्रस्य विनियोगात् । नच क्रमस्य प्रकरणेऽन्तर्भाव इति वाच्यम् । द्वयोर्वाक्ययोरिव प्रकरणयोरेकवाक्यत्वाभावात् । तस्मात् क्रमप्रमाणेन मध्यवर्तिन उपांशुयाजस्य मध्यवर्ती मन्त्रोऽङ्गं समानदेशत्वादिति यथासङ्ख्यपाठाद्विनियोगउक्तः । सान्निधिपाठात्तु(१)यानि वैकृतान्यङ्गानि प्राकृताङ्गानुवादेन विहितानि

(१) यद्यपि न्यायप्रकाशे प्राकृताङ्गानुवादेन विहितानां स-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

र्थत्वं सन्निधिपाठात्। यथा आमनहोमानाम्। तेषां हि कैमर्थ्याकाङ्क्षायां फलवद्विकृत्यपूर्वमेव भाव्य-

---

सन्दंशपतितानि तेषां विकृतौ विनियोग इत्याह। वैकृताङ्गा-नामित्यादिना। तत्रोदाहरणमाह। यथाऽऽमनहोमानामि-ति। "अमनसे स्वाहा रेतस्विने स्वाहे"त्यादयोऽमनोहोमाः। यद्वा अमनोहोमानामिति पाठः प्रामादिक एव किन्त्वामनहो-मानामिति सकाररहित आपूर्व एव पाठः साधुः। तत्र च "वै-श्वदेवीं साङ्ग्रहणीं निर्वपेत् ग्रामकाम" इत्यस्य काम्येष्टियागस्य सन्निधौ श्रूयन्त आमनहोमा "आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोती"ति। नन्वामनहोमानां फलाकाङ्क्षायां फल-वद्विकृत्यपूर्वमेव भाव्यत्वेन सम्बध्यत इत्यसत्तेषां मुख्ययागत्वे विरोधाभावात्। न ह्याग्नेयादीनां षण्णामनुमत्यादीनां च बहूनां

न्देश पतितानां प्रकरणादेवाङ्गत्वमुक्तं तदनुसारेण च अविहितानां सन्दंशाऽपतितानामित्येवमकारयुक्त एव पाठः समीचीनस्तथापि भट्टसोमेश्वरेण बलाबलाधिकरणे क्रमत्वे सत्यपि साङ्ग्रहण्यादे-स्तिस्र आहुतीर्जुहोतीत्यादिभिरेकवाक्यत्वोपपत्तेरिति ग्रन्थेन क्र-मादेवामनहोमानामङ्गत्वमुक्तं तथा पार्थसारथिमिश्रेण शास्त्रदी-पिकायां ४ अ. ४ पादे सन्निधिनैवाङ्गत्वमुक्तं तदनुसृत्यैवात्र तथो-क्तमिति बोध्यम् अत एव मीमांसाबालप्रकाशे यदपि मिश्रैरा-महोमानां सन्निधिग्राह्यत्वमुक्तं तदभ्युपेत्यवादमात्रं तन्त्ररत्ने प्रकरणग्राह्यत्वं प्रदर्श्य सन्निधिनापि तदधिकरणसिद्धेरुक्तत्वात् न्यायरत्नमालायामपि मिश्रैः प्रकरणग्राह्यत्वस्योक्तत्वाच्च तदेवं यत्र प्राकृताङ्गानुवादेन द्वादशोपसत्त्ववद्विधिरुक्तरूपः सन्दंशो वा तत्रैव विकृतौ प्रकरणं विनियोजकमन्यत्र सन्निधिरेवेति सन्निधिग्राह्यत्वं दूषयित्वा प्रकरणग्राह्यत्वपक्षे एव निर्भरो दर्शितस्तेन ज्ञायत ए-तादृशोऽपि पक्षो ग्रन्थकारैरङ्गीकृत इति ध्येयम्।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वेन सम्बध्यते उपस्थितत्वात् । स्वतन्त्रफलकत्वे विकृतिसन्निधिपाठानर्थक्यापत्तेः । पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् औपव-

मुख्यत्वं विरुद्धमित्याशङ्क्य यथा "दर्शपूर्णमासाभ्यां स्वर्गकाम" इति वाक्येनाऽऽग्नेयादीनां फलसम्बन्धावगमस्तथाऽऽमनहोमानां फलसबन्धावगमाभावान्न प्राधान्यं युज्यते, "साङ्ग्रहणीं निर्वपेद्ग्रामकाम" इति वाक्यस्य तु साङ्ग्रहण्या एव फलसम्बन्धबोधकत्वेनाऽऽमनहोमानान्तत्सम्बन्धबोधकत्वाभावात् । तस्मात्फलवत्सन्निधावफलं तदङ्गमिति न्यायात्फलवत्याः साङ्ग्रहण्याः सन्निधावाम्नाता अफला आमनहोमास्तदङ्गमित्यभिप्रेत्य किमर्था इमे—किलेतिकैमर्थ्याकाङ्क्षायाम्फलवतोविकृत्यपूर्वस्यैव भाव्यत्वेन सबन्धे हेतुमाह। उपस्थितत्वादिति । सन्निधिपाठेपि विश्वजिन्न्यायेन स्वतन्त्रफलकत्वमेव किन्न स्यादित्यत आह । स्वतन्त्रफलकत्व इत्यादिना । फलवत्कर्मसन्निधौ पठितस्यैवाश्रूयमाणफलस्य विश्वजिन्नयायेन स्वतन्त्रफलं कल्प्यते । अन्यथा प्रयाजादीनामपि तन्न्यायेन स्वतन्त्रफलकत्वापत्तिः स्यात् । अफलस्य फलवत्सन्निधौ पाठस्तु तदङ्गत्वायैव । तदभावे ऽनर्थकत्वमेव तस्याऽऽपद्येतेति भावः । सन्निधिपाठसादेश्येन विनियोगं निरूप्यानुष्ठानसादेश्येन विनियोगं निरूपयति । पशुधर्माणामित्यादिना । पशुधर्माहुपाकरणपर्य्यग्निकरणादयस्तत्र प्रजापतेर्जायमानाः इदं पशुमित्याभ्यामृग्भ्यां पशोरुपस्पर्शनमुपाकरणं, दर्भज्वालयाऽर्चिः प्रदक्षिणीकरणं पर्य्यग्निकरणं, यूपे रज्ज्वाबन्धनं यूपनियोजनमित्यादयो बोध्यास्तेषामनुष्ठानसमानदेशत्वादग्नीषो-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मीयपशुशेषत्वमेव, नतु सवनीयादिशेषत्वमित्यर्थः । किञ्च ज्योतिष्टोमप्रकरणे त्रयः पशवः समाम्नाता अग्नीषोमीयः सवनीयोऽनुबन्ध्यश्चेति तत्राग्नीषोमीयः पशुः (१)सौत्यनामकादन्हः प्राचीने औपवसथ्यनामकेऽन्हि(२) धिष्ण्यनिर्माणादूर्ध्वं समनुष्ठीयते तत्र चैवान्हि ते धर्माः समाम्नाताः, ततश्च तेषां शेष्याकाङ्क्षायामनुष्ठेयतयोपस्थितमग्नीषोमीयपश्वपूर्वमेव सन्निधितो भाव्यत्वेन सम्बध्यते नतु सवनीयानुबन्ध्यापूर्वं तत्सन्निधिविरहात् । अथ कथमितिचेन्न । सवनीयपशोः सौत्यनामकेन्हि समाम्नानात् "आश्विनं ग्रहं गृहीत्वा त्रिवृता(३) यूपं परिवीयाग्नेयं पशुमुपाकरोती"ति अनुबन्ध्यस्य त्ववभृथान्ते श्रूयमाणत्वाच्च । तस्मादुपपद्यते ह्येतेषां धर्माणां सन्निधिनाऽग्नीषोमीयार्थत्वं सवनीयानुबन्ध्ययोस्तु चोदकात्तेऽतिदिश्यन्ते । नच पाठसादेश्यादेव तेषां तदर्थत्वं किं न स्यादिति वाच्यम् । अग्नीषोमीयपशोः सोमक्रयसमीपे पाठात्तेन तत्वासम्भवात् । नच क्रयसन्निधावेव तस्यानुष्ठानमपि किन्न स्यादिति वाच्यम् । "स एष द्विदैवत्यः पशुरौपवसथ्येऽहनि आलब्धव्य" इति वाक्यात्तस्य तत्रानुष्ठानानुपपत्तेः । नच स्थानात्प्रकरणस्य बलीयस्त्वात्तेन तद्धर्माणां ज्योतिष्टोमार्थत्वमेव किं न स्यादिति वाच्यम् । तस्य सोमयागत्वात्तद्धर्मग्रहणायोगात् सोमोह्यभिषवादीन् धर्मानाकाङ्क्षति नतु यूपनियोजनविशसनादीन् तस्मादानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्या-

(१) यस्मिन् दिने सोमयागो भवति तस्य सुत्येति संज्ञा ।
(२) यागात्पूर्वमह औपवसथ्यम् । अग्न्यायतनानि धिष्ण्य शब्द वाच्यानि ।
(३) त्रिवृता त्रिगुणया रशनया यूपं परिवीय वेष्टयित्वेत्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

सथ्येऽह्नि अग्निषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते । अतस्तेषां कैमर्थ्याकाङ्क्षाया-मनुष्ठेयत्वेनोपस्थितं पश्वपूर्वमेव भाव्यत्वेन सम्बध्यते।

तच्च स्थानं समाख्यातः प्रबलम् । अत

येन प्रकरणं प्रधानात्प्रच्याव्य स्थानात्पशुयागार्थत्वमेव पशुधर्माणां युक्तं भवति । नचाङ्गिन्यनर्थकाः सन्तस्ते धर्मा अङ्गेषु त्रिष्वपि पशुयागेष्वविशेषेणावातिष्ठान्तिवाति बाच्यम् । सन्निधिरूपस्य विशेषस्य दर्शितत्वात् । नचाग्नीषोमीयेपि तद्धर्माणां प्रकरणादेव विनियोगः किं न स्यादिति वाच्यम् । क्लृप्तोपकारैरेव प्राकृतधर्मैरग्नीषोमीयस्येतिकर्तव्यताकाङ्क्षाया उपशान्तत्वात् । अग्नीषोमीयोहि सान्नाय्ययागप्रकृतिको भवति तयोरुभयोरपि पशुप्रभवद्रव्यकत्वाविशेषात् । सान्नाय्यं दधिपयसी, तत्र पशुयागः पयोयागप्रकृतिकः साक्षात्पशुप्रभवद्रव्यकत्वात् । तच्चोक्तं "सान्नाय्यं वा तत्प्रभवत्वा"(१) दिति । तस्माच्चोदकप्राप्तैस्तद्धर्मैर्निराकाङ्क्षत्वान्न पशुयागे तद्धर्माणां प्रकरणं विनियोजकं किन्तु स्थानमेवेत्यभिप्रेत्याह । औपवसथ्येऽन्हीत्यादिना ।

एवं स्थानं निरूप्य तस्य समाख्यातः प्राबल्यमाह । तच्च स्थानमित्यादिना । तच्चेति । उक्तलक्षणलक्षितं चे-

(१) अग्नीषोमीयपशावग्नीषोमीयपुरोडाशस्य धर्मः कर्तव्यो देवतैक्यात् इति पूर्वपक्षे प्राप्ते ८ अ. २ पा. २ अधिकरणे सूत्रम्-सान्नाय्यं सान्नाय्यधर्मः स्यात तत्प्रभवत्वात्-पशुप्रभवत्वसाजात्यात्। सान्नाय्यं पशोरुत्पन्नं पशुरपि पशोरुत्पन्नः अपणार्थमुखा सान्नाय्यपश्वोः समा तस्मात् सान्नाय्यधर्म इति सिद्धान्तः ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यर्थः । तन्त्रे तृतीये चेदं स्थितम् । "शुन्धध्वं दैव्याय कर्मणे" इत्ययं मन्त्रः पौरोडाशिकामिति याज्ञिकैः समाख्याते काण्डे पठितस्तस्य च समाख्यया पुरोडाशकाण्डोक्तानामुलूखलजुव्हादीनामपि शोधनेऽङ्गत्वमिति प्राप्ते राद्धान्तः न समाख्यया मन्त्रस्य पुरोडाशपात्राङ्गत्वं पदार्थयोर्भिन्नदेशस्थत्वेन सम्बन्धस्याप्रत्यक्षत्वात् । स्थानविनियोगे तु पदार्थयोर्देशसामान्यलक्षणः सम्बन्धः प्रत्यक्ष एव । नच सा पदार्थयोः सम्बन्धवाचिका भवति यौगिकशब्दानां द्रव्यवाचकत्वेन पदार्थसम्बन्धावाचकत्वात्तथात्वे वा तस्याः सा सम्बन्धमात्रवाचिका तद्विशेषवाचिका वा स्यात् । नाद्यः तन्मात्रोक्तौ प्रयोजनाभावात् । सर्वेषां यौगिकवचसां पर्यायतापत्तेश्च । द्वितीये तु सम्बन्धविशेषत्वस्य सम्बन्धिविशेषनिरूप्यत्वादवश्यं सम्बन्धिनौ वक्तव्यौ तथा च सम्बन्धिप्रतिपत्त्यैव वाक्यार्थप्रतिपत्तिन्यायेन सम्बन्धप्रातिपत्तिसम्भवे तत्रापि शक्तिकल्पने गौरवान्न समाख्यायाः सम्बन्धवाचित्वं तथाचोक्तम्—

"सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ।
न हि सम्बन्धवाचित्वं सम्भवत्यातिगौरवात्" ।

तथान्यच्च—

"पाकं तु पाचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्योनैकस्य कस्य चिदिति"

किञ्च पौरोडाशिकमिति समाख्यायां प्रकृतिः पुरोडाशमात्रमभिधत्ते तद्धितप्रत्ययस्तु पुरोडाशस्येदमिति व्युत्पत्त्या काण्डं, न चैतावता कृत्स्नपुरोडाशपात्राणां मन्त्रसन्निधिः प्रत्यक्षो भवति । किंत्वर्थापत्त्या स कल्प्यते । कथं ? शृणु यद्युक्तः सन्निधिर्न स्यात्तदा मन्त्रप्रातिपादकग्रन्थस्य पौरोडाशिक-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

एव शुन्धनमन्त्रः सान्नाय्यपात्राङ्गं पाठसादेश्यात् । नतु पौरोडाशिकमिति समाख्यया पुरोडाशपात्राङ्गम् ।

समाख्या यौगिकः शब्दः । सा च द्विविधा ।

समाख्या न स्यात् । न ह्यग्न्यसन्निहितानामिषे त्वेत्यादिमन्त्राणामाग्नेयकाण्डसमाख्या भवति । भवति च सा सन्निहितानां "युञ्जानः प्रथमं मन" इत्यादिमन्त्राणां, ततश्च काण्डसमाख्यया सन्निधिं परिकल्प्य कल्पितकाण्डसान्निध्यन्यथानुपपत्त्या परस्पराकाङ्क्षारूपं कृत्स्नपात्रप्रकरणं कल्पयित्वा तद्द्वारा वाक्यलिङ्गश्रुतीश्च कल्पयित्वा तया श्रुत्या विनियोग इति स्थानापेक्षया विनियोगे समाख्यया विप्रकर्षः, सान्नाय्यपात्राणां तु कुम्भीशाखापवित्रादीनां शोधनमन्त्रसन्निधिः प्रत्यक्षो भवति । कथं ? शृणु । इध्माबर्हिःसम्पादनस्य मुष्टिनिर्वापस्य चान्तरालं सान्नाय्यपात्राणां देश उक्तः शोधनमन्त्रश्चायमिध्माबर्हिनिर्वापविषययोर्मन्त्रानुवाकयोर्मध्यमेऽनुवाके पठ्यते तेन च प्रत्यक्षसन्निधिना प्रकरणादीनां चतुर्णामेव कल्पनात्सन्निधिः समाख्यापेक्षया सन्निकृष्यते तस्मात्क्रमेण समाख्यां बाधित्वा सान्नाय्यपात्राणां शोधने शेषोऽयं मन्त्रो भवतीत्यभिप्रेत्याह । अत एवेत्यादिना । अत एव–स्थानस्य समाख्यातः प्रबलत्वादेव, शुन्धनमन्त्रः–शुन्धध्वं दैव्याय कर्मण इति मन्त्रः । सान्नाय्यपात्राङ्गमिति । सान्नाययागयोरैन्द्रदध्यैन्द्रपयसोः पात्राणां कुम्भीशाखापवित्रादीनामङ्गमित्यर्थः । पाठसादेश्यादिति । सन्निधिपाठादित्यर्थः । पुरोडाशपात्राङ्गमिति । पुरोडाशपात्राणामुलूखलादीनामङ्गमित्यर्थः ।

एवं स्थानं निरूप्य समाख्यां लक्षयति । समाख्या यौ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैदिकी लौकिकी च । तत्र होतुश्चमसभक्षणाङ्गत्वं होतृचमस इति वैदिकसमाख्यया । अध्वर्योस्तत्तत्पदार्थाङ्गत्वं लौकिक्या आध्वर्यवमिति समाख्ययेति

गिकः शब्द इति । अत्र यौगिकशब्दत्वं लक्षणं समाख्येति लक्ष्यम् । शब्दश्चतुर्धा यौगिको रूढो योगरूढो यौगिकरूढश्चेति । तत्राध्वर्यवं पाचक इत्यादिर्यौगिकः स एव समाख्येति चोच्यते । यत्रावयवार्थ एव ज्ञायते स यौगिक इति तन्निर्वचनम् । योऽवयवशक्तिनिरपेक्षया समुदायशक्त्यैवार्थं बोधयति स रूढो यथा गवादिशब्दः । यस्त्ववयवशक्तिविषये समुदायशक्त्यापि प्रवर्तते स योगरूढः—यथा पङ्कजादिशब्दः पङ्कजादिशब्दस्यैवावयवशक्त्या पङ्कजनिकर्तृत्वेन समुदायशक्त्या च पद्मत्वेन रूपेण पद्मबोधकत्वात् । यस्त्ववयवशक्तिसमुदायशक्तिभ्यां रूढार्थं यौगिकार्थं च स्वातन्त्र्येण बोधयति स यौगिकरूढः—यथोद्भिदादिशब्दः । स चोर्ध्वभेदनकर्तृतरुगुल्मादिकं बोधयति यागविशेषमपि चेति । सा—यौगिकशब्दात्मिका समाख्या । तत्र—तयोः समाख्ययोर्मध्यइत्यर्थः । होतुरिति । भक्षणस्य क्रियात्मकत्वेन प्राधान्यात्तत्कर्तुर्होतुर्भवति तदङ्गत्वमित्यर्थः । तत्तत्पदार्थाङ्गत्वमिति । "पुरोऽध्वर्युर्विभजती"त्यादिना यजुर्वेदेन च विहितानां पदार्थानामङ्गत्वमित्यर्थः । लौकिक्येति । याज्ञिकैः परिकल्पितयेत्यर्थः । तृतीये स्थितं "प्रैतुहोतुश्चमस" इत्यत्र समाख्या भक्षहेतुः "हरिरसि हारियोजन" इत्यनेन मन्त्रेण गृह्यमाणो ग्रहो हारियोजनः । तत्र वाक्यं "वषट्कर्तुः प्रथमभक्ष" इत्यत्र वषट्कार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सङ्क्षेपः ।

तदेवं निरूपितानि सङ्क्षेपतः श्रुत्यादीनि षट् प्रमाणानि । एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेतेत्येवं रूपेण यानि नियोज्यन्ते तान्यङ्गानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति । तत्र सिद्धानि जाति-

---

इत्येवमुक्तत्वात् त्रय एव भक्षहेतव इति प्राप्ते राद्धान्तः "हविर्धाने ग्रावभिरभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति" इति श्रूयते । उत्तरवेद्याः प्रतीचीने सदसः प्राचीने मण्डपे ऽभिषवः उत्तरवेद्यां होमः सदसि भक्षणं तत्राभिषवहोमयोर्वचनान्तरप्राप्तयोरविधेयतया तौ निमित्तत्वेनानूद्य भक्षणं विधीयते । तस्मात्समाख्यादिवदेव तयोरपि हेतुत्वमस्तीत्यभिप्रेत्याह । सङ्क्षेप इति ।

श्रुत्यादिप्रमाणस्य विनियोगविधिसहकारिणो निरूपणमुपसंहरति । तदेवमिति । एतैः षड्भिः प्रमाणैः सहकृतेन विनियोगविधिना यान्यङ्गानि विनियुज्यन्ते तानि विनियोगविधेः स्वरूपमनुवदन् विभजते । एतदित्यादिना । तत्र सिद्धरूपाणि निर्दिशति । तत्रेति । सिद्धरूपक्रियारूपाणां मध्य इत्यर्थः । जातिः पशुत्वादि, द्रव्यं–व्रीह्यादि, सङ्ख्या–एकत्वादि । तेषां यागस्वरूपोपकारकत्वेन दृष्टार्थत्वमेवेत्याह । तानि चेति । क्रियारूपाणां विभागद्वारा लक्षणमाह । क्रियारूपाणीत्यादिना । गुणस्य–कर्माङ्गस्य द्रव्यादेः–सं-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रव्यसङ्ख्यादीनि। तानि च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि। गुणकर्माणि प्रधानकर्माणि च। एतान्येव सन्निपत्योपकारकाणि आरादुपकारकाणि चोच्यन्ते। कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्। यथाऽवघातप्रोक्षणादि। तच्च दृष्टार्थं अदृष्टार्थं दृष्टादृष्टार्थं चेति।

स्कारकाणि क्रियाविशेषरूपाणि गुणकर्माणि यथाऽवघातादीनि प्रधानस्य फलापूर्वस्योपकारकाणि तानि प्रधानकर्माणि। यथा प्रयाजादीनि। तेषामेव लक्षणान्तरमाह। एतान्येवेत्यादिना। सन्निपत्योपकारकाणां लक्षणमाह। कर्माङ्गेत्यादिना। यानि चाङ्गानि साक्षात्परम्परया वा विहितफलसाधनयागशरीरं निष्पाद्य तद्द्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि सन्निपत्योपकारकाणीति फलितम्। द्रव्यादीत्यादिना देवतादिपरिग्रहः। क्रियारूपत्वं सर्वेषां कर्मणां गुणकर्मत्वमवघातादीनां, प्रधानकर्मत्वं प्रयाजादीनां, सन्निपत्योपकारत्वमवघातादीनामारादुपकारकत्वं प्रयाजादीनां च लक्षणमिति समुदायतात्पर्यम्। तत्रोदाहरणमाह। यथाऽवघातेति। सन्निपत्योपकारकाणां पुनरपि त्रिविधं विभागं करोति। तच्चेत्यादिना। तच्च सन्निपत्योपकारकं चेत्यर्थः। दृष्टार्थमुदाहरति। दृष्टार्थमवघातादीति। अवघातादेस्तुषविमोकादिरूपदृष्टद्वारा यागस्वरूपतदुत्पत्त्यपूर्वहेतुत्वात्सम्भवति तस्य दृष्टार्थत्वमित्यर्थः। अदृष्टार्थमुदाहरति। अदृष्टार्थमिति। प्रोक्षणादेर्व्रीहिगतसंस्काररूपा-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र दृष्टार्थमवघातादि, अदृष्टार्थं प्रोक्षणादि, दृष्टादृष्टार्थं पशुपुरोडाशादि, तद्धि द्रव्यत्यागांशेनैव अदृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति । द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम् । यथा प्रयाजादि । आरादुपकारकं च परमापूर्वोत्पत्तावेवोपयुज्यते । सन्निपत्योपकारकं तु द्रव्यदेवता-

---

तिशयदृष्टद्वारा प्रधानयागोत्पत्त्यपूर्वहेतुत्वात्सम्भवति केवलादृष्टार्थत्वं प्रोक्षणमन्तरेणापि यागस्वरूपानुपपत्त्यभावात् दृष्टोपकारासम्भवात् । दृष्टादृष्टोभयार्थमुदाहरति । दृष्टादृष्टार्थमिति । पशुपुरोडाशादीत्यादीना यागादिसङ्ग्रहः । तद्धि पशुपुरोडाशादि हीत्यर्थः । अदृष्टमिति । यागोत्पत्त्यपूर्वद्वारा फलापूर्वमित्यर्थः । आरादुपकारकाणां लक्षणमाह । द्रव्याद्यनुद्दिश्येति । आत्मसमवेतापूर्वजनकान्यारादुपकाणीत्यपि वदन्ति । तत्रोदाहरणमाह । यथेति । प्रयाजादीत्यादिनाऽऽज्यभागानुयाजादिपरिग्रहः । अत्र परमापूर्वोत्पत्तावेवेत्येवकारेण द्रव्यदेवतागतसंस्कारजननद्वारा यागस्वरूपोपयोगित्वमारादुपकारकाणां निरस्यते यागस्वरूपेपीत्यपिना सन्निपत्योपकारकाणां द्रव्यदेवतासंस्कारद्वारा यागोत्पत्त्यपूर्वेप्युपकारकत्वं समुच्चीयते । अत्र च व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिर्वर्तकत्वं तद्द्वारा यागशरीरतदुत्पत्त्यपूर्वजनकत्वं च भवति याज्यानुवाक्यादेर्देवतासंस्कारद्वारा यागोत्पत्त्यपूर्वादावुपयोगित्वं देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वं तद्द्वारा तदुत्पत्त्यपूर्वनिष्पादकत्वं च भवति यागस्य देवतोद्दे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते । इदमेव चा-

शेन द्रव्यत्यागस्वरूपत्वाद्द्रव्यदेवते खलु यागस्वरूपमित्यभ्युपगमाच्चेति ध्येयम् । इदमेव चेति । सन्निपत्योपकारकमेव च न त्वारादुपकारकमित्यर्थः । आश्रयि—द्रव्यदेवतादिरूप आश्रयोस्यास्तीत्याश्रयि, पारिभाषिकी वाऽऽश्रयिकर्मेति संज्ञा। इदमेव सामवायिकर्मेत्यपि वदन्ति ।

किञ्च सामान्यतः कर्म द्विविधमर्थकर्म गुणकर्म चेति । तत्रात्मसमवेतापूर्वजनकं कर्मार्थकर्म यथाऽग्निहोत्रदर्शपूर्णमासप्रयाजानुयाजादिकं तस्यात्मगतफलापूर्वजनकत्वात् । द्रव्यादि संस्कारजनकं द्वितीयम् । तदेव सान्निपत्योपकारकमित्युक्तम् । तदपि द्विविधम्—उपयोक्ष्यमाणसंस्कारकमुपयुक्तसंस्कारकं चेति। तत्रावघातप्रोक्षणादिकमुपयोक्ष्यमाणसंस्कारकं यागे व्रीहीणामुपयोक्ष्यमाणत्वात् । प्रतिपत्तिकर्म चात्वाले कृष्णविषाणप्रासनेडाभक्षणादिकमुपयुक्तकृष्णविषाणपुरोडाशादिसंस्कारकं द्वितीयम् । उपयुक्तस्याऽऽकीर्णकरस्यावशिष्यमाणद्रव्यादेर्विहितदेशे संस्कारविशेषहेतुः प्रक्षेपः प्रतिपत्तिकर्म । उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वमित्यपि वदन्ति । ननु भवतु कथञ्चिदिडाभक्षणस्य प्रधानयागोपयुक्ताऽऽकीर्णकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात्प्रतिपत्तिकर्मत्वं चात्वाले कृष्णविषाणप्रासनस्याग्निहोत्रादिकर्मवद्विहितबहिर्देशविशेषे प्रक्षेपक्रियात्मकत्वात्कथं प्रतिपत्तिकर्मत्वं तथा च तद्वदर्थकर्मत्वमेव तस्य, तदित्थं श्रूयते ज्योतिष्टोमे "नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति" यजमानेन दक्षिणा दत्ता ऋत्विग्भिर्यदा नीतास्तदा यजमानः स्वहस्ते धृतं कृष्णमृगस्य शृङ्गं चात्वालना-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रयिकर्मेत्युच्यते । तदेवं निरूपितः सङ्क्षेपतो विनियोगविधिः ।

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव ।

मकगर्ते परित्यजेत् सोऽयं परित्यागोऽर्थकर्म कुतः—सप्रयोजनत्वलाभात् । प्रतिपत्तिकर्मत्वे ऽपूर्वाभावे निरर्थकः स्यात् तस्मादपूर्वलाभायार्थकर्मत्वमेव नतु प्रतिपत्तिकर्मत्वमिति चेन्न । "कृष्णविषाणया कण्डूयती" ति तृतीयाश्रुत्या यजमानशिरःकण्डूतावुपयुक्तस्य कृष्णविषाणस्य प्रतिपत्त्यपेक्षत्वात् । नच प्रतिपत्तिकर्मत्वेऽत्यन्तमपूर्वाभावः चात्वाल एव प्रासनमित्येवंविधस्य नियमस्य वैधत्वेन प्रासनक्रियाप्रयुक्तापूर्वाभावेऽपि नियमापूर्वसद्भावात् । तस्मात्प्रासनं प्रतिपत्तिकर्मेति । तमेतं सर्वमभिप्रेत्य विनियोगविधिनिरूपणमुपसंहरति । तदेवमिति ।

इदानीं प्रयोगविधिं निरूपयति । प्रयोगेत्यादिना । साङ्गप्रधानकर्मप्रयोगप्राशुभावबोधक इत्यर्थः । स च प्रयोगविधिः प्रयाजाद्यङ्गजातवाक्यैकवाक्यतामापन्नो"दर्शपूर्णमासाभ्यां स्वर्गकामोयजेते"त्यादिप्रधानविधिरेवोक्तवक्ष्यमाणविधित्रयमेलनरूपश्चतुर्थोऽयं विधिर्न तु विध्यन्तरमित्याह । स चेति । तत्र हेतुं प्रदर्शयन् प्रयोगप्राशुभावशब्दं व्याचष्टे । सहीत्यादीना । प्रयोगविधिः साङ्गप्रधानकर्मप्रयोगाविलम्बं विधत्ते तद्विलम्बे प्रमाणाभावात् सम्प्रतिपन्नवत् । तत्र प्रयोगविधिः न तत्प्रयोगाविलम्बं विधत्ते तदविलम्बे प्रमाणाभावादिति स-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते । न-च तदविलम्बेऽपि प्रमाणाभाव इति वाच्यम् । विलम्बे त्वङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः विलम्बेन क्रियमाणयोः पदार्थयोरिदमनेन सहकृतमिति साहित्यव्यवहाराभावात् । स

प्रतिसाधनतामाशङ्क्य समाधत्ते । सचेत्यादिना । अङ्गप्रधानविध्योरेकवाक्यतयाऽवगतस्याङ्गप्रधानयोः साहित्यस्यानुपपत्तेरेव तदविलम्बे प्रमाणत्वान्न तत्र प्रमाणाभाववचनं शोभतेतरामिति । तत्रार्थापत्तिं प्रमाणं दर्शयति । विलम्बइत्यादिना । हिशब्देन तत्साहित्यनिश्चयं द्योतयति । प्रयाजाद्यङ्गजातमङ्गशब्दार्थः । प्रधानशब्देन च दर्शादिः प्रधानयागोहुच्यते तावेव तच्छब्दार्थः । नच तत्साहित्यमेव नास्तीति वाच्यम् । अङ्गप्रधानविध्येकवाक्यत्वानुपपत्तेः प्रयोजनान्तरानुपलब्धेश्च । नन्वविलम्बमन्तरेण नाङ्गप्रधानयोः साहित्यानुपपत्तिः तेन विनापि तथा व्यवहारादित्याशङ्क्य मैवमित्याह । विलम्बेनेत्यादिना । पूर्वेन्हि परेन्हि च क्रियमाणयोर्भोजनयोरिदमनेन भोजनेन सहकृतमिति व्यवहारादर्शनान्न विलम्बेन क्रियमाणयोरङ्गप्रधानयोः साहित्यव्यवहारोऽभ्रान्तस्योपपद्यते ततश्च सा तदवस्थेत्यर्थः । सोऽप्यङ्गप्रधानयोरविलम्बस्तन्नियतक्रमसमाश्रयणे सम्भवति यथाऽऽग्नेयहविरभिधारणं ततश्चैन्द्रदधिहविरभिधारणं तत आग्नेययागानुष्ठानं तदनन्तरमैन्द्रदधियागानुष्ठा

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

चाविलम्बो नियते क्रम आश्रीयमाणे भवति अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः । अतः प्रयोगविधिरेव स्वविधे-

---

नमिति नियतः क्रमः ततश्चैकान्तरितव्यवधानेनाऽविलम्ब इति सर्वमुपरिष्टात्स्पष्टीभविष्यतीत्यभिप्रेत्याह ।

सचेत्यादिना । क्रमाऽनङ्गीकारे दोषमाह । अन्यथेत्यादिना । प्रयोगविक्षेपापत्तेरिति । किमाग्नेयहविषोऽभिघारणमैन्द्रदधिहविरभिघारणानन्तरं कर्तव्यं किं वैन्द्रदधिहविषोऽभिघारणमाग्नेयहविरभिघारणानन्तरमित्येवं सर्वत्र सन्देहेन सर्वानुष्ठानोच्छेदापत्तेरित्यर्थः । संशयात्मा विनश्यतीत्यादिना भगवद्वचनेन संशयात्मन ऐहिकभोगसाधनेपि प्रवृत्त्यभावोपलम्भाच्च सन्दिहानस्यामुत्रभोगसाधने प्रवृत्तिरुपपद्यत इति भावः । ननु नाङ्गप्रधानयोर्नियतः क्रम उपपद्यते तद्विधायकाभावात् । नच प्रयोगविधिरेव तद्विधायको वाक्यभेदापातात् (१)कथं न प्रयोगविधेरेव प्रयोगप्राशुभावविधायकत्वे गुणप्रधानयोर्नियतक्रमविधाकत्वे च वाक्यभेदापात इति चेन्मैवमित्याह । अत इत्यादिना । यतोऽङ्गप्रधानयोर्नियतक्रममन्तरेणाविलम्बापरनामधेयप्रयोगप्राशुभावो नोपपद्यते ऽतः स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि प्रयोगविधिरेव विधत्ते इत्यर्थः(२) । वाक्यभेदनिरासाय पदार्थविशेषणतयेत्युक्तं व्या-

---

(१) कथं नेत्यस्य वाक्यभेदापात इत्यनेनान्वयः ।

(२) यद्यपि क्रमस्य क्रियारूपत्वाभावेन स्वतोविधिर्न सम्भवति, नापि द्रव्याद्विवत्ताद्विशेषणतया, क्रमस्यैकैकपदार्थाश्रयत्वेनानवग-

ngannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्प्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते । अत एवाङ्गानां क्रमबोधको

पारभेदेन हि विधाने वाक्यभेदो भवति नतु विशिष्टविधान इत्यवोचामेतिभावः । पदार्थश्चात्र क्रियारूपो ग्राह्यः अन्यथा क्रमविधानानुपपत्तेः । तदुक्तं माधवेन यद्यपि क्रमस्य क्रियात्वाभावात्स्वरूपेण न विधियोग्यता तथापि दधिना जुहोतीत्यादावक्रियारूपं दधिद्रव्यं यथा क्रियाविशेषणं सद्विधीयते दधिसाधनकं होमं कुर्य्यादिति । एवमनेन क्रमेण कर्तव्यमिति क्रियाविशेषणतया क्रमो विधीयतामिति । यतः प्रयोगविधिरेव पदार्थविशेषणतया तन्नियतक्रममपि विधत्तेऽतएवकारणात्तस्य लक्षणान्तरमपीत्याह । अत एवेति । ननु क्रमबोधक इत्यत्र किंलक्षणः क्रमोऽभिमत इत्याकाङ्क्षायां क्रमं लक्षयति । तत्र क्रम इति । यद्वा वाक्यार्थबोधे पदार्थज्ञानस्य हेतुत्वात्क्रमपदार्थज्ञानमन्तरेण प्रयोगविधिलक्षणवाक्यार्थबोधो न स्यात्ततश्च क्रमपदार्थो वक्तव्य इत्याकाङ्क्षायां क्रमलक्षणमाह । तत्र क्रम इति । तत्र प्रयोगविधिलक्ष-

---

मात्सङ्घाताविशेषणत्वात् तस्याविधेयत्वादशब्दाभिहितत्वाच्च क्रमस्य विध्यन्वयासम्भवादविधेय एव क्रम इति, तथापि द्रव्यादिवत्क्रियाविशेषणत्वात् विधानं सम्भवति न चायं क्रमः सङ्घातविशेषणं तस्यैकत्वेनाक्रमभाजनत्वात् पदार्थास्तु यद्यपि प्रत्येकं न क्रममनुभवन्ति परस्परमिलितास्तु संयोगवद्वितितिरूपं क्रमं बिभ्रति बहवश्च ते प्रयोगविधिना विधीयन्ते इति तद्विशेषणतया श्रुत्यादिसमर्पितः क्रमः सुखं विधीयते अनभिहितोपि कथञ्चिद्बुद्धिमागतोऽपेक्षितो योग्यश्चेति प्राकृतोपकारवद्विकृतौ शक्यते ऽभिधातुमिति भावः ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

विधिः प्रयोगविधिरित्यपि लक्षणम् । तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा । तत्र षट्प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि ।

णवाक्यार्थघटकपदार्थानां मध्य इत्यर्थः । विततनं वितानो वा विततिः तनुविस्तार इति धातोः स्त्रियां भावे क्तिन्प्रत्यये विततिरिति रूपं तथा च बहुभिः कर्तृभिर्युगपत्कृतानामपि पदार्थानां वितानविशेषो भवत्येव नतु तत्र क्रमव्यवहार इत्यरुच्या लक्षणान्तरमाह । पौर्वापर्यरूपोवेति । यद्वा युगपत्कृतानां क्रमेण कृतानां वा पदार्थानां वितानाविशेषेपि विशेषपदसूचितं पौर्वापर्यरूपं विवक्षितं लक्षणार्थं लक्षणान्तरव्याजेन वाशब्दमनास्थायां निश्चयार्थं वा मत्वा प्रकटयति । पौर्वापर्यरूपोवेति । तदुक्तं तत्तत्पदार्थानन्तरं तत्तत्पदार्था इत्येवमनेकपदार्थवृत्तिपौर्वापर्यसमुदायरूपविततिरेव क्रम इति ।

अत्र भाट्टदीपिकाकारास्तु तत्र क्रमोनामाव्यवहितोत्तरत्वरूपमानन्तर्यम् । तच्चैकप्रतियोगिकमेकवृत्ति यथा "वेदं कृत्वा वेदिं करोति" इत्यत्र वेदकरणप्रतियोगिकमानन्तर्यं वेदिकरणवृत्ति । अत्र दर्शपूर्णमासोत्तरत्वस्यापि सोमाङ्गत्वात्तद्व्यावृत्त्यर्थमव्यवहितेति विशेषणम् । तत्र दर्शपूर्णमासपूर्वकालताकत्वमात्रं क्त्वाप्रत्ययार्थः न त्वव्यवहितांशोपि । नच सोमविधेस्तदपेक्षा, येनाव्यवधान एव तत्पर्यवस्येत सोमविधेर्भिन्नप्रयोगविधिविधेयदर्शपूर्णमासप्रतियोगिकक्रमानपेक्षत्वात् । अतस्तत्रोत्तरकालत्वमेव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रक्रमपरवचनं श्रुतिः तच्च द्विविधम् । केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति । तत्र "वेदं कृत्वा वेदिं करोती"ति केवलक्रमपरं वेदिकरणादेर्वचनाविधेयं न क्रमः, क्रमश्च सर्वत्रोत्तरपदार्थाङ्गन्तस्यैव क्वाहं कर्तव्य इत्यवेक्षणान्नतु पूर्वपदार्थाङ्गं, तदुत्तरं कः पदार्थः कर्तव्य इत्यपेक्षायाः क्वचिदप्यदर्शनात् । पूर्वपदार्थस्तु प्रतियोगितया क्रमविशेषणं दर्शपूर्णमासादिरिव पूर्वकालतायाः । एतेन क्रमः पदार्थद्वयाङ्गमिति केषांचिदुक्तमपास्तम् । प्रमाणाभावात् । अस्तु वा प्रथमभक्ष इत्यादौ प्राथम्यं पूर्वपदार्थाङ्गमेवेत्याहुः ।

तन्नियमे च षट् प्रमाणानि श्रुत्यादीनि भवन्तीत्याह । तत्रेति । तत्र क्रम इत्यर्थः । तत्र श्रुतिं लक्षयति । तत्रेति । तत्र षट्सु प्रमाणेषु मध्य इत्यर्थः । क्रमपरवचनं वृत्त्या क्रमबोधकं क्लृप्तशब्दमित्यर्थः । तच्चाथशब्दादिकम् । तत्राथशब्दस्यानन्तर्यवाचित्वं शक्त्यैव । क्त्वाप्रत्ययादीनां तु पूर्वकालादिवाचिनामपेक्षानुरोधात्क्रमपरत्वं लक्षणया अर्थादिषु कल्प्यशब्दस्यैव क्रमबोधकत्वात् क्लृप्तेति विशेषणम् । श्रुतिं विभजते । तच्चेति । क्रमपरवचनं चेत्यर्थः । तत्र केवलक्रमपरं वचनमुदाहरति । तत्रेत्यादिना । तत्र तयोर्द्वयोर्मध्य इत्यर्थः । वेदः-दर्भमुष्टिविशेषः वेदिः-आहवनीयगार्हपत्ययोर्मध्ये चतुरङ्गुलनिखातं भूतलं हविर्निधानस्थानविशेषरूपम् । तस्य केवलक्रमपरत्वे हेतुमाह । वेदीत्यादिना । दर्शपूर्णमासयोर्हविरधिवासनोत्तरं वेदिकरणविधिवाक्येनैव वेदिकरणस्य प्राप्तत्वात्तदनुवादेन क्त्वाप्र-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्तरप्राप्तत्वात् । "वषट्कर्त्तुः प्रथमभक्ष" इति तु क्रमविशिष्टपदार्थपरम्—एकप्रसरताभङ्गभयेन(१) भक्षानु-

त्ययोक्तक्रममात्रमत्र विधीयत इति भावः । अत्र क्त्वाप्रत्ययोक्तस्य क्रमस्य वाक्यादेव वेदिकरणाङ्गत्वं तत्त्वेनैव तद्विधिरिति बोध्यम् । क्रमविशिष्टपदार्थपरं वचनमुदाहरति । वषट्कर्तुरिति । ननु भक्षस्य कथं चित्सम्भवत्प्राप्तिकत्वसम्भवात्प्रथमशब्दोक्तक्रममात्रस्यापि विधानं भविष्यतीत्याशङ्क्य तत्र हेतुमाह । एकेत्यादिना । तथा च प्राथम्यविशिष्टैकभक्षपदार्थप्रसरभावस्य विशिष्टोपस्थितिरूपस्य भङ्गभिया न क्रममात्रं विधातुं शक्यतेऽन्यथा यो वषट्कर्तुर्भक्षः स प्रथम इत्युपस्थितिः स्यान्नतु वषट्कर्तृत्वोपाधिविशिष्टसम्बन्ध्यभिन्नः प्राथम्यविशिष्टभक्ष इति भावः । यद्वा एकप्रसरताभङ्ग एकवाक्यताभङ्गो बोध्यः भक्षस्याप्यनेनैव विधा-

(१) एकप्रसरता एकविशिष्टोपस्थापकता तस्याश्चैकार्थीभाववादिमते समासादौ सत्त्वात् तत्र पूर्वोत्तरपदार्थयोरुद्देश्यविधेयभावे पृथगर्थोपस्थितिनियमस्योपगमेन तस्यास्तत्र भङ्गप्रसङ्गः नीलघट इत्यादितो घटोद्देश्यकनीलविधेयकबोधानुदयेनैकसुबन्तैतिङन्तघटकपदार्थयोरुद्देश्यविधेयभावेनान्वयबोधस्याव्युत्पन्नत्वात् अत एवेदृशबोधतात्पर्येण तादृशपदानां प्रयोगे एकप्रसरताभङ्गो दोष इति शाब्दिका वदन्ति आलङ्कारिका अपि इमं दोषमविमृष्टविधेयांशमिति व्यवहरन्तो द्वितीयमौर्वीमिव कार्मुकस्येत्यादौ मौर्वीं द्वितीयामिव कार्मुकस्येति रचनामनुमन्यन्ते नैयायिकाश्च स्वत्वपक्षकनिरूपितत्वसम्बन्धेन राजसाध्यकन्यायेराज्ञइति प्रतिज्ञा अनुकूलतासम्बन्धेन पाकसाध्यककृतिपक्षकन्याये पचतीति च प्रतिज्ञा न सम्प्रदायसिद्धेति वर्णयन्ति अतः कथमपि भक्षणोद्देशेन प्राथम्यविधानासम्भवात्प्राथम्यविशिष्टभक्षणमेव विधेयमिति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

नाभ्युपगमात् तथाचानेन विहितभक्षानुवादेन प्रथमशब्दोपात्तक्रमविधान एकवाक्यताभङ्गेनावृत्त्यात्मको वाक्यभेदः स्यादिति भावः । अत्रापि क्रमविशिष्टभक्षविधानात्प्रथमपदोक्तक्रमस्य वाक्याद्भक्षाङ्गत्वमिति ध्येयम् । अत्रेदं बोध्यम्—यत्र धात्वर्थस्य क्लृप्तप्रमाणेन प्राप्त्यभावेपि कथं चित्सम्भवत्प्राप्तिकस्य पुनर्विधानेन किञ्चित्प्रयोजनं विधेयान्तरं च नान्यत्किञ्चित्तत्र क्रम एव श्रुत्युक्तो विधीयते यथा सत्रात्मके द्वादशाहे "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्द्धिनो दीक्षयति ब्राह्मणाच्छंसिनं ब्रह्मणः प्रस्तोतारमुद्गातुर्मैत्रावरुणं होतुस्ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति आग्नीध्रं ब्रह्मणः प्रतिहर्तारमुद्गातुरच्छावाकं होतुस्ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति पोतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुर्ग्रावस्तुतं होतुस्ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारीवा ऽऽचार्यप्रेषित" इति श्रुते वाक्ये । अत्र हि न दीक्षायाः स्वरूपेण तत्तत्संस्कारकत्वेन वा विधिरातिदेशप्राप्तत्वात् । प्रकृतौ हि यजमानसंस्कारार्था दीक्षाऽतिदेशेनैव सत्रे प्राप्यते, सत्रे च "ये यजमानास्त ऋत्विज" इति वचनेन ऋत्विक्कार्योद्देशेन यजमानविधानाद्ब्रह्मादीनां यजमानत्वेनैव प्रतिप्रधानं गुणावृत्तिन्यायेन तत्तत्संस्कारकत्वप्राप्तेः ततश्च दीक्षारूपं धात्वर्थमनूद्याख्यातेन क्त्वाप्रत्ययोक्तस्ततःशब्दोक्तश्च क्रमो विधीयते । अत्र चायमर्थः । अध्वर्युर्यजुर्वेदोक्तं करोति तस्य पुरुषास्त्रयः प्रतिप्रस्थाता नेष्टोन्नेता चेति, एते चत्वारो दीक्षयितारः, ब्रह्मा वेदत्रयोक्तस्य प्रत्यवेक्षणं करोति तस्य पुरुषास्त्रयः ब्राह्मणाच्छंसी अग्नीत् पोता चेति, उद्गातोद्गानं करोति तस्य पुरुषास्त्रयः प्रस्तो-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

ता प्रतिहर्ता सुब्रह्मण्यश्चेति, होता शंसनं करोति तस्य पुरुषास्त्रयः मैत्रावरुणोऽच्छावाकः ग्रावस्तुच्चेति, चतुर्षु वर्गेषु ये प्रथमास्ते दक्षिणां सम्पूर्णामाप्नुवन्ति ये द्वितीयास्ते तदर्द्धं प्राप्नुवन्ति ततोऽर्द्धिन उच्यन्ते, ये तृतीयास्ते तृतीयांशं प्राप्नुवन्तीति तृतीयिनः । ये चतुर्थास्ते चतुर्थांशं प्राप्नुवन्तीति पादिनः । तानेतानुक्तक्रमेण स स पुरुषः करोतीति । किञ्च "इतरमन्यस्तेषां यतो विशेषः स्या"दिति(१)न्यायेनाध्वर्युपुरुषाणामाद्यः प्रतिप्रस्थातैवाध्वर्युदीक्षायां प्राप्नोति ब्राह्मणाच्छंस्यादि

(१) ३ अ० ८ पा० १० अधिकरणे विचारितम्-अग्नीषोमीयपशौ परिवीरसि इत्यनेन करणमन्त्रेणाध्वर्युर्यूपस्य रशनया परिव्याणं करोति तदानीं क्रियमाणं तत्परिव्याणं होता युवा सुवासा इत्यनेन मन्त्रेणानुवदति तदेतदुभयं चोदकपरम्परया कुण्डपायिनामयने प्राप्तं तत्राध्वर्योर्होतुश्च समासः समाम्नातः योहोता सोऽध्वर्युरिति होतारमनूद्याध्वर्युत्वविधानादध्वर्युकार्यं होत्राऽनुष्ठेयं ततः परिवीरसि इत्यनेन करणमन्त्रेण होता यूपपरिव्याणं कुर्वीत तदानीं स्वस्य चोदकतः प्राप्तं हौत्रमपि होता न त्यजेत् नहि त्यागहेतुं कंचिन्निषेधं पश्यामः तस्मात्क्रियमाणं तत्परिव्याणं युवा सुवासा इत्यनेन मन्त्रेण होताऽनुवदेत् इति प्राप्ते सूत्रम् विप्रतिषेधे करणं समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात् । विप्रतिषेधे—उक्तरीत्या विरोधे करणमध्वर्युमन्त्रं ब्रूयात् । समवाये प्रत्यक्षेण यो होतेति वचनविधेयस्वरूपसम्बन्धे विशेषात् आनुमानिकचोदकशास्त्रसम्बन्धात्प्राबल्यरूपविशेषात्, तथापि आनुमानिकशास्त्रस्यापि नात्यन्तं बाध इत्याह इतरं चोदकशास्त्रप्राप्तं अन्यः होतृगणसम्बन्धी मैत्रावरुण एव पठेत् यतः होतुः मैत्रावरुणे अच्छावाकादिभ्यः विशेषः होतृसामीप्यगणे द्वितीयत्वात् स्यात् अतःद्वयोरध्वर्युहोत्रोरुचितं कर्मद्वयमेको होता युगपत्कर्तुं न शक्नोति ततोऽन्यतरस्यावश्यं भाविनि त्यागे चोदकतः प्राप्तं हौत्रमेव त्यजेत् आध्वर्यवं तु यो होता सोऽध्वर्युरित्यनेन प्रापितत्वादनुष्ठेयम् इति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वादेन क्रममात्रस्य विधातुमशक्यत्वात् ।

सेयं श्रुतिरितरप्रमाणापेक्षया बलवती । तेषां

दीक्षासु त्वध्वर्यो"र्नपूतः पावयेदि"ति वचनेन सत्रप्रकरणपठितेन दीक्षासु दीक्षाख्यसंस्काररहितपुरुषकर्तृविधायकेन पर्य्युदासात्प्रतिप्रस्थातृप्राप्तिः सुलभैव । एवं प्रतिप्रस्थात्रादिदीक्षासु नेष्टुः प्रतिप्रस्थात्रनन्तरस्य नेष्ट्रादिदीक्षासु चोन्नेतुर्नेष्ट्रनन्तरस्य प्राप्तिर्न्यायादेवेति न विधेयान्तराशङ्का अतः क्रम एवात्राप्राप्तः स एव तत्तद्दीक्षोद्देशेन विधीयते । अत एव चैतानि द्वादशवाक्यानि श्रौतक्रमविधायकानि अर्द्धित्वाद्युद्देश्यतावच्छेदकमङ्गीकृत्य षडेव वा, उन्नेतृदीक्षावाक्ये तु वैकल्पिकब्रह्मचारिविधानात् हृदयादिन्यायेन पाठादेव क्रमसिद्धेस्तत इत्यनुवादः । निपातत्वाच्च वाशब्दस्य ब्रह्मचारिविशेषणत्वेन न वाक्यभेदः ब्राह्मणानामेवार्त्विज्यविधानाद्ब्राह्मण इति चानुवादः ब्रह्मचारिणश्चाचार्याधीनत्वस्मृतेराचार्यप्रेषित इत्यप्यनुवादः। यत्तु यद्यप्यत्र क्रमस्य वाचकः शब्दो नास्ति तथापि वाक्येन प्रतीयते स च प्रतीयमानः क्रमोमानान्तरेण कर्तव्यतया प्राप्त्यभावादिह विधीयत इति। तन्न। क्त्वाप्रत्ययादेः क्रमवाचकस्योक्तत्वात् अतः क्रम एवात्राप्राप्तस्तत्तद्दीक्षोद्देशेन विधीयते क्त्वाप्रत्ययोक्तस्ततः पदोक्तश्चेति भाट्टदीपिकाविरोधाच्चेति ।

इदानीमुक्तश्रुतेरर्थपाठादिप्रमाणापेक्षया प्राबल्यमाह । सेयं श्रुतिरिति । अर्थादिप्रमाणानां श्रुतिकल्पनद्वारा क्रमे प्रामाण्यादिति तत्र हेतुमाह । तेषामित्यादिना । ज्योतिष्टोम

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

वचनकल्पनद्वारा क्रमप्रमाणत्वात् । अत एवाऽऽश्विनग्रहणस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्ता "वाश्विनो दशमो गृह्यत" इति वचनात् दशमस्थाने ग्रहणमित्युक्तम् ।

यत्र प्रयोजनवशेन क्रमनिर्णयः सोऽर्थक्रमः—यथा "अग्निहोत्रंजुहोति यवागूं पचती"त्यग्निहोत्रयवागूपाकयोः । अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः

ऐन्द्रवायवादिग्रहेष्वाश्विननामकग्रहस्तृतीयस्थाने पठितः । ततश्च तृतीयस्थाने ग्रहणप्रसक्तावपि तस्य दशमस्थानत्वं "आश्विनो दशमो गृह्यत" इति शब्देनैवाम्नायत इति । तत्र गमकमप्याह । अत एवेत्यादिना । अत एव इतरप्रमाणापेक्षया श्रुतेः प्राबल्यादेवेत्यर्थः । इत्युक्तमिति । पञ्चमाध्याये चतुर्थपादस्य प्रथमाधिकरण इति शेषः । पाठो हि न क्रमस्याभिधायकः किन्त्वन्यथानुपपत्त्या क्रमं कल्पयति । दशम इत्येषा श्रुतिस्तु साक्षादेव क्रममभिधत्ते ततः पाठादपि श्रुतिः प्रबलेति भावः ।

इदानीमर्थक्रमं लक्षयति । यत्रेत्यादिना । प्रयोजनवशेन प्रयोजनानुपपत्त्या । तद्धि व्युत्क्रमेऽनुपपद्यमानं क्रमे प्रमाणमिति भावः । तत्रोदाहरणमाह । यथाऽग्निहोत्रमिति । अग्निहोत्रयवागूपाकयोरित्यत्र प्रयोजनवशेन क्रमनिर्णय इत्यनुषङ्गः । अत्र हीति । अत्र प्रकृते यवागूहोमयोर्मध्य इति वार्थः । तत्पाकः पूर्वमनुष्ठीयत इत्यन्वयः । होमादिति शेषः । यवागूः तच्छब्दार्थः । यवागूपाकस्य पाठक्रमेण पश्चात्करणे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोजनवशेन पूर्वमनुष्ठीयते । सचायं पाठक्रमाद्बलवान् । यथापाठं त्वनुष्ठाने क्रमप्रयोजनबाधे ऽदृष्टार्थत्वं स्यात् । न हि होमानन्तरं क्रियमाणस्य पाकस्य किञ्चित् दृष्टं प्रयोजनमस्ति ।

पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः तस्माच्च पदार्थानां क्रम आश्रीयते । येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं

पाकसंस्कृतायाः यवाग्वा होमरूपप्रयोजनस्य "यवाग्वाऽग्निहोत्रं जुहोति" इतिवचनसिद्धस्यानिष्पत्तेः । पाकस्य च यवागूत्पादकत्वेपि तस्या अनुपयुक्तायाः प्रयोजनत्वाऽनुपपत्तेस्तदन्यथानुपपत्त्या पूर्वं पाकः पश्चाद्धोमोऽनुष्ठीयते इति भावः । अर्थक्रमश्च पाठक्रमाद्बलीयान् भवतीत्याह । सचायमिति । यवागूपाकस्य यथापाठमनुष्ठानेऽदृष्टार्थत्वं स्यादिति विपक्षे बाधकमाह । यथापाठमिति । क्रमप्रयोजनबाधस्तु दर्शितो यवागूपाकस्येत्यारभ्यास्माभिरिति भावः । दृष्टमेव किञ्चित्सम्भवत्प्राप्तिकं भवेदित्यत आह । नहीत्यादिना । नहि भक्षणमन्तरेण किञ्चिद्दृष्टप्रयोजनमुपलभ्यते तच्च न पक्वयवाग्वा अदर्शनात्प्रमाणाभावाच्चेति भावः ।

पाठक्रमं लक्षयति । पदार्थेति । तस्माच्चेति । पाठक्रमाच्चेत्यर्थः । पाठक्रमात्पदार्थक्रममुत्पादयति । येनेत्यादिना । वाक्यानीति पदस्याप्युलक्षणम् । पदार्थप्रत्ययस्य कुत्रोपयोग इत्यत आह । यथाप्रत्ययं चेति । पाठक्रमं विभजते ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

जनयन्ति । यथाप्रत्ययं च पदार्थानामनुष्ठानम् । सच पाठो द्विविधः मन्त्रपाठो ब्राह्मणपाठश्चेति । तत्रा-

सच पाठो द्विविध इति । मन्त्रपाठक्रममुदाहरति । तत्रेत्यादिना । तत्र मन्त्रपाठब्राह्मणपाठयोर्मध्ये इत्यर्थः । किञ्च आग्नीषोमीययागस्तैत्तिरीयब्राह्मणपञ्चमप्रपाठके द्वितीयानुवाके समाम्नातः । "ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छ"दिति आग्नेययागस्तु षष्ठप्रपाठके तृतीयानुवाके आम्नातः "यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतोभवतीति" । तत्रानुष्ठानस्य ब्राह्मणोक्तविध्यधीनत्वादग्नीषोमीयस्य प्रथममनुष्ठानमित्याङ्क्षा मन्त्रकाण्डे पूर्वं पठिता आ· आग्नेयमन्त्राः तथा हि हौत्रकाण्डे आज्यभागमन्त्रानुवाकादुत्तरस्मिन्ननुवाके प्रथममग्निर्मूर्द्धेत्यादिक आग्नेय्यौ याज्यानुवाक्ये आम्नाते ततः "प्रजापते नत्वदेतानी"त्यादिके प्राजापत्ये ततो"ऽग्नीषोमासवेदसे"त्यादिके अग्नीषोमीये, आध्वर्यवे काण्डेप्यग्नये जुष्टन्निर्वपाम्यग्नीषोमाभ्यामित्याग्नेयः पूर्वमाम्नातः, याजमानकाण्डेप्यग्नेरहं देवयज्ययाऽन्नादोभूयास" मित्याग्नेयस्य पश्चा"ऽदग्नीषोमयोरहं देवयज्यया वृत्रहा भूयास"मित्याम्नायते, मन्त्रक्रमः प्रबलः मन्त्रैः स्मृत्वा पश्चादनुष्ठेयत्वाद्ब्राह्मणं त्वप्राप्तपदार्थे विधिनापि चरितार्थमतोऽनुष्ठानस्मरणायैवोत्पन्नान्मन्त्रान् बाधितुं नालमिति मन्त्रक्रमेणाग्नेयस्यैव प्रथममनुष्ठानमिति समाधानमभिप्रेत्य वा मन्त्रपाठस्य ब्राह्मणपाठाद्बलीयस्त्वमाह । सचायमित्यादिना । किञ्च पाठयोस्तु मन्त्रब्राह्मणगतयोर्मन्त्रपाठोबलीयान् । नतु ब्राह्मणपाठः तस्योत्पत्तिविनियोगविधिगतत्वेन प्रथमोपस्थितत्वेपि पाठस्य स्मारकक्रमविधयैव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऽऽग्नेयाग्नीषोमीययोस्तत्तद्याज्यानुवाक्यानां पाठाद्यः क्रम आश्रीयते स मन्त्रपाठात् । स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलीयान् अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रपाठस्यान्तरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदं कर्तव्यमिति अवबोध्य कृतार्थम् । मन्त्राः पुनः प्रयोगकाले व्याप्रियन्ते अनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीनत्वात् अन्तरङ्गो मन्त्रपाठ इति ।

क्रमनियामकत्वोक्तेर्मन्त्रसत्वे च तस्यैव स्मारकतया विधानोपयुक्तस्यासमर्थस्य च विधेः स्मारकत्वाभावान्मन्त्रपाठक्रम एव बलीयान् तेन च याज्यानुवाक्यादिमन्त्रपाठक्रमादाग्नेयस्य प्रथमानुष्ठानं पश्चाच्चोपांशुयाजोत्तरमग्नीषोमीयस्य, नतु ब्राह्मणपाठक्रमादग्नीषोमीयस्य प्रथमं पश्चादुपांशुयाजोत्तरमाग्नेयस्येत्यभिप्रेत्य मन्त्रपाठस्य ब्राह्मणपाठाद्बलीयस्त्वाह । सचायमित्यादिना । याज्यानुवाक्यानामिति । यजेति प्रैषानन्तरमृग्या ब्रह्मणा समुच्चार्यते सा याज्येत्युच्यते । अनुब्रूहीति प्रैषानन्तरमृग्या तेनैव समुच्चार्यते साऽनुवाक्येत्युच्यत इत्यर्थः । तस्य तद्बलीयस्त्वे हेतुमाह । अनुष्ठान इत्यादिना । मन्त्रपाठस्य ब्राह्मणपाठादनुष्ठानेऽन्तरङ्गत्वमुपपादयति । ब्राह्मणवाक्यमित्यादिना । स्मरणक्रमाधीनत्वादिति । अनुष्ठेयपदार्थस्मरणक्रमाधीनत्वादित्यर्थः । तत्क्रमस्येति । अनुष्ठेयपदार्थस्मरणक्रमस्येत्यर्थः । मन्त्रक्रमा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयाजानां "समिधो यजति तनूनपातं यजति" इत्येवंविधपाठक्रमाद्यः क्रमः स ब्राह्मणपाठक्रमात् । यद्यपि ब्राह्मणवाक्यान्यर्थं विधाय कृतार्थानि तथापि प्रयाजादीनां क्रमस्मारकान्तरस्याभावात्तान्येव क्रमस्मारकत्वेन स्वीक्रियन्ते ।

धीनत्वादिति । अनुष्ठेयपदार्थस्मारकमन्त्रक्रमाधीनत्वादित्यर्थः । प्रयाजानामनुष्ठानक्रमः "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजती"ति ब्राह्मणपाठक्रमात्स्वीक्रियते इत्याह । प्रयाजानामित्यादिना । ननु "समिधोऽग्न आज्यस्य व्यन्त्वि"त्यादिमन्त्राणां प्रयाजक्रमस्मारकाणां सत्त्वेन कथं तेषां ब्राह्मणवाक्यक्रमात्क्रमः स्वीक्रियते तद्वाक्यानां विधानमात्रे चरितार्थत्वादित्याशयेनाशङ्कते । यद्यपीति । मन्त्रपाठस्यान्यादृशत्वेन वा मन्त्राणां देवतामात्रस्मारकत्वेन क्रमस्मारकत्वाभावाद्वा प्रयाजक्रमो ब्राह्मणपाठक्रमादेवेत्याशयेन परिहरति । तथापीति । तथा च येन क्रमेण ब्राह्मणवाक्यान्यधीतानि तेनैव क्रमेणार्थस्मरणं जनयन्तीति युक्तं तेषां तेनैव क्रमेणानुष्ठानमिति भावः । वस्तुतस्तु प्रयाजक्रमो न ब्राह्मणपाठक्रमात्स्वीक्रियते समिधो ऽग्नआज्यस्य व्यन्त्वित्यादिभिः क्रमप्रकरणप्राप्तैर्मन्त्रैर्देवता गुणत्वेन समर्प्यन्त इति नवमतन्त्ररत्नविरोधप्रसङ्गात् । अन्यथा मन्त्राणामन्यादृशक्रमत्वे तदनुपपत्त्यापत्तेः किन्तु मन्त्रपाठक्रमात्क्रम एव, ब्राह्मणपाठक्रमात्क्रमस्तु यत्रार्थस्मारका मन्त्रा नसन्त्येव तेषामेव यथा तूष्णीं विहितानां कर्मणां क्रमोब्राह्मणपाठक्रमा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थानं नामोपस्थितिः । यस्य हि देशे योऽनुष्ठीयते तत्पूर्वतने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम् । अत एव साद्यस्क(१) अग्नीषोमीयसवनीयानुबन्ध्यानां सवद्भवति । तत्र तेषामेव प्रयोगसमवेतार्थस्मारकत्वात् । प्रयाजोदाहरणं तु कृत्वा चिन्तया तत्र ब्राह्मणवाक्यानां प्रयोगसमवेतार्थस्मारकत्वाभावात् । तथाचार्थवादपादे वार्तिकवचनम्—प्रयाजादिवाक्यान्यर्थं समर्प्य चरितार्थानि स्वरूपसंस्पर्शे सत्यपि प्रयोज्यतां न प्रतिपद्यन्त इति । तस्मान्मन्त्रक्रमादेव प्रयाजक्रम इति सिद्धमिति ध्येयम् ।

इदानीं स्थानं लक्षयति । स्थानं नामोपस्थितिरिति । प्रकृतौ नानादेशानां पदार्थानां विकृतौ चोदकवचनादेकस्मिन्देशे ऽनुष्ठाने कर्तव्ये यस्य देशे ते ऽनुष्ठीयन्ते तस्य प्रथममनुष्ठानमितरयोस्तु पश्चादयं यः क्रमः स स्थानक्रमः तेन चोपस्थितिविशेषेण योऽनुष्ठानक्रमः स एव स्थानक्रमः इत्युच्यत इति भावः । उपस्थितिं व्यनक्ति । यस्येत्यादिना । यस्येति ज्योतिष्टोमादिप्रकृतेः साद्यस्कादिविकृतौ चोदकप्राप्तस्य सवनीयादेरित्यर्थः । य इति । अग्नीषोमीयानुबन्ध्यादिरित्यर्थः । तत्पूर्वतन इति । तस्मात्सवनीयादेः पूर्वतने आश्विनग्रहणादौ पदार्थे कृतेसतीत्यर्थः । स एवेति । सवनीयादिरेवेत्यर्थः । प्रथममिति । अग्नीषोमीयानुबन्ध्यापेक्षया प्रथममित्यर्थः ।

(१) सद्योदीक्षयन्तिसद्यः सोमं क्रीणन्ति इत्यादि श्रुत्युक्तप्रकारेण सर्वमङ्गजातं यत्र सद्य एवानुष्ठीयते स यागविशेषः साद्यस्कशब्दवाच्यः ।

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

नीयदेशे सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चात् तस्मिन्देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथममुपस्थितेः । तथाहि ज्योतिष्टोमे त्रयः पशुयागाः अग्नीषोमीयः सवनीय आनुबन्ध्यश्चेति । ते च भिन्नदेशा अग्नीषोमीय औपवसथ्येऽन्हि, सवनीयः सुत्याकाले, आनुबन्ध्यस्त्वन्ते । साद्यस्कोनाम सोमयागविशेषः । स चाव्यक्तत्वाद्ज्योतिष्टोमविकारः अतस्ते त्रयोऽपि पशु-

---

तस्येति । सवनीयादेरेवेत्यर्थः । अत एवेति । प्रथमोपपस्थितप्रथमानुष्ठानस्य युक्तत्वादेवेत्यर्थः । इतरयोरिति । अग्नीषोमीयानुबन्ध्ययोरित्यर्थः । तस्मिन्देश इति । त्रयाणामपि पशूनां विकृतौ प्राप्तसवनीयदेश इत्यर्थः । आश्विनग्रहणानन्तरमित्यत्र सवनीयस्यैव विकृतौ प्रधानप्रत्यासत्तिबलाच्चोदकप्राप्तत्वेनोपस्थितियोग्यत्वादितिविशेषः । प्रथममिति । अग्नीषोमीयानुबन्ध्यापेक्षया प्रथममित्यर्थः । विकृतावाश्विनग्रहणान्तरमेव सवनीयस्थानप्रदर्शनाय प्रथमं प्रकृतौ तत्स्थानं प्रदर्शयति । तथाहीत्यादिना । औपवसथ्येऽन्हीत्युक्तार्थ एव । अन्त इति । अवभृथादूर्ध्वकाले इत्यर्थः । अव्यक्तत्वादिति । स्वार्थचोदितदेवतारहितत्वादित्यर्थः । तदुक्तं न्यायप्रकाशे "अव्यक्तत्वं च स्वार्थचोदितदेवताराहित्य"मिति । अत इति । ज्योतिष्टोमविकारत्वादित्यर्थः । तत्रेति । साद्यस्कइत्यर्थः । तच्चेति । श्रुतश्चेत्यर्थः । तस्ये-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योगाः साद्यस्के चोदकप्राप्ताः । तेषां तत्र साहित्यं श्रूतं "सह पशूनालभत" इति । तच्च साहित्यं सवनीयदेशे तस्य प्रधानप्रत्यासत्तेः—स्थानातिक्रमणसाम्याच्च सवनीयदेशे ह्यनुष्ठानेऽग्नीषोमीयानुबन्ध्ययोः स्वस्वस्थानातिक्रममात्रं भवति,अग्नीषोमीयदेशे त्वनुष्ठाने सवनीयस्य स्वस्थानातिक्रममात्रं अनुबन्ध्यस्य तु स्वस्थानातिक्रमः—सवनीयस्थानातिक्रमश्च स्यात् । एवमनुबन्ध्यदेशेऽग्नीषोमीयस्य द्रष्टव्यः स्थानातिक्रमः।

त्ति । सवनीयस्येत्यर्थः । प्रधानेति । यथा प्रकृतिभूते ज्योतिष्टोमे सुत्याकालिकः सवनीयः प्रधानप्रत्यासन्नस्तथैव तद्विकृतिविशेषे साद्यस्केपि तात्कालिकः स प्रधानप्रत्यासन्न एवेति भावः । सवनीयदेशे साहित्ये त्रयाणां स्वस्वस्थानातिक्रमसाम्यं हेत्वन्तरमाह । स्थानेति । तदेव स्वस्वस्थानातिक्रमसाम्यं प्रदर्शयति । सवनीयदेश इत्यारभ्य तथाचेति प्राक्तनेन ग्रन्थेन । स्वस्वस्थानातिक्रमोभवतीति । यथा प्रकृतौ तथैव विकृतावपि चोदकप्राप्तस्याग्नीषोमीयस्यौपवसथ्याहोरूपस्य स्वस्थानमात्रस्यातिक्रमोभवत्यानुबन्ध्यस्य च स्वान्तस्थानमात्रस्यातिक्रमो भवतीत्यर्थः । सवनीयस्य तु सुत्याकालरूपस्वस्थानस्य नातिक्रमो भवतीत्यत्र लाघवमिति भावः । त्रयाणामिति । स्वस्वस्थानातिक्रम इति । अग्नीषोमीयस्य देश औपवसथ्येऽन्हि सर्वेषामनुष्ठानेऽग्नीषोमीयस्य सवनीयप्रधानसोमप्रत्यासत्तिबलात्साहित्य विधिप्राप्तसुत्याकाल-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा च "प्रकृतावाश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोती"त्याश्विनग्रहणानन्तरं सवनीयो विहित इति साद्यस्केऽप्याश्विनग्रहणे कृते सवनीय एवोपस्थितोभवत्यतो युक्तं तस्य स्थानात्प्रथममनुष्ठानमितरयोस्तु पश्चादि-

---

रूपसवनीयस्थानरूपस्वस्थानातिक्रमो भवति आनुबन्ध्यस्य तु तादृशसवनीयस्थानरूपस्वस्थानातिक्रमः स्वीयान्तस्थानातिक्रमश्च सवनीयस्य तु सुत्याकालरूपस्वस्थानमात्रातिक्रमो भवतीति त्रयाणां स्वस्वस्थानातिक्रमः आनुबन्ध्यस्य देशे तु तेषामनुष्ठानेऽग्नीषोमीयस्यौपवसथ्याहोरूपस्य स्वस्थानस्यातिक्रमस्तादृशसवनीयस्थानरूपस्वस्थानस्यातिक्रमश्च भवति । आनुबन्ध्यस्य तु निरुक्तसवनीयस्थानरूपस्वस्थानस्यातिक्रमः सवनीयस्य तु स्वस्थानमात्रस्यातिक्रमश्च भवतीति त्रयाणां स्वस्वस्थानस्यातिक्रम इत्यर्थः । तथाचेति । उक्तयुक्त्या सवनीयदेशे त्रयाणामनुष्ठाने कर्तव्ये चेत्यर्थः । वैकृतसवनीयस्थाननिर्णयोपायतया प्राकृतं सवनीयस्थानं श्रुत्या प्रदर्शयति । प्रकृतावित्यादिना । त्रिवृता त्रिगुणितरज्ज्वा परिवीय परिवेष्टनं कृत्वा आश्विनः सोमग्रहः तद्ग्रहणानन्तरं ज्योतिष्टोमे सवनीयो विहित इति भावः । इति यतः प्रकृतावाश्विनग्रहणानन्तरं स विहितोऽतोहेतोरित्यर्थः । आश्विनग्रहण इति । अत्राप्याश्विनग्रहणानन्तरमेव तस्य चोदकप्राप्तत्वेन तदनन्तरमेव तदुपस्थितिरिति भावः । तस्येति । सवनीयस्येत्यर्थः । स्थानादिति । उपस्थितेरित्यर्थः । इतरयोरिति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्युक्तम् ।

प्रधानक्रमेण योऽङ्गानां क्रमः समुख्यः क्रमः ये-

अग्नीषोमीयानुबन्ध्ययोरित्यर्थः । ननु तयोः पश्चादनुष्ठानेपि कस्य प्रथममनुष्ठानं कस्य पश्चादित्यनिर्णये प्रयोगविक्षेपापत्तेरित्यत आह । उक्तमिति । पञ्चमाध्यायस्य प्रथमे पाद इति शेषः। तत्र हि स्थानात्सवनीयस्य प्राथम्ये निश्चते स्थानभ्रष्टयोस्तयोरग्नीषोमीयस्य प्रथममनुष्ठानमानुबन्ध्यस्य पश्चादित्युक्तमित्यर्थः। उक्तं हि न्यायमालाविस्तरे साद्यस्कनामकः कश्चित्सोमयागः । तत्र श्रूयते "सहपशूनालभत" इति । प्रकृतावग्नीषोमीयपशुरौपवसथ्येदिने आलभ्यते सवनीयपशुः सुत्यादिने प्रातः सवन आश्विनग्रहादूर्ध्वमालभ्यते आनुबन्ध्यः पशुरवभृथादूर्ध्वमालभ्यतें इह तु त्रयोपि पशवः सहालब्धव्याः सोयं सहालम्भः सुत्यादिन आश्विनग्रहादूर्ध्वे सवनीयस्थाने भवतीत्येतदवश्यमभ्युपेतव्यं तथासति प्रधानसोमप्रत्यासत्तिलाभादिति । सवनीयो हि स्वस्थान एव वर्तते आश्विनग्रहसामीप्यस्य सवनीयस्थानत्वात् । आश्विने गृहीते सति सवनीय एव बुद्धिस्थो भवति प्रकृतौ तदानन्तर्यस्य क्लृप्तत्वात् ततः सवनीयस्य प्राथम्ये स्थानान्निश्चिते सति स्थानभ्रष्टयोरग्नीषोमीयानुबन्ध्ययोः प्रकृताविव पूर्वोत्तरभावो द्रष्टव्य इति । यद्वा उक्तमिति । आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चादित्यत्र पूर्वत्रोक्तमित्यर्थः ।

अथ मुख्यक्रमं लक्षयति । प्रधानक्रमेणेति । तेनैव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

आग्नेयहविरभिघारण ऐन्द्रहविरभिघारण
आग्नेययाग ऐन्द्रयाग

न हि क्रमेण प्रधानानि क्रियन्ते तेनैव क्रमेण ते-षामङ्गान्यनुष्ठीयन्ते तदा सर्वेषामङ्गानां स्वैः स्वैः प्र-धानैस्तुल्यं व्यवधानं भवति । व्युत्क्रमेणानुष्ठाने के-षाञ्चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानं केषाञ्चि-दत्यन्तव्यवधानं स्यात् तच्चायुक्तं प्रयोगविध्यवगत-साहित्यबाधापत्तेः । अतः प्रधानक्रमोपि अङ्गक्रम-हेतुरत एव प्रयाजशेषेणादावाग्नेयहविषोऽभिघारण-पश्चादैन्द्रस्य दध्नः आग्नेयैन्द्रयागयोः पौर्वापर्यात् । एवं च द्वयोर्द्वयोरभिघारणयोः स्वस्वप्रधानेन तुल्यमे-

---

क्रमेणेत्यत्र यदेति शेषस्तदेत्यनुरोधात् । यत्र ह्यनेकेषां सा-ङ्गानां प्रधानानां सहकर्तव्यता तत्र प्रयोगविधिनाऽङ्गप्रधान-योः साहित्यावगतावपि प्रधानान्तरसाहित्यानुरोधेन याव-दनुज्ञातव्यवधानस्वीकारेपि तदधिकव्यवधाने प्रमाणाभावा-त्प्रधानप्रत्यासत्त्यनुग्रहाय मुख्यक्रमेणैवाङ्गक्रमनियमः अत एव प्रवृत्तौ अङ्गनिरूपितप्रत्यासत्त्यनुग्रहोबीजं मुख्यक्रमे तु प्र-धाननिरूपितप्रत्यासत्त्यनुग्रहोबीजमिति तयोर्भेद इति भावः । प्रधानक्रमव्युत्क्रमेणाङ्गानुष्ठाने बाधकमाह । व्युत्क्रमेणेत्या-दिना । तत्रापीष्टापत्तिमाशङ्क्य प्रयोगविध्यवगततत्साहित्य-बाधापत्तिरूपमनिष्टं बाधकमाह । तच्चायुक्तमिति । केषांञ्चि-दङ्गानान्तैरत्यन्तमव्यवधानं केषाञ्चिदत्यन्तव्यवधानं चेति शेषः । अभिघारणमिति । क्षरद्घृतेनाभिषेक इत्यर्थः । एवञ्चेति । मुख्यक्रमेण हविरभिघारणरूपाङ्गक्रमे चेत्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कान्तरितव्यवधानं, व्युत्क्रमेणाघारे त्वाग्नेयहविरभिघारणाग्नेययागयोरत्यन्तमव्यवधानं ऐन्द्रदध्यभिघारणैन्द्रयागयोर्द्व्यन्तरितं व्यवधानं तच्चायुक्तमित्युक्तमेव ।

सच मुख्यः क्रमः पाठक्रमाद् दुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षत-

---

एकान्तरितं व्यवधानमिति । आग्नेयहविरभिघारणाग्नेययागयोरैन्द्रयागहविरभिघारणेन व्यवधानादैन्द्रयागहविरभिघारणैन्द्रयागयोश्चाग्नेययागेन व्यवधानादित्येकान्तरितं व्यवधानमित्यर्थः । तथाचादावाग्नेयहविरभिघारणं तत ऐन्द्रस्य हविषोऽभिघारणं तत आग्नेययागः ततश्चैन्द्रयाग इत्येव क्रमो मुख्यक्रमात् सिद्धो भवतीति भावः । यदि त्वादावैन्द्रहविषोऽभिघारणं तत आग्नेयहविषस्तत्क्रियते ततश्च याज्यानुवाक्याक्रमवशादाग्नेययागस्यानुष्ठानं तत ऐन्द्रयागस्यानुष्ठानमिति क्रमः स्वीक्रियते तदा कस्यचिदत्यन्तमव्यवधानं कस्यचिदत्यन्तव्यवधानं च स्यात् तच्चायुक्तं प्रयोगविध्यवगततत्साहित्यबाधापत्तेरित्यभिप्रेत्याह । व्युत्क्रमेणेत्यादिना । उक्तमेवेति । तच्चायुक्तं प्रयोगेत्यादौ दूषणमुक्तमेवेत्यर्थः । इदानीं पाठक्रमान्मुख्यक्रमस्य दौर्बल्यमाह । स चेति । तत्र हेतुमाह । मुख्यक्रमो हीति । यतो मुख्यक्रमः प्रमाणान्तरसापेक्षा या प्रधानक्रमस्य प्रतिपत्तिस्तत्सापेक्षत्वेन विलम्बितप्रतिपत्तिको ऽतः पाठक्रमाद्दुर्बल एवेत्यर्थः । किञ्च निरपेक्षो यः स्वाध्यायपाठक्रमस्तन्मात्रसापेक्ष-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

या विलम्बितप्रतिपत्तिकः पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान् । सचायं मुख्यः क्रमः प्रवृत्तिक्रमाच्च बलवान् ।

त्वेन यतो न दुर्बलः पाठक्रमोऽतो बलवानिति पाठक्रमस्य ततो वैषम्यमाह । पाठक्रमस्त्विति । अत्रेदं बोध्यम् । दर्शपूर्णमासयोरुपांशुयाजोऽग्नीषोमीयश्चेत्येतदुभयं पौर्णमास्यामाम्नातं तत्रोपांशुयाजस्याज्यं द्रव्यं आज्यस्य धर्मा उत्पववनं चतुर्गृहीतत्वादय, अग्नीषोमीयस्य पुरोडाशोद्रव्यं तस्य धर्मा निर्वापावघातादयः तत्र चायं पूर्वपक्षः मुख्यौ यागावुपांशुयाजाग्नीषोमीयौ पूर्वोत्तरभाविनौ भवतः । तथा च सति अङ्गक्रमस्य प्रधानक्रमेणैवाश्रयणीयत्वात्प्रथममाज्यधर्माणामेवानुष्ठानं निर्वापादीनामिति । तत्र सिद्धान्तः औषधधर्माः निर्वापादयः पूर्वमाम्नाताः । आज्यधर्मास्तु पश्चात् । तत्र मुख्यक्रमप्रयुक्तमाज्यधर्माणां प्राथम्यं बाधित्वा पाठक्रमानुरोधेनौषधधर्मा एव प्रथमतोऽनुष्ठेयाः पाठक्रमो हि वैदिकैः शब्दैः सहसा प्रतीयते मुख्यक्रमानुसारी तु क्रम उपपत्त्या कल्पनीयः तस्मादग्नीषोमीयपुरोडाशार्था औषधधर्माः प्रथममनुष्ठेया आज्यधर्मास्तु पश्चादिति । प्रवृत्तिक्रमापेक्षया तु मुख्यक्रमस्य प्राबल्यमेवेत्याह । प्रवृत्तीति । तत्रहेतुमाह । प्रवृत्तिक्रमे हीति । अत्रेदं बोध्यम्—दर्शपूर्णमासयोरादावाग्नेययागस्यानुष्ठानं ततः सान्नाय्ययागस्य सान्नाय्यधर्माश्च केचिद्वत्सापाकरणदोहनादयः पूर्वमेवानुष्ठीयन्ते तत्र यदि प्रवृत्तिक्रममाश्रित्य सान्नाय्यधर्मा अवदानाभिघारणहविरासाद-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवृत्तिक्रमे हि द्वितीयादिपदार्थानां प्रथमानुष्ठितक्रमापेक्षा बहूनामङ्गानां प्रधानविप्रकर्षान्मुख्यक्रमे तु सन्निकर्षात् ।

सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्याऽनुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः यथा प्राजापत्यपश्वङ्गेषु । प्राजापत्या हि "वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ती"ति वाक्येन तृतीयानिर्देशात्सेतिकर्तव्यताका एककालत्वेन विहिता अतस्तेषां

नादयोपि सर्वे पूर्वमेवानुष्ठीयेरन् तत आग्नेयधर्मा अवदानादयस्तदनुष्ठानं च ततः सान्नाय्ययागानुष्ठानं तदा सान्नाय्यधर्माणां सर्वेषां स्वप्रधानेन सह द्वाभ्यामाग्नेयधर्मतदनुष्ठानाभ्यां विप्रकर्षः स्यात् यदा तु सान्नाय्यधर्माणां केषाञ्चिद्वत्सापाकरणादीनां पूर्वमनुष्ठानेऽप्यन्ये सर्वेऽवदानादयस्तद्धर्मा मुख्यक्रममाश्रित्याऽऽग्नेयधर्मानुष्ठानानन्तरमनुष्ठीयन्ते तदा सर्वेषामाग्नेयधर्मसान्नाय्यधर्माणामेकैकेन विजातीयेन व्यवधानं भवति आग्नेयधर्माणां स्वप्रधानेन सह सान्नाय्यधर्मैर्व्यवधानात्सान्नाय्यधर्माणां च स्वप्रधानेन सहाग्नेयानुष्ठानेन व्यवधानादिति न विप्रकर्षः तस्मान्मुख्यक्रमः प्रवृत्तिक्रमाद्बलवानिति ।

इदानीं प्रवृत्तिक्रमं लक्षयति । सहप्रयुज्येत्यादिना । तत्रोदाहरणमाह । यथेति । प्राजापत्या हि सेतिकर्तव्यताका एककालत्वेन विहिता इत्यन्वयः । अत इति । तेषामेककाल-

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Ne

CC-0. Digitized by eGangotri and MIDF- Delhi

तदङ्गानां चोपाकरणनियोजनप्रभृतीनां साहित्यं सम्पाद्यम् । तच्च प्राजापत्यपशूनां सम्प्रतिपन्नदेवताकत्वेन युगपदनुष्ठानादुपपद्यते । तदङ्गानां चोपाकरणादीनां युगपदनुष्ठानमशक्यमतस्तेषां साहित्यम-

---

त्वेन विहितत्वादित्यर्थः । तेषामिति । प्राजापत्यानामित्यर्थः । उपाकरणेत्याद्युक्तार्थ एव बोध्यः । तच्चेति । साहित्यं चेत्यर्थः । सम्प्रतिपन्नदेवताकत्वेनेत्यत्र सम्प्रतिपन्नदेवताकालत्वेनेति पाठः तत्कालस्तु वैश्वदेव्यनुष्ठानानन्तरकालो देवता च प्रजापतिरेव । तदङ्गानामिति । प्राजापत्याङ्गानामित्यर्थः । अशक्यमिति । अनेकेषां पशूनामुपाकरणं नियोजनं चैकस्मिन्काल एकेन कर्त्रा कर्तुमशक्यमित्यर्थः । अत इति । उपाकरणादीनां युगपदनुष्ठानादुपपत्तेरित्यर्थः । तेषामिति । उपाकरणादीनामित्यर्थः । तच्चेति । अव्यवधानेन साहित्यं चेत्यर्थः । एवमेकस्य पशोर्नियोजनं विधायापरस्य पशोर्नियोजनं विधेयमित्यतिदिशति । एवमिति । प्राजापत्येष्वेकस्य पदार्थस्य सर्वत्रानुष्ठेयत्वे यं पशुमारभ्यैकः पदार्थोऽनुष्ठितस्तमेव पशुमारभ्य द्वितीयादिः पदार्थोऽनुष्ठेय इत्याह । तथाचेत्यादिना । सोऽयमिति । प्रवृत्तिक्रम इत्यर्थः । आदिशब्देनार्थक्रमादयो गृह्यन्ते ।

अत्रेदं बोध्यम्—सप्तदश हि प्राजापत्या भवन्ति "सप्तदश प्राजापत्यान्पशूनालभेते"ति तद्विधौ तथैव श्रवणात् । तथा च प्राजापत्येषु तेषु यं कञ्चित्पशुमारभ्योपाकरणं सप्तदशसु पशुषु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवहितानुष्ठानात्सम्पाद्यम् । तच्चैकस्योपाकरणं विधायापरस्योपाकरणं विधेयम् । एवं नियोजनादिक्रमपि । तथाच प्राजापत्येषु कस्माच्चित्पशोरारभ्य एकं सर्वं सर्वत्रानुष्ठाय द्वितीयादिपदार्थ स्तेनैव क्रमेणानुष्ठेयः स प्रवृत्तिक्रमः । सोऽयं श्रुत्यादिभ्यो दुर्बलः ।

तदेवं सङ्क्षेपतो निरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिः ।

कृत्वा तमेव पशुमारभ्य नियोजनं कर्तव्यं—एवं च तत्तत्पशूपाकरणानां तत्तत्पशुनियोजनैः तुल्यं षोडशक्षणैर्व्यवधानं भवति । तथा सति "सप्तदश प्राजापत्यान्पशूनालभेते"त्युत्पत्तिवाक्ये "वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति" प्रयोगवाक्ये च श्रुतं साङ्गानां सप्तदशपशुयागानां साहित्यमुपपद्यते । अन्यथा तेष्वेकैकस्मिन् पशावुपाकरणनियोजनादिसर्वसंस्काराणां समापने प्रत्यक्षवचनावगतपशुसाहित्यं बाधितं भवेदिति(१) । एवं निरूपि-

(१) ५ अ. पा. १ अधिकरणे विचारितं—वाजपेये प्राजापत्याः पशवो वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीत्येतस्मिन्काले विहिताः सह प्रयोक्तव्यास्तेषामाराdुपकारकाणां तन्त्रं द्रव्यसंस्कारास्तूपाकरणनियोजनादयः प्रतिपशु भेदेन कर्तव्याः ते किमेकैकस्य कात्स्न्र्येन कृत्वा ततोऽपरस्य कर्तव्याः किंवोपाकरणं सर्वेषां कृत्वा ततो नियोजनमिति तत्र प्रयोगवचनावगतसाहित्यबलेनह्येकैकस्य पशोर्धर्माः संश्लिष्टाः कर्तव्याः प्रकृतौ चोपाकरणादीनामानन्तर्यं कृतमिहापि प्रतिकर्मावसायिना चोदकेन प्रतिपशु प्राप्यते अत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi.

कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः । कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वम् । स च यजेत स्वर्गकाम इत्यादिरूपः । स्वर्गमुद्दिश्य यागं विदधताऽनेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते । "यस्याहिताग्नेरग्निर्गृहान् द-

---

तं षड्विधक्रमनिरूपणेन प्रयोगविधिमुपसंहरति । तदेवमिति ।

इदानीं क्रमप्राप्तमधिकारविधिं निरूपयति । कर्मजन्येति । कर्मजन्यफलस्वाम्यपदं व्याचष्टे । कर्मजन्यफलस्वाम्यमिति । स चेति । अधिकारविधिश्चेत्यर्थः । अनेनेति । यजेत स्वर्ग-

---

एकस्योपाकरणादिकं सर्वं गुणकाण्डं कृत्वा ततोऽपरस्य कर्तव्यं वाचनिकं तु साहित्यमाराादुपकारकतन्त्रत्वादप्युपपन्नमिति प्राप्ते उच्यते कल्पनिकं प्रयोगवचननिबन्धनं साहित्यं चोदकं चानुमानतः प्रत्यक्षवचनेन तु वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीत्येककालप्रयोगः पशूनामवगम्यतेऽतोयस्मिन्नेव क्षण एकस्योपाकरणं कर्तव्यमापतति तस्मिन्नेवा ऽपरस्योपाकरणं कर्तव्यं सदेशक्यतया केवलं न क्रियते द्वितियक्षणे न कश्चिद्धेतुर्येन पश्वन्तरं नोपाक्रियते अतः प्रथमं पदार्थं सर्वेषां कृत्वा ततो द्वितीयादिः कर्तव्य एवं दर्शपूर्णमासादिषु अनेकप्रधानसमवाये पदार्थानुसमय एव न्याय्यो न काण्डानुसमय इति स्थितं यत्र प्रधानविरोधो भवति पदार्थानुसमये तत्र काण्डानुसमय एवेति यथाऽश्वप्रतिग्रहेष्ट्यांशते सहस्रे वा पुरोडाशेषु श्रप्यमाणेषु यदि सर्वेषामधिश्रपणं कृत्वाऽद्यस्योद्वासनं क्रियते ततः स दह्येत तस्मान्न तत्र प्रधानविरोधे पदार्थानुसमयः ।

कर्मको प्रकार = काम्य कर्म (फलको आश गर्ने), नैमित्तिक कर्म, नित्य कर्म (फलको आश नगर्ने)

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

हेत्सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपे” दित्यादिना ऽग्निदाहादौ निमित्ते कर्म विदधता निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते । एव “महरहः सन्ध्यामुपासीते” त्यादिना शुचिविहितकालजीविनः सन्ध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यम् । तच्च फलस्वाम्यं तस्यैव, यो ऽधिकारविशिष्टः, अधिकारश्च यद्विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयते । यथा काम्ये कर्मणि फलकामना । नैमित्तिके कर्मणि निमित्तनिश्चयः । नित्ये सन्ध्योपासनादौ शुचिविहितकालजीवित्वम् । अत एव “राजा राजसूयेन स्वाराज्यकामो यजेते”त्यनेन

काम इत्यादिवाक्येनेत्यर्थः । तत्रोदाहरणान्तरमाह । यस्येति । क्षामवत इति । क्षामवत्वगुणविशिष्टायेत्यर्थः । निमित्तवत इति । अग्निना गृहदाहादिरूपनिमित्तवः पुरुषस्येत्यर्थः । इत्यादिना कर्मविदधता विधिनेत्यन्वयः । कर्मजन्येति । अग्निदेवताककर्मजन्येत्यर्थः । तत्रैवोदाहरणान्तरमाह । एवमिति । शुचिविहितकालजीविन इति । शौचविशिष्टत्वे सति विहितकालजीविन इत्यर्थः । तच्चेति । फलविधिबोधितं चेत्यर्थः । कोह्याधिकारोयद्विशिष्टस्य पुंसः कर्मजन्यफलभोक्तृत्वरूपं फलस्वाम्यं विधिना बोध्यत इत्यत आह । अधिकारश्चेति । अत एवेति । विधिवाक्येषु पुरुष-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधिवाक्ये स्वाराज्यमुद्दिश्य यागं विदधतापि न स्वाराज्यमात्रकामस्य तत्फलभोक्तृत्वं प्रतिपाद्यते, किंतु राज्ञः सतः स्वाराज्यकामस्यैव, राजत्वस्यापि अधिकारिविशेषणत्वेन श्रवणात् । कचित्तु पुरु-

---

विशेषणत्वेन श्रूयमाणस्याधिकारत्वादेवेत्यर्थः । स्वाराज्यमुद्दिश्येत्यत्र राजसूयमिति शेषः । राज्ञः सत इति । क्षत्रियस्य सत इत्यर्थः । तत्र हेतुमाह । राजत्वस्येति । श्रवणादिति । राजा राजसूयेनेत्यत्र श्रवणादित्यर्थः । अत्र हि राजशब्देन क्षत्रिय एवोच्यते नतु राज्यसम्बन्धमात्रेण तदन्योपि, तेन क्षत्रियस्यैव राजसूयेऽधिकारो नतु तदन्यस्य ब्राह्मणादेरित्यन्यत्र विस्तर इति भावः ।

इदमत्र चिन्त्यते । "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति श्रूयते। तत्र क्रियानिष्पादकत्वं कर्तृत्वं फलभोक्तृतया स्वामित्वमधिकारः तादृशोऽधिकारो यागकर्तुर्नास्ति कुतः फलभोगाभावात् । तथाहि यजेतेत्यत्राख्यातेन भावनाऽभिधीयते तस्यां च धात्वर्थो भाव्यः एकपदोपात्तत्वात् । स्वर्गस्तु पदान्तरोपात्तत्वाद्वाक्येन भाव्यतया ऽन्वेतव्यः तच्च वाक्यमेकपदरूपया श्रुत्या बाध्यते । स्वर्गस्य भाव्यत्वाभावे सति गुणत्वमभ्युपेयं स्वर्गशब्दोनात्र सुखवाची किन्तु सुखसाधनं चन्दनादिद्रव्यं ब्रूते लोके तथा व्यवहारात् । तच्च कामयितुं योग्यं तेन द्रव्येण विना यागानिष्पत्तेः । तस्मादस्मिन्वाक्ये फलानभिधाने तद्भोगाभावात्कर्तुर्यागे कर्तृत्वमेव, नत्वधिकार इत्यधिकारलक्षणं नारब्धव्यमिति प्राप्ते ब्रूमः यजेतेत्यत्र प्र-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

षविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणम् । यथाऽध्ययनविधिसिद्धा विद्या क्रतुविधीनामर्थज्ञानापेक्षणीयत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवृत्तेः । एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमत्ता अग्निसाध्यकर्मणामग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धा-

---

त्ययस्य केवलमाख्यातरूपत्वमेवेति नच मन्तव्यं, किन्तु लिङ्प्रत्ययत्वेन विधिरूपत्वमप्यस्ति तत्राख्यातत्वाकारेण भावनामाचष्टे विधित्वाकारेण पुरुषं प्रवर्तयति पुरुषश्च स्वाभिमतफलमन्तरेण न प्रवर्तते इति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरुपादत्ते स्वर्गशब्दश्चोत्कृष्टे सुखे रूढः द्रव्ये तु लाक्षणिकः तस्मात्सुखस्य भाव्यत्वं विधिश्रुत्या सिद्धं धात्वर्थस्य तु भाव्यत्वमेकपदेन प्रतीयमानमपि प्रत्ययेन नावगम्यते किन्तु प्रकृत्या, तथासति स्वर्गभाव्यत्वं भावनायां प्रत्यासन्नमेकेनैव विधिरूपेणाख्यातेनावगमात्क्रमियोगादपि स्वर्गस्यैव भाव्यत्वं तस्मात्फलभोगसम्भवेन कर्तुरधिकारोस्तीत्यधिकारलक्षणमारब्धव्यमिति ।

विधिवाक्येष्वश्रुतमपि किञ्चिदधिकारिविशेषणत्वेनान्यथानुपपत्त्या तत्समाश्रयणेन व्यवहारोपपत्तिरित्याशयेनाह । क्वचित्त्विति । तत्रोदाहरणमाह । यथेति । विद्येति । अत्र विधिवाक्येष्वश्रुतमप्यधिकारिविशेषणत्वेन तद्विशेषणमिति शेषः । तत्र हेतुमाह । क्रत्वित्यादिना । तत्रैवोदाहरणान्तरमाह । अग्निमत्तेत्यत्रापि पूर्ववदेव शेषो बोध्यः । तत्रापि हेतुमाह । अग्निसाध्येति । तद्विधीना-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्निमन्तं प्रत्येव प्रवृत्तेः । एवं सामर्थ्यमप्याख्याताानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात् समर्थं प्रत्येव विधिप्रवृत्तेः । तदेवं निरूपितो विधिः ।

ग्निमिति । अग्निसाध्यकर्मविधीनामित्यर्थः । अनेन च निरुक्ताधिकारिविशेषणेन शूद्रस्य यागे ऽनधिकारो ध्वनितः तस्याऽध्ययनविधिसिद्धिविद्याया अभावादाधानसिद्धाग्निमत्ताया अभावाच्च । किञ्च अध्ययने ह्युपनीतस्यैवाधिकारात् उपनयनेऽपि "चाष्टवर्षं ब्राह्मणमुपनयीते"त्यादिना त्रैवर्णिकस्यैवाधिकारविधानात् अग्न्याधानेपि "वसन्ते ब्राह्मणोऽग्नीनादधीत"इत्यादिना त्रैवर्णिकमात्रस्याधिकारविधानाच्च। यद्यपि"वर्षासु रथकारोऽग्नीनादधीते"त्यनेन रथकारस्य सौधन्वनापरनामकस्याग्न्याधानं विहितं योगाद्रूढेर्बलीयस्त्वात् तथापि नास्योत्तरकर्मस्वधिकारः तस्याध्ययनविधिसिद्धिविद्याया अभावादित्यन्यत्र विस्तर इति भावः । ननु तत्र रथं करोतीति व्युत्पत्त्या त्रैवर्णिक एव रथकारो नतु शुद्रस्य तत्राप्याधिकार इति चेन्न । सङ्कीर्णजातिविशेषे रथकारशब्दस्य रूढत्वात्तथाहि वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः शूद्रायां वैश्यादुत्पन्ना करणी तस्यां करण्यां माहिष्यादुत्पन्नोरथकारः । तथाच याज्ञवल्क्यः—

"माहिष्येण करण्यां तु रथकारः प्रजायते" इति ।

तस्मान्न तादृशव्युत्पत्त्या त्रैवर्णिको रथकारशब्देन ग्रहीतुं शक्यत इति । किञ्च कुत्रचिद्यागेपि कस्यचिच्छूद्रस्याधिकारो भवति "वास्तुमयं रौद्रं चरुं निर्वपे"दिति प्रकृत्य "एतया

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

निषादस्थपतिं याजये''दिति श्रवणात् । वास्तुशब्दः किञ्चित्प्रकृतिद्रव्यविशेषमाह, एतस्यामिष्टावधिकारी निषादस्थपतिशब्दवाच्यस्त्रैवर्णिक एव कुतः निषादानां स्थपतिरिति षष्ठीसमासस्य त्रैवर्णिके सम्भवात्, तस्य ह्यधीतवेदत्वेन विद्यासम्भवाच्चेति प्राप्ते ब्रूमः निषादश्चासौस्थपतिश्चेति कर्मधारयसमासस्य मुख्यत्वान्न षष्ठीसमासेन त्रैवर्णिको निषादस्थपतिशब्दार्थः षष्ठीसमासे तु सङ्कीर्णजातिविशेषवाचिना निषादशब्देन तत्सम्बन्ध उपलक्ष्येत नत्वयं कर्मधारये दोषोस्ति तस्मात् तात्कालिकाचार्योपदेशादिना विद्यां सम्पाद्य धनिको निषादो रौद्रं यागं कुर्य्यादिति राद्धान्तः ।

अध्ययनविधिसिद्धविद्यादिवत्पुरुषसामर्थ्यमपि विधिवाक्येष्वश्रुतमप्याधिकारिविशेषणमित्याह । एवमिति । सामर्थ्यमिति । आज्यावेक्षणादिकं लौकिकपुंसामर्थ्यमित्यर्थः । वैदिकसामर्थ्यस्याध्ययनविधिसिद्धविद्यादेः पूर्वमेवोक्तत्वादित्यर्थः । वृद्धोक्तन्यायं विनिगमकं समुदाहरन् तत्र हेतुमाह । आख्यातानामिति । अनेन च विशेषणेनान्धादेरनधिकारोध्वनितः ।(१)

इदमत्र विचार्यते—अन्धः पङ्गुर्बधिरो मूको गवाश्वादयश्च तिर्यञ्च इत्यादीनां चेतनत्वेन निरतिशयसुखरूपे स्वर्गे कामना सम्भवति । अथोच्येत केषु चिदङ्गेषु तेषां शक्तिर्नास्ति तथा हि अन्धोनाज्यमवेक्षितुं क्षमः

(१) अङ्गहीनोपि द्रव्यहीनवत्तत्प्रतिसमाधानेन कुर्यात् यस्य तु अप्रतिसमाधेयमङ्गवैकल्यं स न कथञ्चिच्छक्नोति कर्तुमिति न काम्येष्वाधिक्रियते नित्येषु त्वाहिताग्निश्चेद्यथाशक्ति कुर्वन्नाधिक्रियत एवेति ध्येयम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पङ्गुर्विष्णुक्रमेष्वशक्तः बधिरो नाध्वर्युप्रोक्तं शृणोति । तथा च "क्लृप्तीर्वाचयतीति"–विहितस्यानुष्ठानं न सिद्ध्येत् । मूकोऽनुमन्त्रणादावसमर्थः । तिर्यञ्चो बहुष्वसमर्था इति । तत्र यथाशक्त्यङ्गानामनुष्ठेयत्वात् । स्वर्गकामो यजेतेत्यनेन प्रधानवाक्येन सर्वाधिकारः प्रतीयते । स चाज्यावेक्षणाद्यङ्गवाक्यानुसारेण न सङ्कोचयितुं युक्तः किन्तु प्रधानानुसारेणानुष्ठानमेव सङ्कोचयितुं युक्तं तस्मादन्धादेरप्याधिकार इति प्राप्ते ब्रूमः यदाऽऽज्यावेक्षणादयः पुरुषार्थतया विधीयेरन् तदा तल्लोपेऽपि न क्रतोर्वैकल्यं इह तु क्रत्वङ्गतया ते विहिता इति तल्लोपे क्रतुरेव न निष्पद्येत तस्मादसमर्थस्य नास्त्यधिकार इति सिद्धम्(१)। किञ्च ज्योतिष्टोमे श्रूयते "यद्युद्गाता ऽपच्छिद्येतादक्षिणोयज्ञः संस्थाप्योऽथान्यश्चाहर्तव्यस्तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यात् यदि प्रतिहर्ता ऽपच्छिद्येत सर्वस्वं दद्यादिति"-अस्यायमर्थः–प्रातः सवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः शालायाः बहिः प्रसर्पन्ति तदानीमेकस्य पृष्ठतोऽन्य इ-

(१) पुरुषं प्रति विधीयमानमसमर्थं प्रत्यविहितत्वादनङ्गमेवेति तद्रहितमेव कर्माविगुणं समग्रं फलं साधयेत् नहि स्वातन्त्र्येणाङ्गवाक्यानि पुरुषैः सम्बध्यन्ते प्रधानवाक्यशेषत्वात्तेषां तत्प्रयुक्तेन तु प्रधानवाक्येन तदङ्गेन युक्तः क्रतुः पुरुषैः संयुज्यमानोऽसमर्थान् प्रतिविज्ञाप्यते अतोऽन्धस्य क्रतुरेवाविहितो न त्वाज्यावेक्षणमेवाविहितमितरच्च विहितमिति मन्तव्यं नच प्रधानवाक्यविरोधात्सर्वाधिकारनिश्चयः विशेषाभावाद्धि सर्वाधिकारः स्यादस्तिचाऽत्र विशेषाङ्गोपसंहारसामर्थ्यमतः समर्थानामेवाधिकारः यत्र तु प्रधानवाक्यविरोधो यावज्जीवादौ तत्र भवत्येव यथाशक्तिप्रयोगादपि फलं तदविरोधे तु सर्वाङ्गयुक्तकर्मानुष्ठानादेव फलम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्येवं पिपीलिकावत्पङ्क्त्याकारेण गन्तव्यं तत्र पुरतो गन्तुः कच्छं गृहीत्वैव पृष्ठतोऽन्योगच्छेत् एवं सति यदि प्रमादादुद्गाता गृहीतं कच्छं मुञ्चेत् तदा दाक्षिणामदत्वा प्रक्रान्तो यज्ञः समापनीयः तं समाप्य पुनरपि स यज्ञः प्रयोक्तव्यः तस्मिन्न्प्रयोगे पूर्वं यद्दित्सितं द्रव्यं तद्दद्यात् । यदा प्रतिहर्ता मुञ्चेत् तदा तस्मिन्नेव प्रयोगे सर्वस्वं दद्यादिति । तत्र यदुद्गातृप्रतिहर्तारौ युगपत्तन्मुञ्चेतां तदानीमुक्तं प्रायश्चित्तनिमित्तं विहन्येत एककर्तृकोह्यपछेदो निमित्तत्वेन श्रुतः अयन्तूभयकर्तृकत्वान्नैकेन व्यपदेष्टुं शक्यते तस्माच्छ्रूयमाणस्य निमित्तस्य विहितत्वान्नास्ति प्रायश्चित्तमिति प्राप्ते ब्रूमः । द्वौ ह्यत्रापच्छेदौ तयोरेकैकस्यैकैक एव कर्तेति निमित्तस्य नास्ति विघातः कालमात्रैक्यादेकापच्छेदभ्रान्तिः तस्मान्निमित्तविघाताभावादस्ति प्रायश्चित्तम् । किञ्च अदक्षिणत्वं सर्वस्वदक्षिणत्वं चेति—यत्प्रायश्चित्तद्वयं निमित्तभेदेन श्रुतं तन्निमित्तद्वयसन्निपाते समुच्चेतव्यं यद्यदक्षिणत्वसर्वस्वदानयोरन्योन्यविरोधस्तर्हि प्रयोगभेदेन व्यवस्थापनीयं अपच्छेदयुक्ते प्रथमप्रयोगे दक्षिणा न दातव्या उत्तरप्रयोगे सर्वस्वं दातव्यं सत्यपि प्रयोगेभेदे कर्मण एकत्वात् समुच्चय इति प्राप्ते ब्रूमः । नत्हुयत्तरप्रयोगे ऽपच्छेदो विद्यते नचासति निमित्ते प्रायश्चित्तं युक्तं तस्मात्प्रथमप्रयोगएव निमित्तद्वयवशात्प्रायश्चित्तद्वयं प्राप्तं तच्चान्योन्यविरुद्धं विकल्प्यते । किञ्च उद्गातृप्रातिहर्तृकर्तृकयोरपच्छेदयोर्यौगपद्ये समानबलत्वादस्तु प्रायश्चित्तयोर्विकल्पः । यदा तुक्रमेणापच्छेदौ स्यातां तदानीमसञ्जातविरोधित्वेन पूर्वस्य प्रबलत्वाच्छ्रुतिलिङ्गादाविवोत्तरस्य प्रवृत्तिर्निरुध्यत इति चेन्मैवं । श्रुतिलिङ्गा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दावुत्तरस्य पूर्वसापेक्षत्वापूर्वेण विरोधे सत्युतरस्योत्पत्तिरेव नास्ति । इह तु ज्ञानद्वयमन्योन्यनिरपेक्षं वाक्यद्वयादुत्पद्यत इत्युत्पत्तिप्रतिबन्धो नास्ति उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते(१) । ननु निरपेक्षत्वस्य समानत्वात्पूर्वज्ञानमेवोत्तरस्य बाधकमस्त्विति चेन्न । पूर्वज्ञानोत्पत्तिदशायामविद्यमानस्योत्तरज्ञानस्य बाध्यत्वायोगात् । उत्तरकाले तु स्वयं बाधितं पूर्वज्ञानं कथमुत्तरस्य बाधकं भवेत् । नचान्यत्किञ्चिदुत्तरस्य बाधकं पश्यामः । तस्मादुत्तरकालीनापच्छेदनिमित्तं प्रायश्चित्तमनुष्ठेयम् । किञ्च यदुद्गाता पश्चादपच्छिद्यते तदा तस्यापच्छेदस्य प्रबलत्वात्तन्निमित्तं प्रायश्चित्तमनुष्ठेयन्तच्च प्रायश्चित्तमीदृशं प्रथमप्रयोगं दक्षिणारहितमनुष्ठाय द्वितीयप्रयोगे पूर्वं दित्सिता दक्षिणा दातव्येति । पूर्वं च गवां द्वादशाधिकं शतं दित्सितं तस्य ज्योतिष्टोमदक्षिणारूपेण विहितत्वात्तस्मादुत्तरप्रयोगे द्वादशशतं देयमिति प्राप्ते ब्रूमः प्रतिहर्तुः प्रथममपच्छेदे सति तन्निमित्तकं सर्वस्वदानरूपं प्रायश्चित्तं प्रथमप्रयोगे प्राप्तं तेन च क्रतुस्वभावप्रयुक्तस्य द्वादशशतस्य बाधात्सर्वस्वं दित्सितं नचोद्गात्रपच्छेदेन पश्चाद्भाविना सर्वदित्सा बाध्यत इति शङ्कनीयं बाधकस्य दक्षिणान्तरस्य तत्रानुक्तत्वात् । यद्दित्सितं तदुत्तरप्रयोगे देयमित्येतावदेव तत्रोच्यते । दित्सितं च सर्वस्वमित्युक्तम् । अत उत्तरकालीनोद्गात्रपच्छेदनिमित्तेपि पुनः प्रयोगे पूर्वकालीनप्रतिहर्त्रपच्छेदप्रयुक्तं सर्वस्वमेव दातव्यमित्यादिकमर्थजातं निरूपणीयमभिप्रेत्य विधिनिरूपणमुपसंहरति ।

(१) पूर्वं परमजातत्वादबाधित्वैव जायते । परस्याऽनन्यथोत्पादान्नाद्यबाधेन सम्भव इत्युक्तत्वादिति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगसमवेतार्थस्मारका मन्त्राः । तेषां च तादृशार्थस्मारकत्वेनैवार्थवत्त्वम् । ननु तदुच्चारणमदृष्टार्थं, सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात् । नच दृष्टस्यार्थस्मरणस्य प्रकारान्तरेणापि सम्भवान्मन्त्राम्नानं व्यर्थमिति वाच्यम् । मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात्(१) । नानासा-

---

तदेवमिति । तस्मिन्नतीते ग्रन्थ उक्तप्रकारेणेत्यर्थः ।

यः सर्वकर्ता सकलात्मरूपश्चन्द्रार्कवन्हीक्षणकश्चिदात्मा ।
साम्बो हि सोमार्द्धविभूषणाढ्यस्तं नौमि देवार्चितपादपीठम् ॥ १ ॥

इदानीं मन्त्ररूपं वेदभागं निरूपयति । प्रयोगेति । तेषामिति । मन्त्राणामित्यर्थः । तादृशार्थेति । प्रयोगसमवेतार्थेत्यर्थः । अर्थवत्त्वमिति । प्रयोजनवत्त्वमित्यर्थः । ननु मन्त्रोच्चारणस्यादृष्टार्थकत्वेनैव प्रयोजनवत्त्वमित्यत आह । नन्विति । तदुच्चारणमिति । मन्त्रोच्चारणमित्यर्थः । तत्र हेतुमाह । दृष्टफलकत्व इति । ननु दृष्टस्य देवताद्यर्थस्मरणस्य ब्राह्मणवाक्यादिनापि सम्भवान्मन्त्रोच्चारणस्यादृष्टार्थकत्वानङ्गीकारे तदाम्नानस्य वैयर्थ्यापत्तिरित्याशङ्क्य मन्त्रैरेव सोऽर्थः स्मर्तव्य इति नियमविध्यङ्गीकारान्न मन्त्राम्नातस्य वैयर्थ्यमिति परिहरति । नचेत्यादिना । ननु किं लक्ष-

---

(१) नियमस्य किञ्चिद्दृष्टं प्रयोजनं नास्तीत्यगत्याऽदृष्टमेव स्वीक्रियत इति न तदनुसारेण मन्त्राणामपि अदृष्टार्थकत्वमुचितं मन्त्रेभ्यो जायमानस्यार्थावबोधस्यापलपितुमशक्यत्वादिति भावः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः । यथाहुः—

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयत" इति।

अस्यार्थः—प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः । यथा "यजेतस्वर्गकाम" इत्यादिः स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात् । पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः ।

णको नियमविधिर्यदाश्रयणादन्यस्यार्थस्मारकस्य व्यवच्छेदो लभ्यत इत्याशङ्क्य नियमविधिलक्षणमाह । नानासाधनेति । तत्र सम्मतिमाह । यथाहुरिति । तां व्याचष्टे । अस्यार्थ इत्यादिना । तत्रापि विधिरत्यन्तमप्राप्ताविति प्रथमपादमपूर्वविधिपरं व्याचष्टे । प्रमाणान्तरेणेति । प्रमाणान्तरेण तदर्थत्वेनाप्राप्तस्य तदर्थत्वेन प्रापको यो विधिः सोऽपूर्वविधिरित्यर्थः । तत्रोदाहरणमाह । यथेति । तस्यापूर्वविधित्वे हेतुमाह । स्वर्गेति । स्वर्गार्थकत्वेन प्रमाणान्तरेणाप्राप्तस्य यागस्य तदर्थत्वेन "यजेत स्वर्गकाम"इत्यनेन विधानाद्भवत्ययमपूर्वविधिरित्यर्थः। नियमः पाक्षिके सतीति द्वितीयपादं प्रकृते सम्मतिरूपं व्याचष्टे । पक्षे ऽप्राप्तस्येति । तत्रोदाहरणमाह । यथेति। ननु व्रीहीनवहन्तीत्यस्यावघातविधेः कथं पक्षे ऽप्राप्तस्यावघातस्य प्रापकत्वं स्वीक्रियते वैतुष्यार्थत्वेन प्रमाणान्तरेण

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा "व्रीहीनवहन्ती"त्यादिः । कथमस्य पक्षे ऽप्राप्तप्रापकत्वामिति चेदित्थम् । अनेन ह्यवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते ऽन्वयव्यतिरेकसिद्धत्वात् । किन्तु नियमः स चाप्राप्तांशपूरणम् । वैतुष्यस्य हि नानोपायसाध्यत्वाद्यदाऽवघातं परित्यज्य उपायान्तरं ग्रहीतुमारभते तदाऽवघातस्याप्राप्तत्वेन तद्विधानना-

---

प्राप्तस्य तस्य तदर्थत्वेनानेन विधानोपपत्तेरित्याशङ्क्यानेन हि विधिनाऽघातस्य वितुषतार्थत्वं न प्रतिपाद्यते तस्य तदर्थत्वेनान्वयव्यतिरेकासिद्धत्वात् अवघातादिसत्वे व्रीहीणां वैतुष्यं जायते तदसत्वे तदभाव इति सार्वजनीनमिति परिहरति । कथमित्यादिना । इत्थमिति । अनेन वक्ष्यमाणप्रकारेणेत्यर्थः । ननु यद्यवघातादीनां सर्वेषामेव वैतुष्यार्थत्वमन्वयव्यतिरेकाभ्यां सिद्धं तदा व्रीहीनवहन्तीत्यवघातविधेरन्वयव्यतिरेकसिद्धावघातप्रापकत्वेन वैयर्थ्यमेवापद्येताऽनुवादकत्वादित्याशङ्कते । किन्त्विति । नास्य विधेरनुवादकत्वेन वैयर्थ्यं सम्भवति नियमविधायकत्वेनाप्युपपत्तेरिति परिहरति । नियम इति । व्रीहीणां वैतुष्यमवघातेनैव सम्पादनीयमिति नियमः प्रतिपाद्यत इत्यर्थः । ननु तादृशनियमप्रतिपादनेऽत्र कीदृशोवाक्यार्थो भवतीत्यत आह । स चेति । स एवाप्राप्तांशपूरणरूपो नियमोऽत्र वाक्यार्थ इत्यर्थः । ननु कथमत्राप्राप्तांशो लभ्यते यस्य पूरणेनास्य विधेः सार्थक्यमित्यतोऽत्राप्राप्तांशपूरणरूपमेव वाक्यार्थमुपपादयति । वैतुष्येत्यादिना । उपपादितमप्राप्तांश-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मकमप्राप्तांशपूरणमेवानेन विधिना क्रियते । अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः । पक्षेऽप्राप्तावघातस्य विधानमिति यावत् । उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरोविधिः परिसङ्ख्याविधिः । यथा "पञ्चपञ्चनखा भक्ष्या" इति । इदं हि वाक्यं न पञ्चनखभक्षणपरं तस्य रागतः प्राप्तत्वात् । नापि नियमपरं पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः पक्षे ऽप्राप्त्यभावात् । अत इदमपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसङ्ख्याविधिः । सा च द्विवि-

---

पूरणरूपं वाक्यार्थमुपसंहरति । अतश्चेति । अस्य विधेरप्राप्तांशपूरणरूपनियमप्रतिपादकत्वाच्चेत्यर्थः । पर्यवसितार्थमाह । पक्ष इति । यावदिति । पर्यवसन्नमित्यर्थः । तत्र चेत्याद्युत्तरार्द्धं परिसङ्ख्याविधिपरं व्याचष्टे । उभयोश्चेति । तत्रोदाहरणमाह । यथेति । अस्यात्यन्तमप्राप्तविधित्वरूपमपूर्वविधित्वमाशङ्क्य निराचष्टे । इदं हीति । तत्र हेतुमाह । तस्येति । पञ्चनखभक्षणस्येत्यर्थः । अस्य वाक्यस्य नियमविधित्वमपि निराचष्टे । नापीति । तत्रापि हेतुमाह । पञ्चनखेति । अत इति । विधिद्वयासम्भवादित्यर्थः । इदमिति । पञ्चपञ्चनखा भक्ष्या इति वाक्यमित्यर्थः । अपञ्चनखभक्षणनिवृत्तिस्तु न केनापि प्राप्ता ततश्च तद्विधायकत्वेन नास्य वाक्यस्यानुवादकत्वमपि तथा च सैवात्र वाक्यार्थ इति भावः । सा च परिसङ्ख्या द्विविधेत्याह । सा चेति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

धा श्रौती लाक्षणिकी चेति । तत्रात्रत्येवावयन्तीति श्रौती परिसङ्ख्या एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् । "पञ्च पञ्चनखा भक्ष्या" इति तु लाक्षणिकी, इतरनिवृत्तिवाचकपदाभावात् । अत एवैषा त्रिदोषग्रस्ता । दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति । तदुक्तम्—

"श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनात् ।
प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदूषणा" इति ।

श्रुतस्य पञ्चनखभक्षणस्य हानात्—अश्रुतापञ्च-

आद्यामुदाहरति । तत्रेति । द्वयोः परिसङ्ख्ययोर्मध्य इत्यर्थः । अत्रेति । प्रकृत इत्यर्थः । अवयन्तीति । अवजानन्तीत्यर्थः । गायन्तीति यावत् । श्रौत्याः परिसङ्ख्यायास्तत्वे हेतुमाह । एवकारेणेति । द्वितीयामुदाहरति । पञ्चेति । पञ्चपञ्चनखास्तु—

"पञ्चपञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ॥
शशकः शल्लकी गोधा खड्गी कूर्मोऽथ पञ्चम"

इत्यादिवचनोदाहृता बोध्याः । अस्या अपि तत्वे हेतुमाह । इतरनिवृत्तीति । अत एवेति । इतरनिवृत्तिवाचकपदाभावादित्यर्थः । एषेति । लाक्षणिकीत्यर्थः । दोषत्रयं प्रदर्शयति । दोषत्रयं चेति । तत्र श्रुतहानौ हेतुमाह । श्रुतस्येति । अ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नखभक्षणनिवृत्तेः कल्पनात्प्राप्तस्य चाऽपञ्चनखभक्षणस्य बाधनादिति । अस्मिंश्च दोषत्रये दोषद्वयं शब्दानिष्ठम् । प्राप्तबाधस्त्वर्थनिष्ठ इति दिक् ।

येषां तु प्रयोगसमवेतार्थस्मारकत्वं न सम्भवति तदुच्चारणस्यानन्यगत्याऽदृष्टार्थकत्वं कल्प्यत इति नानर्थक्यमिति ।

नामधेयानां च विधेयार्थपरिच्छेदकतयाऽर्थवत्त्वम् । तथा हि "उद्भिदा यजेत पशुकाम" इत्यत्रोद्भिच्छब्दो यागनामधेयं तेन च विधेयार्थपरिच्छेदः

श्रुतकल्पनायां हेतुमाह । अश्रुतेति । प्राप्तस्य बाधेपि हेतुमाह । प्राप्तस्येति । रागतः प्राप्तस्येत्यर्थः । अस्य दोषत्रयस्य व्यवस्थया वृत्तित्वमाह । अस्मिंश्चेति । दोषत्रयमध्ये इत्यर्थः । ननु कथं सर्वेषां मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वेनैवार्थवत्त्वमुपपद्यते हुम्फडादिमन्त्राणां प्रयोगसमवेतार्थस्मारकत्वासम्भवादित्याशङ्क्याह । येषामित्यादिना । तदुच्चारणस्येति । हुम्फडादिमन्त्रोच्चारणस्येत्यर्थः । अनन्यगत्या दृष्टार्थत्वमित्यत्राऽदृष्टार्थत्वमिति पदच्छेदः । इति नानर्थक्यमिति । अतो हेतोर्हुंफडादिमन्त्राणां नानर्थक्यमित्यर्थः ।

मन्त्रभागस्य यथायथं प्रयोजनवत्त्वमुपपाद्येदानीं क्रमप्राप्तं नामधेयानां सार्थक्यमुपपादयति । नामधेयानामिति । विधेयार्थपरिच्छेदकतयेति । विजातीयव्यावर्तकत्वेन विधेयार्थनिश्चायकतयेत्यर्थः । विधेयार्थस्यैव समर्पकतयेति याव-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रियते । तथा हि अनेन वाक्येनाप्राप्तत्वात् फलोद्देशेन यागो विधीयते यागसामान्यस्याविधेयत्वात् यागविशेष एव विधीयते । तत्र कोऽसौ यागविशेष इत्यपेक्षायामुद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायते । उद्भिदा यागेन पशुं भावयेदित्यत्र सामानाधिकरण्येन

त् । एतदेव प्रदर्शयति । तथाहीत्यादिना । तेन चेति ।(१) उद्भिच्छब्देन चेत्यर्थः । उद्भिच्छब्दस्य विधेयार्थपरिच्छेदकतया नामधेयत्वप्रदर्शनाय भूमिकामारचयति । तथाहीत्यादिना । अनेनेति । "उद्भिदा यजेत पशुकाम" इत्यनेनेत्यर्थः । फलोद्देशेनेति । पशुरूपफलोद्देशेनेत्यर्थः । यागेति । साधनवैलक्षण्यमन्तरेण फलवैलक्षण्यानुपपत्तेर्नात्र यागसामान्यं विधीयते ततश्च यागविशेष एव विधीयते इत्यर्थः । तत्रेति । यागविशेषस्य विधेयत्व इत्यर्थः । क इति । कोऽसौ यागविशेष इति यागविशेषापेक्षायामित्यर्थः । उद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायत इति उद्भिच्छब्दात्पुनरुद्भिन्नामको यो यागः स एवात्र यागविशेष इति विज्ञायत इत्यर्थः । एवं च सिद्धमुद्भिच्छब्दस्य धात्वर्थसामानाधिकरण्येनान्वयं फलितमाह । उद्भिदेति । ननूद्भिच्छस्य नील-

(१) सर्वत्र प्रयोजनं नाम्नां व्यवहार एव नह्यन्तरेण नामधेयमृत्विग्वरणादिष्वनेनाहं यक्ष्ये इति लघुराख्यानोपायः स्यात् । क्वचिच्च गुणफलोपबन्धेनार्थवत्ता यथा दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयामिष्टिं निर्वपेदिति गुणोपबन्धः । दर्शपूर्णमासाभ्यां स्वर्गकामोयजेतेति फलोपबन्धः । क्वचिच्च भेदकतयाऽर्थवत्त्वं यथा अथैष ज्योतिरित्यादिषु इति हृदयम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नामधेयान्वयात् । नामधेयत्वं च निमित्तचतुष्टयात् । मत्वर्थलक्षणाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रात्तद्व्य-

---

मुत्पलमित्यत्र नीलपदस्योत्पलपदसामानाधिकरण्यवद्यजिसामानाधिकरण्यं भवेत्किन्नामधेयत्वेनेति चेन्न । वैषम्यात् तथाहि तत्र हि नीलपदस्यार्थोनीलगुण उत्पलपदार्थादुत्पलरूपद्रव्यादतिरिक्तो भवति लक्षणया तु नीलपदस्य तादृशद्रव्यपरत्वेनोत्पलपदसामानाधिकरण्यमुपपद्यते उद्भिच्छब्दस्य तु यज्यवगतयागविशेषान्नातिरिक्तोर्थोऽस्ति तस्यैव तत्र विशेषसमर्पकत्वात् ततश्चार्थान्तरवाचकत्वाभावेन नोद्भिच्छब्दस्य नीलशब्दस्योत्पलशब्दसामानाधिकरण्यवद्याजिसामानाधिकरण्यमुपपद्यते, किन्तर्हि वैश्वदेव्यामिक्षेत्यत्रामिक्षापदस्य वैश्वदेवीशब्दसामानाधिकरण्यवत्, वैश्वदेवीशब्दस्य हि देवतातद्धितत्वात् तस्य च सास्य देवतेति सर्वनामार्थे स्मरणात् सर्वनाम्नां चोपस्थितविशेषवाचित्वेन विशेषपरत्वं तत्र कोसौ वैश्वदेवीशब्दोपात्तो विशेष इत्यपेक्षायां आमिक्षापदसान्निध्यादामिक्षारूपोविशेष इत्यवगम्यते । यथाहुः

"आमिक्षापदसान्निध्यादस्यैव विषयार्पण"मिति ॥

तस्माद्यथा वैश्वदेवीशब्दोपात्तविशेषसमर्पकत्वेनामिक्षापदस्य वैश्वदेवीशब्देन सामानाधिकरण्यमेवं सामान्यस्याविधेयत्वाद्यज्यवगतयागविशेषसमर्पकत्वेनैवोद्भिच्छब्दस्य यजिसामानाधिकरण्यमित्युक्तप्रकारेणैव नामधेयानामन्वयः साधुरिति । तथाचोक्तं "तद्धी नत्वाद्यागविशेषसिद्धे"रिति । तच्च निमित्तचतुष्टयाद्भवतीत्याह । नामधेयत्वं चेति । निमित्तचतुष्टयं निर्दिशति । मत्वर्थे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदेशादिति । तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात् । तथाहि न तावदनेन वाक्येन फलं प्रति यागविधानं तं प्रति च गुणविधानं युज्यते वाक्यभेदा-

---

त्यादिना। तत्राद्यनिमित्तविषयमुदाहरति। तत्रोद्भिदा यजेतेति। तत्रेति। चतुर्षुमध्य इत्यर्थः। अत्र मत्वर्थलक्षणापत्तिप्रदर्शनाय तावद्वाक्यभेदमापादयति। न तावदिति। अस्मिन्पक्षे तूद्भिद्यते भूमिरनेनेति व्युत्पत्त्या खनित्रवाच्यसावुद्भिच्छब्दो भवेत्तथाचोद्भिदा यजेत पशुकाम इत्यनेन वाक्येन यागेन पशुं भावयेद्यागश्च खनित्रेण भावयेदिति फलम्प्रति यागविधानं यागम्प्रति च गुणविधानं क्रियेत तच्च न युज्यत इत्यर्थः। तत्र हेतुमाह। वाक्येति। आवृत्तिरूपवाक्यभेदापत्तेरित्यर्थः। नन्वनेन वाक्येन खनित्ररूपो गुण एव विधीयते दध्ना जुहोतीत्यनेन गुणविधिना समानत्वात्। नचात्र पशुफलकः कश्चिद्यागो विधीयत इति वाच्यम्। पशूनां गुणफलत्वात्। यथा गोदोहनेन पशुकामस्येत्यत्र पशवो गोदोहगुणस्य फलं तथेह खनित्रगुणस्य फलमस्तु। यदि चमसेनापः प्रणयतीति विहितं प्रकृतमपाम्प्रणयनमाश्रित्य गोदोहनं विधीयते तर्ह्यत्रापि ज्योतिष्टोमेन यजेतेति विहितं प्रकृतं ज्योतिष्टोममाश्रित्य खनित्रं विधीयतां तस्माद्गुणविधिरित्याशङ्क्य पशुकामो यजेतेत्यस्य पदद्वयस्यायमर्थः पशुरूपं फलं यागेन कुर्यादिति तत्र केन यागेनेत्यपेक्षायां उद्भिदेति तृतीयान्तं पदं यागनामत्वेनान्वेति उद्भिद्यते पशुफलमनेन यागेनेति निरुक्त्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नामत्वमुद्भित्पदस्योपपद्यते । नचैवमपि गुणविधिनामधेयत्वयोः शब्दनिर्वचनसाम्यान्न निर्णय इति वाच्यम् । सामानाधिकरण्यस्य निर्णायकत्वात् । तथाहि उद्भिन्नामकेन यागेन पशुरूपं फलं कुर्यादित्युक्ते सामानाधिकरण्यं लभ्यते गुणविधित्वे तु खनित्रेण साध्यो यो यागस्तेन तादृशफलं कुर्यादित्येवं वैयधिकरण्यं स्यात् । तच्चायुक्तम्(१) । किञ्च नानेन वाक्येन ज्योतिष्टोमे खनित्ररूपो गुणो विधातुं शक्यते तस्य सोमेन यजेतेत्युत्पत्तिशिष्टसोमरूपगुणावरुद्धत्वात् । किञ्च यद्यस्योद्भिच्छब्दस्य खनित्ररूपगुणसमर्पकत्वं स्वीक्रियते तदा यत्र तेन गुणः समर्पणीयस्तादृशकर्मणोऽप्यप्राप्तत्वादनेन वाक्येन खनित्ररूपगुणविशिष्टकर्मविधानमेव वक्तव्यमन्यथा वाक्यभेदप्रसङ्गात् । ततश्चोद्भिच्छब्दार्थरूपखनित्रवता यागेने-

---

(१) फलाय गुणविधौ धातोर्न विधेयसमर्पकत्वं धात्वर्थस्याविधेयत्वान्नाप्युद्देश्यसमर्पकत्वं धात्वर्थे कस्य चिदविधानात् अतो न धातोः स्वार्थमुच्चारणं किन्तु पशूद्भित्पदसम्बन्धाविधानार्थे विधिप्रत्ययावश्यम्भावे केवलप्रत्ययस्य प्रयोगानर्हत्वात्तदर्थं धातूच्चारणमित्यत्यन्तपारार्थ्यं तथा विधायकप्रत्ययस्य समानपदोपात्तत्वेन सन्निहितं धात्वर्थमुल्लङ्घ्य पदान्तरोपात्तगुणविधायकत्वाद्विधिविधेययोर्विप्रकर्षश्च स्यात दध्नेन्द्रियकामस्य जुहुयात् व्रीहिभिर्यजेतेत्यादिषु दधिव्रीह्यादिपदार्थानामर्थान्तरेऽत्यन्तनिरूढत्वान्न सामानाधिकरण्येन यजिनामत्वं शक्यते कल्पयितुमप्रसिद्धार्थं हि प्रसिद्धपदसामानाधिकरण्येन निर्णीयते दध्यादयस्तु निरूढत्वान्न कथञ्चिदपि धातुसामानाधिकरण्यं प्रतिपद्यन्त इति गत्यभावात्तत्र धातुपारार्थ्यं विप्रकृष्टार्थविधानं चाश्रितं उद्भिदादयस्तु यथैवावयवद्वारेण खनित्रादौ वर्तन्ते तथैव स्वफलोद्भेदनकारित्वाद्यागेऽपीति न धात्वर्थविधानं बाधितव्यमिति नामत्वमेवेष्यते ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्तेः । उद्भिच्छब्दस्य गुणसमर्पकत्वे च याग-स्याप्यप्राप्तत्वात् गुणविशिष्टकर्मविधानं वाच्यम् । उद्भिद्वता पशुं भावयेदितिविशिष्टविधौ मत्वर्थलक्ष-णेत्युक्तमेव ।

"चित्रया यजेत पशुकाम" इत्यत्र चित्राशब्दस्य कर्मनामधेयत्वं वाक्यभेदभयात् । तथाहि न तावदत्र गुणविशिष्टयागविधानं सम्भवति-"दधि-मधुपयोघृतं धाना उदकं तण्डुलाः तत्संसृष्टं प्राजा-

---

ति सामानाधिकरण्येनान्वयो भविष्यति तथा च मत्वर्थल-क्षणापत्तिरिति(१) परिहृति । उद्भिच्छब्दस्येत्यादिना । उ-क्तमेवेति । सोमेन यजेतेति विध्यर्थनिरूपणप्रस्तावे इति शेषः।

इदानीं द्वितीयं वाक्यभेदप्रसङ्गरूपं नामधेयत्वस्य निमि-त्तमुदाहरणद्वारा प्रदर्शयति । चित्रया यजेतेति । वाक्य-भेदमेवोपपादयति । तथा हीत्यादिना । अत्रेति । "चि-त्रया यजेत पशुकाम" इत्यस्मिन्वाक्य इत्यर्थः । गुणविशि-ष्टेति । चित्राशब्दार्थभूतचित्रवर्णककिञ्चिद्गुणविशिष्टेत्यर्थः । अत्र विशिष्टविधानासम्भवे हेतुमाह । दधीत्यादिना ।

---

(१) सोमेन यजेतेत्येवमादिषु तु सोमादिशब्दानामर्थान्तरेऽत्यन्तनिरूढत्वाद्यागे च कथञ्चिदप्यप्रसिद्धेरप्रसिद्धकल्पनातोवरं प्रसिद्धार्थद्वारेण लक्षणाश्रयणमेवेति मत्वर्थलक्षणया गुणविशिष्टयागविधानमङ्गीकृतं सोमवता यागेनेष्टं भावयेदिति उद्भिदादीनां त्ववयवद्वारेण कर्मण्यपि प्रसिद्धिरस्तीति श्रुत्या नामधेयत्वं युक्तमिति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्य" मित्यनेन गुणस्य विहितत्वात् तद्विशिष्टयागविध्यनुपपत्तेः । यागस्य फलसम्बन्धे गुणसम्बन्धे च विधीयमाने वाक्यभेदः । तस्माच्चित्राशब्दः कर्मनामधेयम् । तथा च चित्रायागेन पशुं भावयेदिति सामानाधिकरण्येनान्वयान्न वाक्यभेदः प्रकृतेष्टेरने-

---

तत्संसृष्टं प्राजापत्यमितीति । तैर्दध्यादिभिर्द्रव्यैर्युक्तं प्रजापतिदेवताकं कर्मेत्यर्थः । तद्विशिष्टेति । निरुक्तगुणविशिष्टेत्यर्थः । दधीत्यादिप्रकृतवाक्यस्यैतत्कर्मणोस्तूत्पत्तिवाक्यत्वादस्य कर्मण उत्पत्तिशिष्टदध्यादिगुणावरुद्धत्वान्न तत्र गुणान्तरं विधातुं शक्यत इति भावः । अत्र दध्यादिवाक्ये दध्यादीनि षडेव द्रव्याणि श्रुतावाम्नातान्युदकपदं तु प्रमादादायातं श्रुतितात्पर्यज्ञैर्माधवाचार्यैस्तथैवास्य वाक्यस्य व्याख्यातत्वात् । तथा च तद्वचनं दध्यादीनि विचित्राणि देयद्रव्याणि षडाम्नातानीति । नन्वत्र वाक्ये ह्युत्पत्तिवाक्यसिद्धस्वरूपस्य यागस्य पशुरूपफलसम्बन्धो विचित्रद्रव्यरूपगुणसम्बन्धश्च विधीयते ततश्च न कर्मनामधेयत्वं चित्राशब्दस्येत्याशङ्क्याह । यागस्येति । तथा च यागेन पशुं भावयेद्यागं च तादृशगुणेन भावयेदिति यागस्य गुणफलोभयसम्बन्धे विधीयमाने सत्यावृत्तिलक्षणो वाक्यभेदो दुर्वार इति भावः । उपपादितं वाक्यभेदप्रसङ्गमुपसंहरति । तस्मादिति । सिद्धे चित्राशब्दस्य कर्मनामधेयत्वे वाक्यं योजयति । तथाचेति । सामानाधिकरण्येनेति । यजिधात्वर्थयागसामानाधिकरण्येन नामधेयस्यान्वयाच्चित्रानामकेन यागेन पशुं भा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

कद्रव्यत्वेन चित्राशब्दवाच्यत्त्वोपपत्तिः ।

वयेदित्याकारकान्न निरुक्तवाक्यभेदापत्तिरित्यर्थः । अनेकद्रव्यत्वेनेति । दध्यादिविचित्रानेकद्रव्यसाध्यत्वेनेत्यर्थः । ननुचित्राशब्दाच्चित्रत्वस्त्रीत्वयोः प्रतीतेः स्त्रीत्वस्य च स्वभावतः प्राणिधर्मत्वात्प्रकृते दध्यादिद्रव्यके कर्मणि निवेशासम्भवान्नानेन वाक्येन प्रकृते कर्मणि तादृशगुणविधानं क्रियते किन्तु प्राणिद्रव्यके कर्मणि अनारभ्याधीतानां वाक्यानां प्रकृतिमात्रे प्रवेशाङ्गीकारात् चित्रावाक्यस्याप्यनारभ्याधीतत्वात्सर्वपशुयागप्रकृतिभूते प्राणिद्रव्यके ऽग्नीषोमीये कर्मणि तेन गुणो विधीयते। तथा चाग्नीषोमीयं पशुमालभेतेति विहितं पशुयागमत्र वाक्ये यजेतेति पदेनानूद्य तत्र चित्रापदेन चित्रत्वस्त्रीत्वरूपौ गुणौ विधीयेते इति चेन्न। चित्रत्वेन स्त्रीत्वेन च तं भावयेदिति द्वयोर्गुणयोर्विधाने वाक्यभेदप्रसङ्गात् । प्राप्ते कर्मण्यनेकगुणविधाने वाक्यभेदप्रसङ्गस्य सर्वसम्मतत्वात् । तथाचोक्तम् ।

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयेरन् बहवोऽप्येकयत्नत" इति ॥

नन्वत्र वाक्यभेदपरिहाराय गुणद्वयविशिष्टं पशुद्रव्यरूपं कारकं विधीयत इति चेन्न । गौरवलक्षणवाक्यभेदप्रसङ्गात् । किञ्च दध्यादिवाक्यं प्रकृतस्य चित्रानामकस्य यागस्योत्पत्तिवचनं भवति यागस्वरूपभूतयोर्दध्यादिद्रव्यप्रजापतिदेवतयोरत्रोपदिश्यमानत्वात् । उत्पन्नस्य च तस्य यागस्य "चित्रया यजेत पशुकाम" इत्येतत्फलवाक्यमत्र यागस्य फलसम्बन्धबोधनात् । एवं च सति प्रकृतार्थो लभ्येत अग्नीषोमीयपश्वनुवादेन तादृशगुणविधाने तु प्रकृतहानाप्रकृतप्रक्रिये

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यशास्त्रात् । तस्य गुणस्य प्रख्यापकस्य प्रापकस्य शास्त्रस्य विद्यमानत्वात्—अग्निहोत्रशब्दः कर्मनामधेयमिति यावत् । नन्वयं गुणविधिरेव कुतोनेति चेन्न । यद्यग्नौ होत्रमास्मिन्निति सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निरूपो गुणो विधेयस्तदा "यदाहवनीये जुहोति" इत्यनेनैवाग्नेः प्राप्तत्वात्तद्विधानानर्थक्यम् । अग्नये होत्रमिति चतुर्थीसमासमाश्रित्य अग्निदेवतारूपगुणो-

---

प्रसज्येयातां लिङ्प्रत्ययस्य चानुवादत्वाङ्गीकारान्मुख्यो विध्यर्थो बाध्येत तस्माच्चित्रापदं नामधेयमेव न गुणविधिरिति ध्येयम् ।

इदानीं तत्प्रख्यशास्त्ररूपात्तृतीयनिमित्तान्नामधेयत्वमग्निहोत्रशब्दस्य प्रदर्शयति । अग्निहोत्रमिति । "तत्प्रख्यं चान्यशास्त्र"मिति हि तत्प्रख्यशास्त्रसूत्रं तस्य फलितार्थमाह । तस्येत्यादिना । नन्वग्निहोत्रं जुहोतीत्यत्राग्निरूपस्य गुणस्यैव विधिर्न नामधेयत्वमग्निहोत्रशब्दस्य स्वीकर्तव्यमित्याशङ्कते । नन्वयमिति । यद्यत्र सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निरूपस्य गुणस्य विधानं स्वीक्रियते तदा तदाधारत्वेनाग्निरूपस्य गुणस्य वाक्यान्तरेण प्राप्तत्वात्तत्वेन तद्विधानस्याऽऽनर्थक्यमापद्येतेत्याह । यद्यग्नावित्यादिना । चतुर्थीसमासमाश्रित्यात्राग्निदेवतारूपस्य गुणस्य विधानमाशङ्कते । चतुर्थीत्यादिना । नात्र देवतारूपेणाग्निरूपस्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऽनेन विधीयत इति चेन्न । तद्देवतायाः शास्त्रान्तरेण प्राप्तत्वात् । किं तच्छास्त्रान्तरमिति चेत् । "यदग्नये च प्रजापतये च सायं जुहोती"ति केचित्।

गुणस्य विधानमुपपद्यते इति समाधत्ते । नेति । तत्र हेतुमाह । तद्देवताया इति । अग्निरत्र तच्छब्दार्थः । देवतारूपेणाग्निप्रापकं शास्त्रं पृच्छति । किमिति । केषाञ्चिन्मतानुसारेणोत्तरमाह । यदग्नये चेति । अत्राग्निर्ज्योतिरित्यादिमन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवं तदुभयसमुच्चितस्यैवात्र विधाने गौरवमिति न समुच्चितोभयविधानं यदग्नये च सायंजुहोतीत्यत्र स्वीकर्तव्यमित्यस्वरसबीजं केचिदित्यनेन सूचितम् । अधुना सिद्धान्तमतेनोत्तरमाह । अपरेत्विति । किञ्च "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोती"ति विहितेन मन्त्रेण प्राप्तमग्निमनूद्य तत्समुच्चितस्य प्रजापतेर्यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र सायं काले ऽग्निहोत्रदेवतात्वं विधीयते । "सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोती"ति विहितेन च मन्त्रेण प्राप्तं सूर्यमनूद्य तत्समुच्चितस्य च तस्य "यत्सूर्याय च प्रजापतये च प्रातर्जुहोती"त्यत्र प्रातःकाले ऽग्निहोत्रदेवतात्वं विधीयते तेनाग्नेर्मान्त्रवर्णिकत्वे प्रजापतिविधेरेकेनैव वाक्येन सिद्धे "यदग्नये च प्रजापतये सायं जुहोति" "यत्सूर्याय च प्रजापतये च प्रातर्जुहोती"त्यत्र वाक्यद्वयं व्यर्थमिति निरस्तम् । सायं होमेऽग्निऽसमुच्चितस्य प्रजापतेर्विधानं प्रातर्होमे सूर्यसमुच्चितस्य च तस्यैकेन वाक्येन कर्तुमशक्यत्वादित्यलं विस्तरेणाधिकं तु न्यायप्रकाशे द्रष्टव्यम् । नन्वग्नेर्मान्त्रवर्णिकत्वे प्रजापतिना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपरे तु "अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेति मन्त्रवर्ण एवाग्निरूपदेवताप्रापकः । नन्वग्नेर्मान्त्रवर्णिकत्वे प्रजापतिदेवतया बाधः स्यात् मन्त्रवर्णस्य चतुर्थीतोदुर्बलत्वात् । यथाहुः—

"तद्धितेन चतुर्थ्या च मन्त्रवर्णेन वा पुनः ।
देवताया विधिस्तत्र दुर्बलं तु परं पर"मिति

तस्य बाधः स्यात्प्रजापतेश्चतुर्थ्या देवतारूपेण प्राप्तत्वेन प्रबलत्वात् । अग्नेस्तु मन्त्रवर्णप्राप्तत्वेन दुर्बलत्वाच्च । नच साऽस्यदेवतेति तद्धितप्रत्ययस्य देवतात्वे स्मरणवच्चतुर्थ्या न देवतात्वे स्मर्यते सम्प्रदाने चतुर्थीति सम्प्रदानमात्रे तस्याः स्मरणात्—तस्मात् प्रजापतिना कथमग्नेर्बाधः स्यादिति वाच्यम् । त्यज्यमानद्रव्योद्देश्यत्वे सति प्रतिग्रहीतृत्वस्य सम्प्रदानपदार्थत्वेन त्यज्यमानद्रव्योद्देश्यत्वरूपस्य देवतात्वस्य सम्प्रदानस्वरूपान्तर्गतत्वात्—ततश्चतुर्थीतः सम्प्रदानैकदेशतया देवतात्वप्रत्ययो भवत्येव मन्त्रवर्णात्तु न देवतात्वप्रतीतिरस्ति किंत्वाधिष्ठानत्वमेव ततः प्रतीयते तस्मान्मन्त्रवर्णश्चतुर्थीतो दुर्बल एव तथा च प्रबलप्रमाणबोधितप्रजापतिदेवतया दुर्बलप्रमाणबोधिताग्नेर्बाधो दुर्वार एवेत्याशयेन शङ्कते । नन्विति । तत्र सम्मतिमाह । यथाहुरिति । तत्रेति । तद्धितादिषु मध्य इत्यर्थः । परामिति । तद्धितापेक्षया चतुर्थ्या दौर्बल्यं चतुर्थ्यपेक्षया च मन्त्रवर्णस्य दौर्बल्यं भवतीति परम्परं दुर्बलं बोध्यमित्यर्थः । ततः परमिति पाठे तु ततस्ततः परं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

चेन्न । "यदग्नये च प्रजापतये च सायं जुहोती"त्यत्र न केवलं प्रजापतिविधानम्, किन्तु मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतेः । एवं च न बाधः केवलप्रजापतिविधानाभावात् । नचात्र समुच्चितोभयविधानमेव कथं नेति वाच्यम् । समुच्चितोभयविधानापेक्षयाऽन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवात् । एवं च प्रयाजेषु समिधादिदेवतानां "समिधः समिधोऽग्न

दुर्बलप्रमाणमिति वीप्सापरत्वेन व्याख्येयम् । यदि च प्रजापतये जुहोतीति केवलप्रजापतिविधानं स्यात्तदा तु भवेदपि प्रजापतिनाऽग्नेर्बाधः परं तु न तथा विधानं क्रियते इति परिहरति । यदग्नये चेत्यादिना । प्रजापतेरित्यत्र विधानमित्यस्यानुषङ्गः । एवं चेति । मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितस्य प्रजापतेर्विधाने चेत्यर्थः । न बाध इति । न प्रजापतिनाऽग्नेर्बाध इत्यर्थः । तत्र हेतुमाह । केवलेति । ननु यदग्नये च प्रजापतये चेत्यस्मिन् वाक्ये होमानुवादेन समुच्चितस्यैवोभयस्य विधानं क्रियत इति कथं न स्वीक्रियत इत्याशङ्क्य तयोः समुच्चितयोर्विधानापेक्षया मन्त्रवर्णतः प्राप्तमग्निमनूद्य लाघवेन तत्समुच्चितप्रजापतेर्विधानमेवोचितमिति परिहरति । न चेत्यादिना । तत्प्रख्यशास्त्रान्नामधेयत्वे ह्युदाहरणान्तरमाह । एवमिति । समिदादिशब्दा इत्यत्रादिपदेन तनूनपातादयः शब्दा गृह्यन्ते ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आज्यस्य व्यन्त्वि"त्यादि मन्त्रवर्णेभ्यः प्राप्तत्वात् समिधो यजतीत्यादिषु समिदादिशब्दास्तत्प्रख्यशास्त्रात्कर्मनामधेयम् ।

"श्येनेनाभिचरन् यजेते"त्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात् । तेन व्यपदेशादुपमानात्तदन्यथानुपपत्तेरिति यावत् । तथाहि यद्विधेयं तस्य स्तुतिर्भवति । यद्यत्र श्येनो विधेयः स्यात् तदा ऽर्थवादैस्तस्यैव स्तुतिः कार्या "यथा वै श्येनोनि-

---

इदानीं चतुर्थनिमित्तेन तद्व्यपदेशरूपेण श्येनशब्दस्य कर्मनामधेयत्वं प्रदर्शयति । श्येनेति । कर्मनामधेयत्वमिति । नन्वत्र श्येनशब्दस्य कर्मनामधेयत्वं न भवति किन्तु सोमयागे नित्यं सोमद्रव्यं बाधित्वा तस्य स्थाने पक्षिद्रव्यरूपो गुणः काम्यो विधीयते तथा सति श्येनशब्दस्य पक्षिणि लोकप्रसिद्धा रूढिरूपपन्ना भवतीत्याशङ्क्य श्येनशब्दस्य कर्मनामधेयत्वे हेतुमाह । तद्व्यपदेशादिति । तद्व्यपदेशशब्दं व्याचष्टे । तेनेति । श्येनेनेत्यर्थः । तदिति । उपमानोपमेयभावस्य भेदघटितत्वादेवार्थवादवाक्ये श्येनोपमानेन विधेयस्तुतेः श्येननामककर्मविशेषं विनाऽनुपपत्तेर्नात्र पक्षिद्रव्यरूपो गुणो विधातुं शक्यत इति भावः । तदन्यथानुपपत्तिमेवोपपादयति । तथा हीत्यादिना । तदिति । विधेयस्य स्तुतेः कर्तव्यत्वादित्यर्थः । अत्रेति । श्येनेनाभिचरन्यजेतेत्यत्रेत्यर्थः । श्येनइति । श्येननामकपक्षिविशेष

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्त" इत्यनेनार्थवादेन श्येनः स्तोतुं न शक्यः श्येनोपमानेनार्थान्तरस्तुतेः क्रियमाणत्वात् । नच श्येनोपमानेन स एव स्तोतुं शक्यते उपमानोपमेयभावस्य भिन्नानिष्ठत्वात् । यदा तु श्येनसंज्ञको यागो विधीयते तदाऽर्थवादेन श्येनोपमानेन तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दः कर्मनामधेयं, तद्व्यपदेशादिति ।

इत्यर्थः । तस्यैवेति । श्येननामकपक्षिविशेषस्यैवेत्यर्थः । यथेति । यथा श्येनः पक्षिविशेषो निपत्य मत्स्यादीन् जन्तूनादत्ते एवमयं श्येननामको यागोद्विषन्तं भ्रातव्यं शत्रुं निपत्यादत्त इत्यर्थः । यमभिचरति, श्येनेनेति वाक्यशेषः । अत्रेति । अत्र प्रकृते ऽनेन श्येनार्थवादेन श्येनः पक्षिविशेष एव स्तोतुं न शक्यते इत्यर्थः । तत्र हेतुमाह । श्येनेति । ननु श्येनार्थवादोपमानेन श्येन एव पक्षिविशेषः कथं न स्तोतुं शक्यः स्यादित्यत आह । न श्येनोपमानत्वेनेति । तदशक्यत्वे हेतुमाह । उपमानेति । यद्यत्र श्येनसंज्ञकस्य यागस्य विधेयत्वं स्वीक्रियते तदा तादृशार्थवादोपमानेन तस्य श्येनसंज्ञकस्य यागस्य स्तुतिः कर्तुं शक्या भवत्येवेत्याह । यदेत्यादिना । फलितमुपसंहरति । इतीति । एवमुक्तेन प्रकारेणेत्यर्थः ।

अत्र कर्मनामधेयत्वे चोत्पत्तिशिष्टगुणबलीयस्त्वं पञ्चममपि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्पत्तिशिष्टगुणबलीयस्त्वमपि पञ्चमं नामधेय-

निमित्तं भवतीति केषांचिन्मतमाह । उत्पत्तिशिष्टेति । तत्रोदाहरणमाह । यथेति । अत्रेति । अस्मिन्वाक्ये वैश्वदेवशब्दस्य विश्वेदेवदेवताविधायकत्वं न सम्भवत्युत्पत्तिशिष्टाग्न्यादीनां बलीयस्त्वादित्यन्वयः । फलितार्थमुपसंहरति । इतीति । तस्येति शेषः ।

अत्रेदं बोध्यम् । चातुर्मास्यस्य चत्वारि पर्वाणि वैश्वदेवो वरुणप्रघासः साकमेधः शुनासीरीयश्चेति । तेषु प्रथमे पर्वण्यष्टौ यागा विहिता "आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति" तेषामष्टानां यागानां सन्निधाविदमाम्नायते "वैश्वदेवेन यजेतेति" । अत्र चाग्नेयादीन्यागानयजेतेत्यनूद्य वैश्वदेवशब्देन देवतारूपो गुणस्तेषु विधीयते यद्यपि वैश्वदेव्यामामिक्षायां विश्वेदेवाः प्राप्तास्तथाप्याग्नेयादिषु सप्तसु यागेष्वप्राप्तत्वाद्विधीयन्ते । तेष्वप्यग्न्यादिदेवताः सन्तीति चेत्तर्हि गत्यभावात्तेषु देवता विकल्प्यतां नामधेयत्वे तु नाममात्रस्याविधेयत्वाद्द्रव्यदेवतयोरभावेन यागस्यात्र स्वरूपासम्भवात् श्रूयमाणो विधिरनर्थकः स्यात्तस्माद्गुणविधिरिति पूर्वपक्षः उत्पत्तिवाक्यैर्विहितानाग्नेयादीनष्टौ यागान्यजेतेत्यनूद्याष्टानां सङ्घे वैश्वदेवशब्दो नामत्वेनोपवर्ण्यते । नच विधित्वाभावेपि नामोपदेशस्य वैयर्थ्यमिति वाच्यम् । प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यादिषु वैश्वदेवशब्देनैकेनैवाष्टानां सङ्घस्य व्यवहर्तव्यत्वेनार्थवत्त्वोपपत्तेः । नामप्रवृत्तिनिमित्तभूता निरुक्तिस्तु द्वि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निमित्तमिति केचित् । यथा "वैश्वदेवेन यजेते"-त्यादावत्रोत्पत्तिशिष्टाग्न्यादीनां बलीयस्त्वाद्वैश्वदेव-शब्दस्य विश्वेदेवदेवताविधायकत्वं न सम्भवतीति कर्मनामधेयत्वम् । वस्तुतस्तु तत्प्रख्यशास्त्रादेवास्य कर्मनामधेयत्वं प्रकृतयागे विश्वेदेवरूपगुणसम्प्रातिपन्नशास्त्रस्यार्थवादरूपस्यैव सत्वात "यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्" ।

धा आमिक्षायागे विश्वेषां देवानामिज्यमानतया तत्सहचरितानां सर्वेषां छत्रिन्यायेन वैश्वदेवत्वमिति, विश्वेदेवा अष्टानां कर्तार इति वा तेषां वैश्वदेवत्वं तथा च ब्राह्मणं "यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्व" मिति । देवताविविकल्पस्तु समानबलत्वाभावान्न युज्यते । अग्न्यादय उत्पत्तिशिष्टत्वात्प्रबला विश्वेदेवा उत्पन्नशिष्टत्वाद्दुर्बलाः तस्माद्वैश्वदेवशब्दः कर्मनामधेयमिति सिद्धान्तः । वस्तुगतिमाश्रित्य तत्प्रख्यवशादेव वैश्वदेवशब्दस्य कर्मनामधेयत्वमाह । वस्तुतस्त्विति । प्रकृतयाग इति । वैश्वदेवनामकेऽष्टानामाग्नेयादीनां सङ्घातमके प्रकृतयाग इत्यर्थः । विश्वेदेवेति । प्रकृतयागे विश्वेदेवरूपगुणः सम्प्रतिपन्नः सम्प्राप्तो यस्मात्तादृशशास्त्रस्येत्यर्थः । तत्र गुणप्रापकं शास्त्रमुदाहरति । यद्विश्वेदेवा इति । अस्य शास्त्रस्य कर्तृरूपेण प्रकृते यागे विश्वेदेवरूपगुणप्रापकत्वमिति भावः । नामधेयस्य प्रयोजनं तु सर्वत्रव्यवहार एव नह्यन्तरेण नामधेयस्मृतिग्रहणादिष्वनेनाहं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरुषस्य निवर्तकं वाक्यं निषेधः निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्वात् । तथा हि यथा विधिः प्रवर्तनाम्प्रतिपादयन्स्वप्रवर्तकत्व-

---

यक्ष्य इत्याख्यानोपायो लघुः कश्चिदस्ति तस्माद्वैश्वदेवादिशब्दानां कर्मनामधेयत्वमेवेति सिद्धम् ।

तदेवं मत्वर्थलक्षणादिनिमित्तचतुष्टयनिरूपणेन नामधेयस्य विधेयार्थपरिच्छेदकतयाऽर्थवत्वं निरूपितमधुना निषेधवाक्यानामर्थवत्वनिरूपणाय निषेधवाक्यं लक्षयति । पुरुषस्य निवर्तकमिति । निषेधकेति । न कलञ्जं भक्षयेदित्यादिनिषेधकवाक्यानामनर्थहेतुभूतायाः कलञ्जभक्षणादिक्रियायाः सकाशात्पुरुषस्य निवृत्तिजनकत्वेनैवार्थवत्वं न किञ्चित्कर्तव्यताप्रतिपादकत्वेनेति भावः । यथा विधिवाक्यानां स्वप्रवर्तकत्वान्यथानुपपत्त्या विधेयार्थस्य स्वर्गादिरूपेष्टसाधनत्वप्रत्यायनेन तत्र विधेयार्थे पुरुषप्रवृत्तिजनकत्वं तथा निषेधानामपि स्वनिवर्तकत्वान्यथानुपपत्त्या निषेध्यस्य पुरुषानिष्टसाधनत्वप्रत्यायनेन ततः कलञ्जभक्षणादेः पुरुषनिवृत्तिजनकत्वमिति दृष्टान्तदार्ष्टान्तिकाभ्यां निषेधवाक्यानामनर्थहेतुक्रियायाः पुरुषनिवृत्तिजनकत्वेनैवार्थवत्वमुपपादयति । तथाहीत्यादिना । ननु निषेधवाक्यानां निवर्तनाप्रतिपादकत्वं न सम्भवति न भक्षयेन्न हन्तव्य इत्येवमादावव्यवधानेन नञर्थस्याभावस्य धात्वर्थेनाऽन्वये सति धात्वर्थवर्जनकर्तव्यताया एव सर्वत्र वाक्यार्थत्वेन प्रतीयमानत्वात् । तथा च यथा यजेतेत्यादौ यागकर्तव्यता वाक्यार्थो भवति तथा "न कलञ्जं भक्षयेद्ब्राह्मणो न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति तथा न कलञ्जं भक्षयेदित्यादिनिषेधोपि निवर्तनां प्रतिपादयन्स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्तयति । ननु निषेधवाक्यस्य कथं निवर्तनाप्रतिपादकत्वमिति चेदुच्यते । न तावदत्र धात्वर्थस्य नञर्थेनान्वयः । अव्यवधानेपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेः । न ह्यन्योपसर्ज्जनत्वेनोपस्थितमन्यत्रान्वेति । अन्यथा

हन्तव्य" इत्यादावपि तत्तद्धात्वर्थवर्जनकर्तव्यतैव वाक्यार्थो न निवर्तनेत्याशयेनाशङ्कते । नन्विति । नञर्थस्याभावस्य धात्वर्थेनाव्यवधानेनान्वयेपि धात्वर्थस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितत्वान्न नञर्थेनान्वयः सम्भवति अन्यत्रोपसर्जनत्वेनान्वितस्यान्यत्रोपसर्जनत्वेनान्वयायोगादिति परिहरति । उच्यत इत्यादिना । अत्रेति । न कलञ्जं भक्षयेदित्यादावित्यर्थः । अव्यवधानेपीत्यत्र धात्वर्थस्य नञर्थेनेत्यनुषङ्गः । तस्येति । धात्वर्थस्येत्यर्थः । अन्योपसर्जनत्वेनोपस्थितस्याप्यन्यत्रोपसर्जनत्वेनान्वये को दोष इत्यत आह । नहीति । तत्र बाधकं दोषमाह । अन्यथेति । अन्यविशेषणत्वेनोपस्थितस्याप्यन्यत्र विशेषणत्वेनान्वयस्वीकारे पुरुषोपसर्जनत्वेनोपस्थितस्य राज्ञोपि क्रियोपसर्जनत्वेनान्वयापत्तेरित्यर्थः । धात्वर्थस्य नञर्थेनान्वयासम्भवात्कलञ्जादिपदार्थस्यापि कारकोपसर्जनत्वे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजपुरुषमानयेत्यादावपि राज्ञः क्रियान्वयापत्तेः अतः प्रत्ययार्थस्यैव नञर्थेनान्वयः तत्रापि नाख्यातत्वांशवाच्यार्थभावनायास्तस्या लिङंशवाच्यप्रवर्तनोपसर्जनत्वेनोपस्थितेः । किन्तु लिङंशवाच्यशब्दभावनायास्तस्याः सर्वापेक्षया प्रधानत्वात् । नञ-

---

नोपस्थितस्य तत्रान्वयासम्भवाच्च परिशेषात्प्रत्ययार्थस्यैव नञर्थेनान्वयो भवतीत्याह । अत इति । किञ्च प्रत्ययार्थोऽपि द्विविधो भवत्याख्यातत्वांशवाच्यार्थभावना लिङंशवाच्या शब्दभावना चेति । तयोर्मध्येऽपि नाख्यातत्वांशवाच्यभूताया अर्थभावनाया नञर्थेऽन्वयः सम्भवतीत्याह । तत्रापीति । तत्र हेतुमाह । तस्या इति । प्रवर्तनोपसर्जनत्वेनेति । शब्दभावनाविशेषणत्वेनेत्यर्थः । लिङंशवाच्येत्यस्य लिङो योंऽशो लिङ्त्वरूपोधर्मस्तद्वाच्येत्यर्थोबोध्यः । एवमग्रेऽपि । ननु न कलञ्जं भक्षयेदित्यादौ कलञ्जादिपदार्थस्य धात्वर्थस्य च नञर्थेनान्वयो भवत्वेव निरस्तः प्रत्ययार्थस्याप्यर्थभावनारूपस्य नञर्थेनान्वयानङ्गीकारे प्रत्ययार्थत्वाविशेषाच्छब्दभावनाया अपि तेनान्वयासम्भवेनानन्वितशब्दस्याप्रामाण्यापत्तिरित्याशङ्क्य परिहरति । किन्त्विति । तत्र हेतुमाह । तस्या इति । प्रत्ययार्थत्वं न नञर्थेनाऽन्वये प्रयोजकं किन्तु सर्वापेक्षया मुख्यत्वेनानुपस्थितत्वं तच्च शब्दभावनायां बाधितमिति भावः । एवं शब्दभावनारूपस्य प्रत्ययार्थस्य प्रवर्तनाविशेषस्य नञर्थेनान्वये सिद्धे नञः प्रत्ययार्थभूतप्रवर्तनाविरोधिनिवर्तनाबोधकत्वप्रदर्शनाय प्रथमं तत्स्वभावं प्रदर्शयति । नञश्चैव स्वभा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्चैवं स्वभावोयत्स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम् । यथा घटोनास्तीत्यादौ अस्तीति शब्दसमभिव्याहृतो नञ् घटसत्वविरोधि घटासत्वं गमयति तदिह लिङ्समभिव्याहृतो नञ् लिङर्थप्रवर्तनाविरोधिनीं निवर्तनामेव बोधयति । तदिह विधिवाक्यश्रवणेऽयं मां प्रवर्तयतीति प्रतीतेः तस्मा-

---

च इति । अत्र स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वं स्वान्वितपदार्थविरोधिबोधकत्वं बोध्यं तेन कलञ्जादिपदार्थानामपि विरोधिबोधकत्वं नञो दुर्वारं स्यात्तेषामप्येकत्र सहपाठरूपनञ्समभिव्याहारस्य सत्वादितिनिरस्तं, तेषां नञन्वितपदार्थत्वाभावस्य दर्शितत्वेन नञस्तद्विरोधिबोधकत्वासम्भवात् । नञः स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वं दृष्टान्तेन स्पष्टयति । यथेत्यादिना । घटसत्वविरोधीति । नास्तीत्युक्ते कस्यासत्वमस्तीति सत्वशब्दान्वयिना नञाऽत्र बोध्यते इति सत्वनिरूपकाकाङ्क्षायाः सत्वाद्घटनिरूपितसत्वविरोधीत्यर्थः । इदानीं नञ्स्वभावप्रदर्शनस्य फलं दर्शयति । तदिति । तन्नञित्यन्वयः । तत्पददर्शितस्वभावं नञित्यर्थः । इहेति । न कलञ्जं भक्षयेद्ब्राह्मणो न हन्तव्य इत्यादौ वाक्य इत्यर्थः । ननु लिङः प्रवर्तनाप्रतिपादकत्वे सिद्धे तत्सम्बद्धनञस्तदर्थप्रवर्तनाविरोधिनिवर्तनाप्रतिपादकत्वं सेत्स्यति तदेव कुत इत्याशङ्क्य तत्र हेतुमाह । विधीति । प्रतीतेरिति । प्रवर्तनाप्रतीतेरित्यर्थः । यद्वा यजेत स्वर्गकाम इति विधिवाक्यश्रवणेऽयं मां प्रवर्तयतीति प्रवर्तनाप्रतीतिवन्न क-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्निषेधवाक्यस्थले निवर्तनैव वाक्यार्थः । यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः ।

तच्च बाधकं द्विविधम् । तस्य व्रतमित्युपक्रमा

लञ्जं भक्षयेदित्यादिनिषेधवाक्यश्रवणेऽप्ययं मां निवर्तयतीति निवर्तनाप्रतीतेरित्यध्याहारेण विधीत्यादिहेतुवाक्यं दृष्टान्तदार्ष्टान्तिकविधया योजनीयम् । एवं सिद्धं निवर्तनारूपं निषेधवाक्यार्थमुपसंहरति । तस्मादिति । न कलञ्जं भक्षयेदित्यत्र कलञ्जकर्मकभक्षणानुकूलपुरुषप्रवृत्तिजनकप्रवर्तनां प्रति लिङर्थप्रवर्तनाविरोधिनिवर्तनैव वाक्यार्थः । एवमन्यत्रापि निषेधवाक्येषु सर्वत्र निवर्तनाया एव वाक्यार्थत्वे विधिनिषेधयोर्भिन्नार्थत्वमप्युपपन्नं भवति हननादिवर्जनकर्तव्यतावाक्यार्थत्वपक्षे तु कर्तव्यताया एवोभयत्र प्रतिपाद्यत्वात्तयोरेकार्थत्वं स्यात्तच्च न युक्तम् । यथाहुः—

"अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः ।
दृश्यते तादृगेवेह विधानप्रतिषेधयो"रिति ॥

तस्मान्निवर्तनैव प्रतिषेधेषु वाक्यार्थ इति सिद्धम् । यदि तु प्रत्ययार्थस्य नञर्थेनान्वये किञ्चिद्बाधकं वर्तते तदा तु धात्वर्थस्यैव नञर्थेनान्वयो भवतीत्याह । यदास्त्वित्यादिना । तत्र बाधकं विभजते । तच्चेति । प्रत्ययार्थस्य नञर्थेनानन्वये वर्तमानं चेत्यर्थः । तत्राद्यमिति । तयोरुक्तयोर्द्वयोर्मध्य आद्यबाधकमित्यर्थः । तस्य व्रतमिति । तस्य स्नातकस्य ब्रह्मचारिविशेषस्य व्रतं प्रजापतिदेवताकमात्मा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विकल्पप्रसक्तिश्च । तत्राद्यं "नेक्षेतोद्यन्त मादित्य-मित्यादौ तस्य व्रतमित्युपक्रम्यैतद्वाक्यपाठात् । तथा-चात्र पर्युदासाश्रयणं तथाहि व्रतशब्दस्य कर्तव्यार्थे रूढत्वात्तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्तव्य-त्वेनोपक्रमात् । किन्तत्कर्तव्यमित्याकाङ्क्षायां नेक्षेतो-द्यन्तमित्यादिना कर्तव्यार्थ एव प्रतिपादनीयः—

नीक्षणसङ्कल्पादिकं किञ्चिदनुष्ठेयमित्यर्थः । एतद्वाक्य-पाठादिति ।

"नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदा चन" ।

इत्येतद्वाक्यपाठादित्यर्थः । तथा चेति । तस्य व्रतमिति स्नातकस्यानुष्ठेयमुपक्रम्य नेक्षेतोद्यन्तमित्यादिवाक्यपाठे चास्मि-न्वाक्ये पर्युदास एव समाश्रीयते इत्यर्थः । किञ्च नेक्षेतोद्यन्तमादि-त्यमित्यत्र नञ्पदमभिधावृत्त्या प्रतिषेधं ब्रूते नतु पर्युदासं, लक्षणापत्तेः प्रतिषेधस्य च प्राप्तिपूर्वकत्वाद्वैदिकस्य प्रतिषेधस्य वैदिक्येव प्राप्तिस्तु प्रत्यासन्ना भवेत् । तथा च सति यत्र क्रतावादित्येक्षणं विहितं तत्रायं प्रतिषेध उदयास्तमयोद्देशेन प्रवर्तते एवं च सति नात्र फलं कल्पनीयं स्यात् । पर्युदा-समाश्रित्य पुरुषार्थत्वाङ्गीकारे स्वधिकारसिद्धये फलस्य क-ल्पनीयत्वमापद्येत तस्मादत्र क्रत्वर्थः प्रतिषेध इत्याश-ङ्क्य तस्य व्रतमित्युपक्रम्य नेक्षेतोद्यन्तमित्याद्याम्नातत्वाद्व्र-तशब्दस्य च कर्तव्यरूपार्थे रूढत्वादत्र किञ्चिदनुष्ठेयमेव प्र-तिभाति । तच्च पर्युदासाश्रयणे सत्येवोपपद्यते । किञ्चो-पक्रमवाक्ये प्रतिज्ञातस्यैवार्थस्यात्रापि वक्तव्यत्वात् । उप-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यथा पूर्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात् । तथाच नञर्थेन न प्रत्ययार्थान्वयः कर्तव्यार्थानवबोधात् । विध्यर्थप्रवर्तनाविरोधिनिवर्तनाया एव तादृशनञा बोधनात् । तस्याश्च कर्तव्यार्थत्वाभावात् ।

क्रमवाक्ये तु स्नातकानुष्ठेयव्रतानामेव प्रतिज्ञातत्वात् कानि तानि व्रतानीत्यपेक्षायां स्नातकव्रतप्रदर्शनायास्य वाक्यस्यावताराद्त्र कर्तव्य एव कश्चिदर्थो वक्तव्यः । सच पर्युदासपक्षेलभ्यते निषधपक्षेतु दुर्लभएवेत्यभिप्रायेणपर्युदासपक्षमुपपादयति । तथाहीत्यादिना । नेक्षेतोद्यन्तमित्यादौ कर्तव्यरूपस्यार्थस्याप्रतिपादनीयत्वे बाधकमाह । अन्यथेति । पूर्वोत्तरेति । तस्य व्रतमिति पूर्ववाक्यं–नेक्षेतोद्यन्तमित्याद्युत्तरवाक्यं च तयोरेकवाक्यत्वं बाध्येतेत्यर्थः । ननु नेक्षेतोद्यन्तमित्यादौ भवतु कर्तव्यरूपार्थस्यैव प्रतिपादनं ततोपि किं स्यादित्यत आह । तथा चेति । तथा च नेक्षेतोद्यन्तमित्यादौ कर्तव्यरूपार्थस्य प्रतिपादनीयत्वेन नञर्थे प्रत्ययार्थान्वयानवकाशो भवतीत्यर्थः । ननु नेक्षेतोद्यन्तमादित्यमित्यत्र नञर्थेन प्रत्ययार्थस्यान्वये को दोष इत्याशङ्क्य तत्र हेतुमाह । कर्तव्येति । नञर्थेन प्रत्ययार्थस्य तत्रान्वये ततः कर्तव्यार्थानवबोधापत्तेरित्यर्थः । ननु प्रत्ययान्वितस्य नञः कर्तव्यार्थावबोधकत्वानङ्गीकारे कोवाऽर्थस्तेनावबोध्यत इत्यत आह । विध्यर्थेति । तादृशनञेति । प्रत्ययान्वितेन नञेत्यर्थः । तादृशनिवर्तनैव कर्तव्यरूपार्थो भवतु को दोष इति मन्दाभिप्रायमाशङ्क्याह । तस्या-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मान्नेक्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसङ्कल्प श्चेति । निरुक्तनिवर्तनायाश्चेत्यर्थः । किञ्चैवं नञः प्रत्ययेनान्वयासम्भवे प्रत्ययादवतारितो नञ् धातुना सह सम्बध्यते धातुना नञः सम्बन्धे च न तस्य निषेधकत्वं सम्भवति विधायकसम्बद्धस्यैव नञो निषेधकत्वात् । निषेधकत्वस्य विधायकत्वप्रतिपक्षत्वात् । नामधातुभ्यां योगे तु नञो न निषेधकत्वं युक्तं तयोरविधायकत्वात् । यथाहुः ।

"नामधात्वर्थयोगे तु नैव नञ् प्रतिषेधकः ।
वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिना" विति ।

तस्मान्नेक्षेतेत्यत्र नञो धातुना योगान्नञा धात्वर्थेक्षणविरोधी कश्चनार्थः प्रतिपाद्यते । यद्यपि नञो ऽभाव एव शक्तिः तथा चेक्षणस्याभाव एव नञः शक्यार्थो लाघवात् नतु तद्विरोधी तस्याऽभावघटितत्वेन गौरवापत्तेः "तदन्यताद्विरुद्धतदभावेषु नञ्" इतिस्मरणं तु प्रतीत्यभिप्रायं न शक्त्यभिप्रायं, तथापि नेक्षेतेत्यत्र प्रत्ययस्य नञाऽसम्बन्धात् नञ्सम्बन्धशून्येन च तेन तावत्काश्चिदर्थो विधेयः स्वीकर्तव्यः तत्र न तावद्धात्वर्थो विधातुं शक्यते—नञा तदभावबोधनात् । नापि तदभावो विधातुं शक्यते अभावस्याविधेयत्वात् । तस्मात्पर्युदासाश्रयणेन धात्वर्थेक्षणविरोधी कश्चनात्र विधानयोग्योऽर्थो नञा लक्षणया प्रतिपाद्यते स च विधानयोग्यः पदार्थोऽनीक्षणसङ्कल्प एव तस्येक्षणविरोधित्वात्कर्तव्यत्वसम्भवाच्च ततश्च स एव सङ्कल्पोऽत्रानुष्ठेयव्रतत्वेन विधीयत इत्यभिप्रायेण पर्युदासस्यावश्यकत्वात्प्रत्ययादवतारितस्य नञो धातुसम्बन्धेन तदर्थविरोध्यनीक्ष-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव लक्षणया प्रतिपाद्यते तस्य कर्तव्यत्वसम्भवात्। आदित्यविषयकानीक्षणसङ्कल्पेन भावयेदिति वाक्यार्थः। तत्र भाव्याकाङ्क्षायां "एतावता हैनसा वियुक्तो भवती"ति वाक्यशेषावगतः पापक्षयो भाव्यतया

णसङ्कल्पप्रतिपादकत्वमुपसंहरति। तस्मादिति। लक्षणयेति। स्वसमभिव्याहृतपदार्थाभाव एव नञः स्वशक्यार्थो भवति तथा च स्वसम्बध्यमानधात्वर्थाभावं शक्त्या प्रतिपादयन् नञ् तदभावसम्बन्धिनं तदर्थविरोधिनं लक्षणया प्रतिपादयत्येव तदभावतद्विरोधिनोः सम्बन्धस्य सम्भवात् दृश्यते हि तेजोभावतमसोः सम्बन्धः तथा चोद्यन्तमस्तं यन्तं चादित्यं नेक्षिष्य इत्येवं रूपः सङ्कल्पोऽत्रानुष्ठेयत्वेन विधीयमानो नञा लक्षणया प्रतिपाद्यत इति भावः। तस्येति। अनीक्षणसङ्कल्पस्येत्यर्थः। पर्युदासपक्षे नेक्षेतोद्यन्तमादित्यमित्यस्य वाक्यस्यार्थं प्रदर्शयति। आदित्येति। यत्तु पर्युदासपक्षे फलस्यात्र कल्पनीयत्वमापादितं तदपि न, वाक्यशेषावगतस्य पापक्षयस्यैवात्र फलत्वसम्भवादित्याशयेनात्र भाव्यान्वयं प्रदर्शयति। तत्रेति। अनीक्षणसङ्कल्पभावनायामित्यर्थः। एनसा वियुक्तोभवतीति—पापेन विरहितो भवतीत्यर्थः। किञ्च नेक्षेतोद्यन्तमादित्यमित्यत्रानीक्षणसङ्कल्परूपस्यानुष्ठेयस्य प्रतिपादने तस्य व्रतमिति स्नातकव्रतोपक्रमवाक्यस्य नेक्षेतेत्याद्युत्तरवाक्येनैकवाक्यत्वमुपपन्नं भवति पूर्वप्रतिज्ञातस्यैवोत्तरप्रतिपादनादित्याह। एवमिति। ननु धात्वर्थेक्षणविरोधिनो बहवः पदार्था अनुष्ठेयाः सन्ति ततश्च कथमत्र वाक्येऽनीक्षणसङ्कल्पस्यैव भावनायां करणत्वेनान्वयः स्वीक्रियत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऽन्वेति । एवं च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव । नचात्र धात्वर्थविरोधिनः पदार्थान्तरस्यापि सम्भवात्कथमनीक्षणसङ्कल्पस्यैव भावनान्वय इति वाच्यम् । तस्य कर्तव्यताभावेन प्रकृते भावनान्वयायोग्यत्वात् ।

द्वितीयं "यजतिषु ये यजामहं करोति नानुयाजे"ष्वित्यादावत्र विकल्पप्रसक्तौ च पर्य्युदासाश्रयणात् । तथाहि यद्यत्र वाक्ये नञर्थे प्रत्ययार्थान्व-

---

इत्याशङ्क्य परिहरति । नचेत्यादिना । यद्यपि पदार्थान्तराणां पटेन चक्षुषोपिधानादिरूपाणां धात्वर्थेक्षणविरोधित्वं सम्भवति, तथापि कायिकवाचिकव्यापारविशेषाणामत्राप्रतीयमानत्वान्मानसव्यापारस्य चाप्रतिषेधात्सङ्कल्प एव मानसव्यापारविशेषोऽत्र परिशिष्यत इत्यभिप्रेत्य तत्र हेतुमाह । तस्येति । पटादिना चक्षुषोः पिधानादिरूपस्य पदार्थान्तरस्य कर्तव्यताभावेन कर्तव्यत्वेन विवक्षासम्भवेन सर्वक्रियाविनाभूतस्यैव धात्वर्थेक्षणाविरोधिपदार्थान्तरस्य नेक्षेतेत्यादौ प्रकृते भावनान्वययोग्यत्वमुपपद्यते तथा च धात्वर्थेक्षणविरोध्यनीक्षणसङ्कल्पस्यैवात्र भावनान्वययोग्यता सम्भवति । तस्य सर्वक्रियाऽविनाभूतत्वान्नतु तादृशपदार्थान्तरस्य तस्य सर्वक्रियाऽविनाभूतत्वासम्भवादिति भावः । प्रत्ययार्थस्य नञर्थेनान्वये विकल्पप्रसक्तिरूपस्य बाधकस्य प्रतिषेधविघटनेन पर्युदासगमकत्वप्रदर्शनाय तद्विषयमुदाहरति । द्वितीयमिति । अत्र पर्युदासाश्रणाय विकल्पप्रसक्तिमेवोपपादयति । तथाहीत्यादिना ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यः स्यात्तदाऽनुयाजेषु ये यजामहमिति मन्त्रस्य प्रतिषेधः स्यात् अनुयाजेषु ये यजामहं न कुर्यादिति। स च प्राप्तिपूर्वक एव प्राप्तस्यैव प्रतिषेधात् । प्राप्तिश्च यजतिषु ये यजामहं करोतीति शास्त्रादेव वाच्या शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव, ननु बाधः । प्राप्तिमूलरागस्येव तन्मूलशास्त्रस्य शास्त्रान्तरेण बाधा-

---

स चेति । निषेधश्चेत्यर्थः । तत्र हेतुमाह । प्राप्तस्यैवेति । शास्त्रादेवेति । ब्राह्मणहननादेरिव रागतः प्राप्त्यसम्भवात्तस्य शास्त्रादेव प्राप्तिर्वाच्येत्यर्थः । उपपादितां विकल्पप्रसक्तिमुपसंहरति । शास्त्रप्राप्तस्येति । ननु यथा रागतोहननादौ प्रवृत्तं पुरुषं हननादिप्राप्तिमूलभूतरागस्य बाधेन ततो न हन्तव्य इत्यादिशास्त्रं निवर्तयति तथा "यजतिषु ये यजामहं करोतीति" शास्त्रादनुयाजेष्वपि अनुष्ठानकाले यजतित्वाविशेषादेव येयजामह इति मन्त्रस्य समुच्चारणे प्रवृत्तं पुरुषं तत्प्राप्तिमूलभूतस्य प्रदर्शितशास्त्रस्य यजतिसामान्ये ये यजामह इति मन्त्रप्रापकस्यानुयाजेषु बाधेन ततो नानुयाजेषु येयजामहं करोतीति शास्त्रं निवर्तयन्त्येवेति कथं न शास्त्रप्राप्तस्य बाधः स्यादित्यतआह । प्राप्तीति । शास्त्रेण बाध इति शेषः । तन्मूलशास्त्रादिति । ये यजामह इति मन्त्रप्राप्तिमूलशास्त्राद्यजतिषु ये यजामहं करोतीत्येवंरूपाच्छास्त्रान्तरेण नानुयाजेषु येयजामहं करोतीत्येवंरूपेण प्रदर्शितमन्त्रप्राप्तिमूलभूतस्य प्रदर्शितशास्त्रस्य बाधायोगादित्यर्थः । दृष्टान्तश्चात्र व्यतिरेकी बोध्यः । तथा च यथा हननादिप्राप्तिमूलरागस्य भ्रान्तिनिमित्तक-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

योगात्। नच "पदे जुहोती"ति विशेषशास्त्रेणो "हवनीये जुहोतीति" शास्त्रस्येव नानुयाजेष्वित्यनेन यजतिषु ये यजामहं करोतीत्यस्य बाधः स्यादिति वाच्यम् । परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्। पद-

---

स्य शास्त्रेण बाधो भवति तथा मन्त्रप्राप्तिमूलशास्त्राच्छास्त्रान्तरेण मन्त्रप्राप्तिमूलशास्त्रस्य बाधो न युक्तो निषेधशास्त्रस्य निषेध्यप्राप्तिसापेक्षत्वेन तत्प्रापकस्याबाधकत्वादित्यनुपदं स्पष्टीभविष्यति मूल इति भावः । यद्वा तन्मूलशास्त्रादिति पञ्चमी षष्ठ्यर्थे बोध्या तेनानुषङ्गविभक्तिविपरिणामयोर्न श्रमः कर्तव्यः स्यात् । केचित्तु तन्मूलशास्त्रादिति बाधमूलशास्त्राद्बाधकरूपात्प्राप्तिमूलरागस्य यथा बाधस्तथा शास्त्रान्तरेण प्राप्तिमूलशास्त्रस्य बाधायोगादिति व्याचक्षते। ननु यथा पदाधिकरणकहोमविधायकविशेषशास्त्रेणाहवनीयाधिकरणकहोमविधायकस्य सामान्यशास्त्रस्य बाधः क्रियते । तथाऽनुयाजेषु ये यजामहमन्त्रप्रतिषेधकरूपविशेषशास्त्रेण यागसामान्ये तन्मन्त्रविधायकरूपस्य सामान्यशास्त्रस्य बाधः कथं न क्रियत इत्याशङ्क्य परिहरति। नचेत्यादिना। नच वाच्यमित्यत्रहेतुमाह। परस्परेति। शास्त्रयोरेकविषये बाध्यबाधकभावे परस्परानिरपेक्षत्वं हेतुः पदशास्त्रस्य पदाधिकरणकहोमरूपस्वार्थविधानार्थमाहवनीयशास्त्रानिरपेक्षत्वादनुयाजेषु ये यजामहमन्त्रप्रतिषेधकशास्त्रस्य तत्र प्रतिषेध्यमन्त्रप्रसक्त्यर्थं यजतिसामान्ये तादृशमन्त्रविधायकसामान्यशास्त्रसापेक्षत्वाच्चेति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं प्रदर्शयति । पदशा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रानपेक्षणान्निरपेक्षत्वम् । प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रसक्त्यर्थं यजतिषु ये यजामहमित्यस्यापेक्षणान्न निरपेक्षत्वम् । तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव सच न युक्तः । विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यसम्पातात् । न ह्यनुयाजेषु ये

स्त्रस्येत्यादिना । तथाच प्रतिषेधशास्त्रस्य विशेषविषयत्वेन प्रबलत्ववद्विधिशास्त्रस्याप्युपजीव्यत्वेन प्रबलत्वमस्तीति न प्रतिषेधशास्त्रेण विधिशास्त्रस्यात्यन्तबाधो युक्त इति विहितप्रतिषिद्धत्वाद्विकल्पः स्यात्स च न युक्त इत्युपरिष्टात्स्पष्टीभविष्यतीति भावः । बाधायोगमुपसंहरति । तस्मादिति । मन्त्रविधायकशास्त्रस्य तत्प्रतिषेधकशास्त्रेण बाधायोगात्तद्विहितस्यापि तेन प्रतिषेधे विकल्प एव स्यान्न बाध इत्यर्थः । ननु भवतु विकल्प एव, तेन किं हीयत इत्यत आह । स चेति । विकल्पस्यायुक्तत्वे हेतुमाह । विकल्प इति । ननु विकल्पस्वीकारे कथं पक्षे शास्त्रस्याप्रामाण्यापात इत्यत आह । नहीति । यथा व्रीहिभिर्यागानुष्ठानसमये यवशास्त्रस्य न प्रामाण्यं भवति–तथा विधायकशास्त्रानुसारेण ये यजामह इति मन्त्रस्यानुयाजेषूच्चारणानुष्ठानसमये न तत्प्रतिषेधकशास्त्रस्य प्रामाण्यं सम्भवतीत्यर्थः । किञ्च विकल्पपक्षे हि द्विरदृष्टकल्पनाप्रसङ्गोऽपि स्यात् । विधिशास्त्राद्ध्येवमवगम्यते यदनुयाजेषु येयजामह इति मन्त्रस्य करणे कश्चनोपकारो भवतीति प्रतिषेध-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यजामहमित्यस्यानुष्ठाने नानुयाजेष्वित्यस्य प्रामाण्यं सम्भवति । व्रीहियागानुष्ठाने यवशास्त्रस्येव द्विरदृष्टकल्पना च स्यात् विधिप्रतिषेधयोरपि पुरुषार्थत्वात् । अतो नात्र प्रतिषेधस्याश्रयणम् । किन्तु नञोऽनुयाजसम्बन्धमाश्रित्य पर्युदासस्यैवेत्थं चानुयाजव्यतिरिक्तेषु यजतिषु येयजामहमिति मन्त्रं कुर्यादिति वाक्यार्थबोधः नञोऽनुयाजव्यतिरिक्ते लाक्षणिकत्वात् । एवं च न विकल्पः । अत्र च वाक्ये ये

शास्त्रादपि तत्र तदकरणात्कश्च नोपकारोभवति । दर्शपूर्णमासयोरनृतवदनाकरणादिजन्योपकारवदित्यवगम्यते । तच्चोपकारद्वयमदृष्टरूपमिति द्विरदृष्टकल्पनाप्रसङ्ग इत्याह । द्विरदृष्टकल्पना चेति । तत्र हेतुमाह । विधीति । पुरुषार्थत्वादिति । विधानवत्प्रातिषेधस्याप्यदृष्टपुरुषार्थसम्पादकत्वादित्यर्थः । तस्मान्नानुयाजेष्वित्यादौ प्रतिषधस्वीकारे विकल्पादिदोषापत्तेर्नात्र प्रतिषेधः समाश्रीयते । किन्तु नञो नामसम्बन्धमाश्रित्यपर्य्युदासस्यैवाश्रयणं क्रियत इत्युपसंहराति । अत इति । एवं च नानुयाजेषु ये यजामहं करोतीत्यस्य वाक्यस्यार्थमाह । इत्थं चेति । अनेन पूर्वोक्तप्रकारेण चेत्यर्थः । अत्र पर्युदासस्य तात्पर्यविषयत्वेन करोतेरवतारितस्य नञो ऽनुयाजशब्देन सम्बन्धसिद्धौ चेति यावत् । तत्र हेतुमाह । नञ इति । अनुयाजव्यतिरिक्तेऽनुयाजाभावस्य सत्वाच्छक्यसम्बन्धसम्भवेन लक्षणोपपत्तिरिति भावः । अत्र प्रति-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यजामहमिति न विधीयते यजतिषु ये यजामह इत्यनेनैव च प्राप्तत्वात् । किन्तु सामान्यशास्त्रप्राप्तये-

---

षेधपक्षं परित्यज्य पर्युदासपक्षस्वीकारस्य फलमाह । एवं चेति । ननु नानुयाजेषु ये यजामहं करोतीत्यत्र ये यजामह इति मन्त्रविधौ तस्यानुयाजव्यतिरिक्तविषयत्वविधौ च वाक्यभेदः स्यादित्यत आह । अत्र चेति । सामान्यशास्त्रेति । यजतिषु ये यजामहं करोतीति यजिसामान्ये तद्विधायकशास्त्रप्राप्तमेव ये यजामह इति मन्त्रमनूद्य नानुयाजेषु ये-यजामहं करोतीत्यत्र तस्यानुयाजव्यतिरिक्तविषयता विधीयत इत्यर्थः तथा च यजतिष्वित्यादिसामान्यशास्त्रस्य विशेषापेक्षिणो नानुयाजेष्वित्यादिविशेषशास्त्रेणानुयाजव्यतिरिक्तविषयसमर्पणादनुयाजव्यतिरिक्तयागेषु येजामह इति मन्त्रः कर्तव्यतया प्राप्तः । अनुयाजेषु तु तस्य कर्तव्यत्वेनाप्राप्तत्वादप्रतिषिद्धत्वाच्च नात्र विकल्पप्रसङ्गोपि सम्भवति । लक्षणयाऽनुयाजव्यतिरिक्तविषयसमर्पणाच्च न नानुयाजेष्वित्यादि वाक्यस्याप्रामाण्यमपि भवति तस्मात्पर्युदासाश्रयणे बाधकाभावात्स एव स्वीकर्तव्य इति भावः । ननु पर्युदासाश्रयणपक्षे यजतिषु ये यजामहं करोतीति सामान्यशास्त्रेण यागमात्रे प्राप्तस्य ये यजामह इति मन्त्रस्य नानुयाजेषु ये यजामहं करोतीति विशेषशास्त्रेणानुयाजव्यतिरिक्तविषये यागविशेषे सङ्कोच नात्पर्युदासस्योपसंहारादभेदापत्तिः स्यात् । सामान्ये प्राप्तस्य विशेषे सङ्कोचस्यैवोपसंहारपदार्थत्वात् । यथा पुरोडाशं चतुर्द्धा करीतीति पुरोडाशसामान्ये प्राप्तस्य च तुर्द्धाकरणस्याऽऽग्नेयं चतुर्द्धा करोतीत्याग्नेये विशेषे सङ्कोच इत्याशङ्कते । नन्वे-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यजामह इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते—यद्यजतिषु ये यजामहं करोतीति तदनुयाजव्यतिरिक्तेष्वेवेति । नन्वेवं सामान्यशास्त्रप्राप्तस्य विशेषे सङ्कोचनरूपादुपसंहारात्पर्युदासस्य भेदो न स्यादिति चेन्न । उपसंहारो हि तन्मात्रसङ्कोचार्थः । यथा

वमिति । पुरोडाशं चतुर्द्धा करोतीत्यनेन पुरोडाशसामान्ये प्राप्तस्य चतुर्द्धाकरणस्याऽऽग्नेयं चतुर्द्धा करोतीत्यनेन च पुरोडाशविशेषमात्रे सङ्कोचः क्रियते । प्रकृते तु यजतिष्वित्यादिना यजति सामान्ये प्राप्तस्य ये यजामह इति मन्त्रस्य नानुयाजेष्वित्यादिना यजतिविशेषादनुयाजरूपादन्यमात्रे यजतिविशेषे सङ्कोच इत्युपसंहारात्पर्युदासस्य भेदः स्पष्ट एवेति परिहरति । नेत्यादिना । तन्मात्रसङ्कोचार्थ इत्यर्थः । सामान्यप्राप्तस्य विशेषमात्रसङ्कोचार्थ इत्यर्थः । तत्रोदाहरणमाह । यथेति । तदन्यमात्रसङ्कोचार्थ इति । सामान्यप्राप्तस्य विशेषादन्यमात्रसङ्कोचार्थ इत्यर्थः । इति ततोभेदादिति । एवमुक्तप्रकारेणोपसंहारात्पर्युदासस्य भेदान्न तयोरभेदापत्तिरित्यर्थः । अपरे तूपसंहारो नाम सामान्यतः प्राप्तस्य विशेषे सङ्कोचनरूपो विधेर्व्यापारविशेषः । पर्युदासस्तु—

"पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्"

इत्यभियुक्तोक्त्या प्रत्ययातिरिक्तेन नाम्ना धातुना च नञः सम्बन्धरूपः तस्मादनयोस्तावत्स्वरूपतः स्पष्ट एव भेद इति न तयोरभेदापत्तिरित्याहुः । किञ्च यत्र तु पर्युदास आश्रयितुं न शक्यते तत्र विकल्पप्रसक्तावपि नि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"पुरोडाशं चतुर्द्धा करोती"ति सामान्यप्राप्तं चतुर्द्धाकरणं "आग्नेयं चतुर्द्धा करोती"ति विशेषादाग्नेयपुरोडाशमात्रे सङ्कोच्यते । पर्युदासस्तु तदन्यमात्रसङ्कोचार्थ इति ततो भेदात् । कुत्रचिन् विकल्पप्रसक्तावप्यनन्यगत्या प्रतिषेधाश्रयणम् । यथा "नातिरात्रे षोडशिनं गृह्णाती"त्यादौ । अत्र हि अतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तषोडशिग्रहणस्य निषेधाद्विकल्पप्रसक्तावपि न पर्युदासाश्रयणमसम्भवात् । तथाहि यद्यत्र षोडशिपदार्थेन नञाऽन्वयस्तदाऽतिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थबोधःस्यात्स च न सम्भवति—अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्ष-

---

षेध एव आश्रीयत इत्याह । कुत्रचिदिति । अनन्यगत्येति । प्रतिषेधादन्यगतिविशेषस्य पर्युदासस्यासम्भवेनेत्यर्थः । तत्रोदाहरणमाह । यथेति । नातिरात्र इत्यादिवाक्ये प्रतिषेध एवाश्रीयते नतु पर्युदासः । अत्र चातिरात्र इत्यादिशास्त्रेण प्राप्तस्य षोडशिनामकपात्रविशेषग्रहणस्य प्रतिषेधाद्विकल्पप्रसङ्गेऽपि पर्युदासाश्रयणासम्भवादित्याह । अत्र हीत्यादिना । अत्र पर्युदासाश्रयणासम्भवमुपपादयति । तथाहीत्यादिना । अत्रेति । नातिरात्रे षोडशिनं गृह्णातीत्यत्रेत्यर्थः । षोडशिपदार्थे नञर्थान्वय इति । अतिरात्रे न षोडशिनं गृह्णातीत्यन्वय इत्यर्थः । एतदन्वयपक्षे वाक्यार्थमाह । तदेति । एतादृशवाक्यार्थासम्भवे हेतुमाह । अतिरात्रे षोडशिनमिति । अत्र

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधिविरोधात् । यदि चातिरात्रेण पदार्थेनान्वयस्तदाऽतिरात्रव्यतिरिक्ते षोडशिनं गृह्णातीति वाक्यार्थबोधः स्यात्सोऽपि न सम्भवति तद्विधिविरोधात् । अतोऽत्रानन्यगत्या शास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः । नच विकल्पप्रसक्तिस्तस्यापेक्षणीयत्वात् । इयांस्तु विशेषो यद्विकल्पादेकप्रतिषेधेपि प्रतिषिध्य-

पर्युदासोपपत्तये ऽन्वयान्तरमाह । यदीति । अन्वय इति । नञर्थस्येति शेषः । निरुक्तान्वयानुरोधेन वाक्यार्थबोधासम्भवेपि हेतुमाह । तद्विधिविरोधादिति । अतिरात्रे षोडशिनं गृह्णातीत्यतिरात्रयागे षोडशिग्रहणविधायकप्रत्यक्षविधिविरोधादित्यर्थः । उपपादितमुपसंहरति । अत इति । उक्तदोषप्रसङ्गादस्मिन्वाक्ये प्रतिषेधादन्यगत्यसम्भवेन प्रतिषेध एव स्वीक्रियत इत्यर्थः । अत्र प्रतिषेधे सिद्धान्तिते विकल्पप्रसङ्गमाशङ्क्येष्टापत्त्या परिहरति । नचेत्यादिना ।

अत्रेदं बोध्यम् । यत्र तस्य व्रतमित्याद्युपक्रमो नास्ति विकल्पाप्रसक्तिश्च तत्र प्रतिषेधो भवति । यथा "नकलञ्जं भक्षये"दिति । यत्र तु विकल्पप्रसङ्गेपि पर्युदासोनाश्रयितुं शक्यते तत्रापि प्रतिषेध एव स्वीक्रियते । यथा "नातिरात्रे षोडशिनं गृह्णाती"ति । ननु नातिरात्रे षोडशिनं गृह्णातीत्यत्र विकल्पप्रसङ्गेपि यदि षोडशिग्रहणस्य प्रतिषेध एव स्वीक्रियते—तदा प्रतिषिध्यमानस्यानर्थहेतुत्वस्वीकारात् षोडशिग्रहणस्यापि कलञ्जभक्षणादिवत्प्रतिषिध्यमानत्वेनानर्थहेतुत्वादर्थवत्त्वबाधापत्तिरित्याशङ्क्याह । इयांस्त्वित्यादिना । प्रतिषिध्यमानयोर-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मानस्य नानर्थहेतुत्वं विधिनिषेधोभयस्यापि क्रत्वर्थत्वात् । यत्र तु न विकल्पः प्राप्तिश्च रागत एव प्रतिषेधश्च पुरुषार्थः तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वम् । यथा न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणादे,स्तत्र भक्षणनिषेधस्यैव पुरुषार्थत्वात् । नच "दीक्षितो न ददाति न जुहोती"त्यादौ शास्त्रप्राप्तदानहोमादीनां निषेधाद्विकल्पापत्तिरिति वाच्यम् । स्वतःपुरुषार्थभूतदानहोमादीनां निषेधस्य पुरुषार्थत्वा-

---

नर्थहेतुत्वतदभावरूपो विशेष इत्यर्थः । विकल्पादिति । यत्र प्रतिषेधस्य विकल्पापादकत्वं तत्रैकस्य प्रतिषेधेपि न प्रतिषिध्यमानस्यानर्थहेतुत्वमित्यर्थः । तत्र हेतुमाह । विधीति । रागत एवेत्येवकारेण षोडशिग्रहणादिवच्छास्त्रेण प्राप्तिः प्रतिषिध्यते । अत्र निषिध्यमानस्यानर्थहेतुत्वे हेतुमाह । तत्रेति । षोडशिग्रहणविधितत्प्रतिषेधयोरुभयोरपि क्रत्वर्थत्वात्तत्र प्रतिषिध्यमानस्य नानर्थहेतुत्वम् । अत्र तु कलञ्जभक्षणादिप्रतिषेधस्यैव पुरुषार्थत्वं नतु तदनुष्ठानस्येति प्रतिषिद्ध्यमानस्य कलञ्जभक्षणब्राह्मणहननादेरनर्थहेतुत्वमेवेति भावः । ननु यथा शास्त्रप्राप्तस्य षोडशिग्रहणस्य प्रतिषेधे विकल्पः स्वीकृतः तथा शास्त्रप्राप्तदानादीनामपि प्रतिषेधे विकल्पापत्तिः स्यादिति दृष्टान्ताभिप्रायेणातिप्रसङ्गमाशङ्क्य परिहरति । नचेत्यादिना । स्वत इति । स्वतः पुरुषार्थभूतदानहोमादीनां पुरुषार्थत्वेनैव शास्त्रप्राप्तिः । क्रत्वर्थत्वे नैव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च प्रतिषेध इति षोडशिग्रहणविधितत्प्रातिषेधवत्तेषां विधिप्रतिषेधयोरुभयोस्तुल्यार्थत्वाभावेन न विकल्पापत्तिः । किञ्च रागतः प्राप्तस्य पुरुषार्थत्वेन प्रतिषेधे प्रतिषिध्यमानस्य कलञ्जभक्षणादिवदनर्थहेतुत्वस्वीकारान्न दानहोमादेः प्रतिषिध्यमानस्याप्यनर्थहेतुत्वं सम्भवति तस्य रागतः प्राप्तत्वाभावात् कलञ्जभक्षणादिप्रतिषेधवत्तत्प्रतिषेधस्य पुरुषार्थत्वाभावाच्चेति भावः । अत्रेदं बोध्यम् । ज्योतिष्टोमे श्रूयते "दीक्षितो न ददाति न जुहोति न पचतीति" (१)तत्र यद्दानादिकं पुरुषार्थं यच्च क्रत्वर्थं तत्राप्युपदिष्टमतिदिष्टं च तत्सर्वं प्रतिषिध्यते कुतः न ददातीत्यादिवचनस्य सामान्यरूपत्वादित्याद्यः पक्षः उपदिष्टस्यापि प्रतिषेधे सत्युपदेशोऽनर्थः स्यादिति ततोतिदिष्टं पुमर्थं चेत्येतदुभयमेव क्रत्वर्थत्वेनोपदिष्टं दानादिकमनुष्ठेयमिति मध्यमः प-

---

(१) एते रागप्राप्तानां शास्त्रप्राप्तानां वा दानादीनां प्रतिषेधाः पर्युदासा वा इत्यत्र मतभेदाः प्रदर्श्यन्ते तत्र सूत्रभाष्यकारमते पर्युदासा एव तथाहि न ददातीत्यादौ शास्त्रप्राप्तानां पुरुषार्थानां दानादीनां प्रतिषेध उत क्रत्वर्थत्वेन प्राप्तानां दानादीनां प्रतिषेधः अथवा सर्वेषामेवेति संशये अविशेषात् सर्वेषामिति पूर्वपक्षे प्राप्ते सिद्धान्तसूत्रम्–अपितुवाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात् अत्रभाष्यं अहरहर्दद्यादित्यस्य शेषो न दीक्षित इति । एवं होमपाकयोरपि । असति पर्युदासे प्रतिषेधे विकल्पः स्यात् इति । एतेन क्रत्वर्थत्वेन विहितानां दानादीनां निषेधे पर्युदासासम्भवात् विकल्पप्रसक्तेः पर्युदासएवेति सिद्धान्तोदर्शितः । शास्त्रदीपिकाकृतस्तु अदीक्षितोनित्याग्निहोत्रं कुर्यादिति पर्युदासे प्रकरणानुग्रहो न स्यात् नहि ज्योतिष्टोमप्रकरणे ज्योतिष्टोमोपकारकं धर्मं विहाय नित्यदानहोमकर्तॄणामदीक्षितत्वधर्मविधानमुचितं तस्मान्नित्यदानहोमादीनां क्रत्वर्थतया प्रतिषेध एवेति सिद्धान्तमाहुः । माधवाचार्यपक्षस्तु टीकाकृतैव दर्श्यते ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावेपि निषिध्यमानस्यानर्थहेतुत्वात् । यथा क्रतौ स्वस्त्रीगमनादेस्तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतुवैगुण्यसम्पादकत्वात् ।

क्षः । नित्याग्निहोत्रदानादिकं पुरुषार्थत्वेन यत्प्रत्यक्षश्रुतावुपदिष्टं ज्योतिष्टोमकालेपि प्राप्तं यच्चातिदिष्टं दानादिकं तयोरुभयोर्मध्ये प्रत्यक्षोपदिष्टनिषेधस्योपदिष्टमेव सन्निहितमिति पुमर्थस्यैवात्र निषेधः । नच नित्याग्निहोत्रदानादौ विधिनिषेधयोः प्रवृत्त्या विकल्पः शङ्क्यः । भिन्नविषयत्वात्क्रत्वर्थो निषेधः क्रतुकाले तदनुष्ठानं वारयति पुरुषार्थस्तु विधिः कालान्तरे तदनुष्ठापयति । तस्मात्पुमर्थस्य निषेध इति प्रतिषेधपक्षे वाक्यभेदः शङ्क्येत । तर्हिपुमर्थदानादिव्यतिरिक्तं क्रतुकालेऽनुष्ठेयमिति पर्युदासोऽस्तु ।

ननु यत्र रागतः प्राप्तस्य प्रतिषेधः पुरुषार्थो भवति तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वं यथा कलञ्जभक्षणादेः,क्रतौ स्वस्त्रीगमनप्रतिषेधस्य तु पुरुषार्थत्वाभावात्तत्र निषिध्यमानस्य स्वस्त्रीगमनस्य कथमनर्थहेतुत्वमित्यत आह । निषेधस्येति । यद्वा निषेधस्येत्यादिपूर्वमेवात्रान्वेति । तत्र प्रसिद्ध्यर्थं तु यथाक्रतावित्यादिकमेव भवति । तथा च स्वतः पुरुषार्थेत्यादेरयमर्थः । स्वत इति क्रत्वङ्गत्वोपाधिमन्तरेण केवलं स्वरूपत एव पुमर्थभूतानां दानादीनां निषेधस्य पुरुषार्थत्वाभावेपि क्रत्वर्थत्वसम्भवान्निषिध्यमानस्य दानादेः क्रतुवैगुण्यसम्पादकत्वेनानर्थहेतुत्वमिति योजना । तथा च तेषामनुष्ठानस्य स्वतः पुरुषार्थत्वेपि क्रत्वनुष्ठानकाले ऽपुरुषार्थत्वात्तत्र तेषामनुष्ठानस्य भवत्यनर्थहेतुत्वमिति भावः । तस्येति । क्रतौ स्वस्त्रीगमनादेरित्यर्थः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः । तस्य च लक्षणया प्रयोजनवदर्थपर्यवसानम् । तथा ह्यर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेध्ययोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति । स्वार्थमात्रपरत्व आनर्थक्यप्रसङ्गात् । आम्नायस्य हि क्रियार्थत्वात् । न चेष्टापत्तिः स्वा-

---

क्रतौ स्त्रीगमनादेः कलञ्जभक्षणादिवदनर्थरूपनरकादिदुःखाहेतुत्वेऽपि क्रतुवैगुण्यसम्पादकत्वेनानर्थहेतुत्वसम्भवाद्भवत्यत्रापि निषिध्यमानस्यानर्थहेतुत्वमिति भावः । तस्मान्निषेधवाक्यानामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैव पुरुषार्थानुबन्धित्वमिति सिद्धम् ।

इदानीं सर्वार्थवादसाधारण्येनार्थवादरूपवेदभागस्य लक्षणमाह । प्राशस्त्येति । ननु "वायुर्वै क्षेपिष्ठा देवते" त्यादेरर्थवादवाक्यात्प्राशस्त्यादेरप्रतीयमानत्वान्न तस्य प्राशस्त्यादिपरत्वं ततश्चासम्भवि लक्षणमिदमित्यत आह । तस्येति । तस्यार्थवादस्य लक्षणया प्राशस्त्यनिन्दान्यतरप्रतिपादकत्वसम्भवेन नेदं लक्षणमसम्भवीत्यर्थः । अर्थवादस्य तया फलवदर्थपर्यवसानमेवोपपादयति । तथाहीत्यादिना । अर्थवादवाक्यं कर्तृ प्राशस्त्यनिन्दितत्वे द्वे प्रतिपादयतीत्यन्वयः । नन्वर्थवादस्य स्वार्थमात्रपरत्वे कथमानर्थक्यप्रसङ्गो वायुर्वैक्षेपिष्ठेत्यादेरर्थवादवाक्यात्क्षिप्रगामिवायुदेवतारूपार्थस्य प्रतीयमानत्वादित्यत आह । आम्नायस्येति । समस्तवेदस्य क्रियाप्रतिपादकत्वस्वीकारेण नास्य सिद्धार्थप्रतिपादकस्य स्वार्थमात्रपरत्वे सार्थक्यमुपपद्यत इति भा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्यायोऽध्येतव्य इत्यध्ययनविधिना सकलवेदाध्ययनं कर्तव्यमिति बोधयता सर्ववेदस्य प्रयोजनवदर्थपर्यवसायित्वं सूचयतोपात्तत्वेनानर्थक्यानुपपत्तेः । स द्विविधः । विधिशेषो निषेधश्चेति । तत्र "वायव्यं श्वेतमालभेत भूतिकाम" इत्यादिविधिशेषस्य वायुर्वै-

---

वः । अर्थवादवाक्यानामनर्थकत्वस्येष्टत्वमाशङ्क्य परिहरति । न चेत्यादिना । अर्थवादं विभजते । स द्विविध इति । विधिशेष इत्यादि । सोपि चतुर्विधः प्रशंसा–निन्दा-परकृति--पुराकल्प–भेदात्, तत्र प्रशंसार्थवादो हि "शोभतेऽस्य मुखं य एवं वेदे"त्यादि वायुर्वैक्षेपिष्ठेत्यादिर्मूलोदाहृतश्च । निन्दार्थवादस्तु "असत्रं वा एतद्यदच्छन्दोमम्" "अश्रुजं हि रजतं यो बर्हिषि ददाती"त्यादिः सोरोदीत्यादिर्मूलोदाहृतश्च भवति । परेणेदं महता पुरुषेण कर्म कृतमिति प्रतिपादकोर्थवादः परकृतिरित्युच्यते । यथा "अग्निर्वा अकामयते"त्यादिः । परवक्तृकार्थादिप्रतिपादकोर्थवादः पुराकल्प इत्युच्यते । यथा(१) "तमशपद्धिया धिया त्वा वध्यासुः"इत्यादिरिति । विधेयार्थप्राशस्त्येति । वायुः क्षिप्रगामित्वादतीव प्रशस्ता देवता भवत्यत-

---

(१) अग्नेस्त्रयोज्यायांसोभ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थंवावस्यार्तिमारिष्यतीति स निलायत सोऽपः प्राविशत्तं देवताः प्रैषमैच्छन्तं मत्स्यः प्राब्रवीत्तमशपद्धिया धिया त्वा वध्यासु र्यो मा प्रावोच इति तस्मान्मत्स्यं धिया धिया घ्नन्ति इति तैत्तिरीयसंहितायां द्वितीयाष्टके ७ प्रपाठके ज्ञेयम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षेपिष्ठादेवतेत्यादेर्विधेयार्थप्राशस्त्यबोधकतयाऽर्थवत्वम्। "बर्हिषि रजतं न देय"मित्यादिनिषेधशेषस्य "सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्व"मित्यादेर्निषेधस्य निन्दितत्वबोधकतयाऽर्थवत्वम्। नच प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वेन नार्थवादस्यार्थवत्वमिति वाच्यम्। आलस्यादिवशादप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात्।

स्तद्दैवत्यं कर्म प्रशस्तमिति विधेयकर्मदेवतागतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वेनार्थवत्वमित्यर्थः। निषेध्येति। निषेध्यरजतनिन्दाप्रतिपादनद्वारा रजतनिषेधप्राशस्त्यपरत्वेन निषेधैकवाक्यत्वादर्थवत्त्वमित्यर्थः। एवमग्निर्वा अकामयतेत्यादेरप्यग्निदैवत्यो यागः पूर्वकालेऽग्निना कृतत्वात्प्रशस्तोऽत आधिक्यादिदानीन्तनैरप्यन्यैर्यजमानैरवश्यं कर्तव्यमिति विधेयकर्मगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वेनार्थवत्वं बोध्यम्। एवमन्यत्रापि तत्तद्विधेयकर्मप्राशस्त्यादिप्रतिपादनद्वारेण तत्तद्विध्याद्येकवाक्यत्वेनार्थवत्वं विभावनीयम्। क्वचिदर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेन प्रामाण्यं स्वीकृतं यथा अक्ताः शर्करा उपदध्यादिति विधावक्ता इति पदेन द्रवद्रव्यसामान्यं प्रतीयते तच्च द्रव्यं किमिति सन्देहे "तेजो वै घृत"मित्यर्थवादरूपाद्वाक्यशेषात् घृतमिति निश्चीयत इति। ननु विधेयकर्मप्राशस्त्यादिबोधस्य सुखदुःखाभावान्यतरविलक्षणत्वेन नार्थवादस्य तत्प्रतिपादनेनार्थवत्वमुपपद्यत इत्याशङ्क्य परिहरति। नचेत्यादिना। तद्बोधस्योपयोगादिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स पुनस्त्रेधा । तदुक्तम्—

“विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत” इति ।

अस्यार्थः । प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः । यथा “आदित्यो यूप” इत्यादि । यूप आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते । प्रमाणान्तराऽवगतार्थबोधकोऽनुवादः । यथा “अग्निर्हिमस्य भेषज” मित्यत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् । प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थवादो भूता-

---

अर्थवादजन्यप्राशस्त्यादिबोधस्य विधेयकर्मानुष्ठानादावुपयोगादर्थवादस्यार्थवत्त्वमुपपद्यत इत्यर्थः । स पुनरर्थवादो गुणवादोऽनुवादो भूतार्थवादश्चेति त्रिधा भवतीति पुनरपि तं त्रेधा विभजते । स पुनस्त्रेधेति । तस्य त्रिविधत्वे वृद्धसम्मतिमुदाहरति । तदुक्तमिति । तद्धानादिति । तयोर्हानं तद्धानं तस्मादिति विग्रहः । प्रमाणान्तरविरोधप्रमाणान्तरावधारणयोर्हानादित्यर्थः । समुदाहृतवृद्धसम्मतिं व्याचष्टे । अस्यार्थ इत्यादिना । इन्द्रोवृत्रायेति । अस्य वृत्रम्प्रतीन्द्रवज्रोद्यच्छनाभावावगाहिप्रमाणान्तरस्यादर्शनान्न तद्बोधने प्रमाणान्तरेण विरोधः । नापि प्रमाणान्तरावगतार्थप्रतिपादकत्वं

CC-0. Digitized by eGangotri and MIDF- Delhi

र्थवादः । यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि । एवं

वृत्रं प्रतीन्द्रवज्रोद्यच्छनप्रतिपादकप्रमाणान्तरस्यादर्शनादिति भावः । एवमुपपादितं विध्यर्थवादादिरूपस्य पञ्चविधवेदस्य साक्षात्परम्परया यागादिधर्मप्रतिपादकत्वेनार्थवत्त्वमुपसंहरति एवञ्चेति । उक्तेन प्रकारेण चेत्यर्थः । योयं यागादिरूपो धर्मो यत्स्वर्गादिफलमुद्दिश्य विहितः सोयं तादृशफलोद्देशेनानुष्ठीयमान एव तस्य फलस्य हेतुर्भवति । परमेश्वरसमर्पणमनीषयाऽनुष्ठीयमानस्तु चित्तशुद्धितत्त्वज्ञानप्राप्तिद्वारा परम्परया मोक्षहेतुरिति धर्मानुष्ठानस्य विविदिषाश्रुतिप्रामाण्यात्संयोगपृथक्त्वन्याय(१)माश्रित्य परमपुरुषार्थपर्यवसायित्वमुपाक्षिपति ।

---

(१) अग्निहोत्रे दध्नेन्द्रियकामस्य जुहुयादिति श्रूयते तत्र किं कामार्थमेव दधि नित्येऽपि स्यात् उत ततोऽन्यन्नित्यामिति संशये काम्यत्वेन श्रुतं हविः नित्यार्थमुपादेयं न भवितुमर्हति अतोऽन्यन्नित्य मिष्यताम् । नन्वत्र दध्येव नित्यार्थे श्रूयते दध्ना जुहोति । मैवम् । एतस्य वाक्यस्य कामवाक्यैकवाक्यता गम्यते ऽतो नित्यार्थे पृथक् दधि न विधीयते । दध्नेन्द्रियं कुर्यादित्युक्ते किमाश्रितेन इत्यपेक्ष्यते होमसंयुक्तस्य च दध्नः फलापेक्षा तयोरेवमाकाङ्क्षावशादेकवाक्यता यद्दध्नेन्द्रियं कुर्यात्तद्धोमाश्रितेन यच्च दध्ना जुहोति तदिन्द्रियार्थमिति तस्मान्नित्यदध्यविधानात्काम्यमेव तत्स्यात् इति प्राप्ते सिद्धान्तः द्वयोरेकस्य वाऽऽकाङ्क्षा यदि भवेत्ततस्तयोरेकवाक्यत्वं कल्प्येत अत्र तूभयं निराकाङ्क्षं काम्यवाक्यन्तावद्विपरिवृत्तिलब्धहोमाश्रयं नाश्रयसम्बन्धकरं प्रमाणमपेक्षते दधिस्वरूपमपि लोकसिद्धं न यूपादिवदलौकिकमतो न तदर्थमन्यापेक्षम् दध्नोऽपि फलवद्धोमसंयुक्तस्य न फलान्तरापेक्षा तस्मात्पृथक्संयोगादुभयार्थं दधि स्यात् इति चतुर्थाध्यायस्य तृतीयपादे तृतीयाधिकरणेचिन्तितम् ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च "यजेत स्वर्गकाम" इत्यादिनिखिलवेदस्य साक्षात्परम्परया वा यागादिधर्मप्रतिपादकत्वं सिद्धम् । सोयं धर्मो यदुद्दिश्य विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः । ईश्वरार्पणबुद्ध्या क्रियमाणस्तु निश्श्रेयसहेतुः । नच तदर्पणबुद्ध्याऽनुष्ठाने प्रमाणाभावः ।

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पण"

मिति भगवद्गीतास्मृतेरेव प्रमाणत्वात् । स्मृतिचरणे तत्प्रामाण्यस्य श्रुतिमूलकत्वेन व्यवस्थापनादिति शिवम् ॥

सोयमित्यादि । धर्मस्य परमेश्वरसमर्पणबुद्ध्याऽनुष्ठाने प्रमाणाभावमाशङ्क्य तत्र भगवद्वाक्यं प्रमाणयति । नचेत्यादिना । नच तस्याः स्मृतेरप्रामाण्यमाशङ्क्यं तन्त्रे स्मृतिपादे स्थितम्—अष्टकाः कर्तव्या इत्यादिस्मृतिवाक्यं न धर्मे प्रमाणं पौरुषेयवाक्यत्वे सति मूलप्रमाणरहितत्वाद्विप्रलम्भकवाक्यवत् । अथ मूलप्रमाणवत्त्वाय वेदार्थ एव स्मृतिभिरुच्यत इति मन्येथाः तर्हि वेदेनैव तदर्थस्यावगतत्वादियं स्मृतिरनार्थिका स्यात् । तदानीमनुवादकत्वादप्रामाण्यमिति प्राप्ते ब्रूमः विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात् । उपनयनाध्ययनादिस्मृतिवत् । नच वैयर्थ्यं शङ्कनीयम् । अस्मदादीनां प्रत्यक्षेषु परोक्षेषु नानावेदेषु विप्रकीर्णस्यानुष्ठेयार्थस्यैकत्र सङ्क्षिप्यमाण-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालानांसुखबोधाय भास्करेण सुमेधसा ।
रचितोऽयं समासेन जैमिनीयार्थसङ्ग्रहः ॥ १॥

इति श्रीमहामहोपाध्यायलौगाक्षिभास्करविरचितपूर्वमीमांसार्थसङ्ग्रहनामकं प्रकरणं समाप्तिमगात् ॥

त्वात् । तस्मादियं स्मृतिर्धर्मे प्रमाणमिति । ननु किमनेन सङ्ग्रहनिरूपणेन विस्तृतभाष्यादिग्रन्थैरेव जैमिनीयन्यायार्थबोधसम्भवादित्याशङ्क्य सङ्ग्रहनिरूपणे स्वप्रवृत्तिनिमित्तं प्रदर्शयति । बालानामिति । तेषां विस्तृतत्वेन दुःखग्राह्यत्वान्न तैर्बालशब्दितपूर्वमीमांसासंस्कारशून्यानां जैमिनीयन्यायार्थबोधः सम्भवति । अनेन तु तत्तद्विस्तृतशास्त्रप्रवेशद्वारा सम्भवत्येव स इति भावः ॥

टीकाविहीने तु कृता हि टीका पूर्वे तु तन्त्रे खलु सङ्ग्रहोऽस्मिन् ।
दुर्बोधशास्त्रे किमु मादृशानां दृष्ट्वापि दोषं न सहन्ति धीराः ॥१॥
यदाज्ञया बन्धविमोक्षणं विना स्वधर्मसेवा फलहेतुतां गता ॥
प्रणौमि सोमं मृडमादिकारणं किमन्यदेवैर्जनफल्गुहेतुभिः ॥ २ ॥
मदीययत्नः शिवपादसेवया गुरोः कटाक्षैकलवेन लब्धया ॥
प्रयुज्यमानः शिवपादपङ्कजे स्वयं तु भूयान्मृडतोषकारणम् ॥ ३ ॥

सुजनपदविनीतो दुर्जनाद्दूरनिष्ठो—
गुरुवरशिवभक्तस्तेन लब्धागमैक्षः ॥
श्रुतिमणिपदनिष्ठो भिक्षुरामेश्वराख्यः
सुजननयनिवेशाय प्रबन्धं चकार ॥ ४ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुणगणमणिसिन्धुः शम्भुपादैकभक्तो
निगमशिरसिनिष्ठो जातवैराग्यचित्तः ॥
श्रुतिनलिनविकासे भानुभावो य ईश-
स्तमिह महिमपूज्यं नौमि गोपं यतीन्द्रम् ॥ ५ ॥

तस्मादेव गुरुवरादभीष्टलब्धं गोपालाश्रमपदगीयमानदैवात्।
येनोमाधवचरणाब्जसेविनाऽत्र तं वन्दे महिमगुरुं विशा-
लबुद्धिम् ॥ ६ ॥

या काशी निखिलगुरोर्महेश्वरस्य प्राणान्ते सकलशि-
वप्रदा प्रसिद्धा ।
यत्राहं सकलसुरेशलब्धतत्त्वस्तत्रेयं सुजनहितप्रदा निबद्धा ॥७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोपालेन्द्रसरस्वती-
श्रीपूज्यपादशिष्यश्रीसदाशिवेन्द्रसरस्वतीशिष्येण
श्रीरामेश्वरेण शिवयोगिभिक्षुणा विरचिता
मीमांसार्थसङ्ग्रहकौमुदी
समाप्ता ।

सब तरह की संस्कृत की पुस्तकों के मिलने का पता—
हरिदासगुप्ताः
चौखम्बा संस्कृत सीरीज आफीस
बनारस सिटी,

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

agannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

agannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nep

CC-0. Digitized by eGangotri and MIDF- Delhi

सूचीपत्रम् ।

१ [illegible] ... ...
२ [illegible] व्याख्या ... ...
३ मीमांसा [illegible] सहित [illegible]
४ जैमिनीयन्यायमाला [illegible] ... ...
५ [illegible] ... ...
६ [illegible] ... ...
७ [illegible] दर्शन [illegible] ...
८ मीमांसाश्लोकवार्त्तिकम् (भट्टकुमारिलकृत)
न्यायरत्नाकरव्याख्या [illegible] सम्पूर्ण ।
९ तन्त्रवार्त्तिकम् ... ...
१० टुप्टीका ... ...
११ न्यायसुधातन्त्रवार्त्तिक टीका ... ...
१२ [illegible] ... ...
१३ मीमांसा [illegible] ... ...
१४ प्रकरणपञ्चिका ... ...
१५ विधिरसायनम् ... ...
१६ न्यायरत्नमाला ... ...
१७ [illegible] चिन्तामणि तर्कपादः ... ...
१८ [illegible] तर्कपादः ... ...
१९ [illegible] ... ...
२० [illegible] ... ...
२१ पूर्वमीमांसाधिकरणकौमुदी महामहोपाध्याय [illegible]
रामकृष्ण भट्टाचार्य विरचिता । [illegible] प्रसिद्ध
[illegible] ...
२२ [illegible]
२३ [illegible]

[illegible]

[illegible] चौखम्बा संस्कृत सीरिज
बनारस [illegible]

[illegible]gannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nep[illegible]

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi